वैष्णवकुलचूड़ामणि-प्रभुपाद-श्रीमत्कृष्णदास-कविराज-गोस्वामि-
प्रणीत-वङ्गवाङ्मय-पद्यात्मक-

श्रीचैतन्यचरितामृतग्रन्थस्य संस्कृतपद्यानुवादः

(अन्त्यलीला)

भारतवर्षीय-पश्चिमवङ्गप्रदेशस्थ-
वर्द्धमानमण्डलान्तर्गत-कालनानगरावस्थितानन्दाश्रमाश्रित-
श्रीमत्स्वामि-भास्करानन्द-सरस्वती-विरचितः

१८८३ शकाब्दीय-
श्रीश्रीगुरुपूर्णिमायाम्
प्रकाशितः ।

(प्रथमसंस्करणम्)

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

वैष्णवकुलचूड़ामणि-प्रभुपाद-श्रीमत्कृष्णदास-कविराज गोस्वामि-
प्रणीत-वङ्गवाङ्मय-पद्यात्मक-

श्रीचैतन्यचरितामृतग्रन्थस्य संस्कृतपद्यानुवादः
(अन्त्यलीला)

भारतवर्षीय-पश्चिमवङ्गप्रदेशस्थ-
वर्द्धमानमण्डलान्तर्गत-कालनानगरावस्थितानन्दाश्रमाश्रित-
श्रीमत्स्वामि-भास्करानन्द-सरस्वती-विरचितः

१८८३ शकाव्दीय-
श्रीश्रीगुरुपूर्णिमायाम्
प्रकाशितः ।

(प्रथमसंस्करणम्)

प्रकाशक :—श्रीक्षेत्रनाथडाङ्गाली-घोषः
७वि गोराचाँदवसु रोड
कलिकाता-६

सर्व्वं स्वत्वं प्रकाशकेन संरक्षितम् ।
मूल्यं सार्द्ध-रूप्यक-सप्तकमात्रम् ।

मुद्राकर :—श्रीरामगोपालवन्द्योपाध्यायः
सार्भिस् प्रिण्टार्स
५५।६४, कालीचरण घोष रोड्
कलिकाता-५०

उपसंहारः

गौर्यस्य गोस्वामिवरस्य दैवी
श्रीभास्करानन्द-यतीश्वरस्य ।
चैतन्यलीलां कविराजदृब्धां
पद्यात्मनैवान्ववदत् समग्राम् ॥
स भास्करोऽस्तं गमितो विधात्रा
प्रागेव मर्त्योरसि तत्प्रचारात् ।
श्रीक्षेत्रनाथोऽद्य तदीयशिष्य-
स्तद्वस्तु भक्त्या नयति प्रचारम् ॥
स भास्करानन्दगुरुर्यतीश्वरः
सुविश्रुतः पण्डितसत्यकिङ्करः ।
समीक्ष्य लोके स्वकृतिं प्रचारितां
लोकान्तरस्थः सुतरां प्रमोदताम् ॥

तदीयाभिन्नहृदयमित्रस्य
श्रीकालीपदतर्काचार्य्यस्य ।

—०—

श्रीश्रीगुरुदेवो जयतितमाम्

मदीय-परमाराध्य-गुरुदेव-श्रीमत्स्वामि-भास्करानन्द-सरस्वती-महाराजेन संस्कृतपद्यै रनूदितं श्रीचैतन्यचरितामृतस्यावशिष्टमन्त्यलीलाखण्डं प्रकाश्यते । श्रीचैतन्यचरितामृतं हि श्रीचैतन्ययुगीयः श्रेष्ठः प्रामाणिको ग्रन्थः । मध्य-युगीयाद्वितीयदर्शनशास्त्रेऽस्मिन् गौड़ीयवैष्णवधर्म्मस्य निगूढ़तत्त्वं सन्निविष्टं काव्याकारेण । अत्र धर्म्म-दर्शन-काव्येतिहासानामपूर्व्वः समन्वयः सम्पादितः ।

अस्यामूल्यरत्नस्य वङ्गभाषानिवद्धतया एतन्माधुर्य्यास्वादनेऽवङ्गीयानामतृप्ततृषा स्वामिपादकृतदेवभाषानुवादेन प्रशमिष्यति। पुनर्वर्षचतुःशत्याः प्राक्कालीन-वङ्गभाषाया आधुनिकवङ्गभाषारीत्याः प्रभेदबाहुल्याच्च श्रीचैतन्यचरितामृत-मूलग्रन्थो वङ्गीयानामपि दुर्वोध्यो जातः। स्वामिपादेन सुललितसंस्कृतगिरा तस्यानुवादो मूलस्य प्रकृतार्थं प्रकटितवान्। एष सर्वतोमूलानुगोऽनुवादो मौलिक-साहित्यरचनावत् सुरभारतीभाण्डागारेऽन्यतमं रत्नमिव समादरं प्राप्स्यति। सर्वोपर्य्यस्मिन् श्रीमन्महाप्रभोः श्रीकृष्ण-परमविरहासक्तानि प्रेमोद्गारात्मकानि विचित्राणि प्रलापवचनान्यपूर्वरसास्पदानि विश्वसाहित्येऽपि सुदुर्लभानि।

श्रीगुरुदेवेन सुरगिरानुवादरचितस्य संस्कृतपद्यमय-श्रीचैतन्यचरितामृत-ग्रन्थराजस्य समग्रस्य मुद्रापणया शुभप्रकाशनदिवसेऽद्य श्रीगुरुदेवस्य मर्त्यधाम्न्य-विद्यमानतया तस्य प्रियतमं ग्रन्थं तस्य श्रीकरकमलयोर्न्यसितुमसमर्थस्य मे महान् परितापः। मूलग्रन्थ-प्रचारकालेऽपीदृगेव किञ्चिद्वृत्तम्। श्रीकृष्णदासकविराज-गोस्वामिवर्य्यस्य ग्रन्थरचनासमापनानन्तरं श्रीकृष्णचैतन्यलीलापरिकरषड्-गोस्वामिनामवशेषो वैष्णवसमाजैकाश्रयः श्रीमज्जीवगोस्वामिप्रभुरभीक्ष्णशो म्लेच्छै रर्द्दिताया मथुरानगर्य्यां अमूल्यग्रन्थरत्नानां निरापत्तायै ग्रन्थान्तरैः सहैतद्ग्रन्थ-राजं वैष्णवप्रभुत्रयेण सार्द्धं ग्रन्थपूरितान् महादारुपेटकान् गोशकटेषु संस्थाप्य गौड़देशं प्रति प्रेषितवान्। पथि मल्लभूमौ दस्युवृत्ती राजा वीरहाम्वीरो वहुजन-रक्षिताः पेटका धनरत्नादिपूर्णा भवेयुरिति मत्वा सहस्रमल्लद्विशत्या ताँल्लुण्ठयामास! ग्रन्थसमूहप्रणाशवार्त्तया समग्रव्रजभूमिस्तिमिरावृतेव बभूव। अथ श्रीग्रन्थोद्धारप्राणपणसंकल्पेनानुसन्धानप्रवृत्तेन श्रीनिवासप्रभुणा राजसभायां पुराणपाठकतया लब्धप्रवेशेन सामात्यं सराज्यं राजानं वैष्णवं कृत्वा श्रीग्रन्थाः समुद्धृताः। तस्मात् प्राक् ग्रन्थोद्धारवार्त्तामप्राप्यैव ग्रन्थकारः श्रीकविराज-गोस्वामिप्रभुस्तिरोधानं गतो यथा श्रीगुरुदेवोऽपि ग्रन्थमुद्रणसमापनात् प्रागेव परिनिर्व्वाणं ययौ। दुर्ज्ञेयं खलु विधानं परमेश्वरस्य।

अस्य ग्रन्थराजस्य सम्यग् मुद्रणव्ययभारः श्रीगुरोर्भक्त-शिष्यै र्निर्वाहितः। राष्ट्रात् प्रार्थितार्थानुकूल्यं किञ्चिदपि न लब्धम्। भवतु तावत् समग्रग्रन्थोऽधुना

विश्वविद्यानुशीलन-केन्द्रेषु संस्थापनेन विश्वज्ञानभाण्डारं प्रापयिष्यते। दिशि दिशि भातु भारतीरत्नम् श्रीगुरुसंकलितम्। सुदूरामेरिकेयुरोपीयाणां सुधियां करकमलेषु एष श्रीग्रन्थः शोभिष्यते तेषामप्ययं काव्यदर्शनामृतवारिधौ सुखावगाहनाय कल्पिष्यत इति चिन्तास्माकं चित्तं मोदयति। महानयं श्रीग्रन्थः प्राचीप्रतीचीहार्द्दिकभाव-विनिमयस्य तत्सम्मेलनस्य चान्यतमं द्वारं भवितेत्यस्माभिराशास्यते। जयतु भारतभारती शुभाय भवतु चास्माकं प्रयत्नः।

नमः श्रीभास्करानन्द-स्वामिने परमात्मने।
इष्टदेवाय सूर्य्याय सर्वध्वान्तनिवारिणे ॥

गुरो! पितः! समाप्तं मे कर्म्म। परारि माघीयकृष्णसप्तम्यां भवत्यकस्माद् ब्रह्मनिर्व्वाणं लब्धवति भवदनुरागिभिर्वान्धवैर्भक्तैश्च भवतो ग्रन्थराजस्य मुद्रण-प्रकाशनयोर्गुरुभारो दीनस्याज्ञानस्य मे शिरसि विन्यस्तः। अस्य समाधानं बहुदोषदुष्टमपि भवदनुकम्पया सम्पन्नं जातम्। अस्य श्रीग्रन्थस्य प्रकाशनेन मया यः कोऽप्यवसरो भवत्सेवायां निवेदितस्तत्सर्व्वं श्रीगुरुपूर्णिमावासरे मम पूजार्घ्यमिति कृपया कल्पय। एतत्कर्म्मनिरतस्य मे हृदि सर्व्वदा भवति विराजमानेऽविच्छेदं भवत्सन्निधिमद्यापि लब्धवानहम्। अतः परं भवत्सेवा-विरतस्य जराजीर्णस्य भवद्विरहतापदग्धस्य मे जीवनेनालं यदि तावच्चेतसि मे भवदनुध्यानं सन्ततं न स्यात्। अन्धकल्पस्य मे भवदनुग्रहेणैव पुनर्लब्धया स्वल्पयापि दृष्ट्या मया श्रीग्रन्थमुद्रणसंकलनं सम्भावितम्। यावज्जीवं तद्दृशोर्मेऽनुक्षणं भवच्चिन्मयरूपस्फुरणं विधाय चिरं दयस्व मामिति प्रार्थये।

श्रीश्रीगुरुपूर्णिमा
१८८३ शकाब्दाः।

श्रीगुरुचरणैकशरणस्य सेवकाधमस्य
दीनप्रकाशकस्य।

—०—

श्रीमत्स्वामि-भास्करानन्द-सरस्वतीपादेन विरचितम्

गुरुकृपाष्टकम् ।

अनादि-साधना-धनं
निजात्म-तत्त्व-बोधनम् ।
जगज्जनैक-मङ्गलं
गुरोः कृपा हि केवलम् ॥१

विमोहकाम-शासनं
त्रिताप-पाप-नाशनम् ।
तमो-विनाशि-कज्जलं
गुरोः कृपा हि केवलम् ॥२

समग्र विघ्न-वारणं
मनोनिरोध-कारणम् ।
महासुधातरोः फलं
गुरोः कृपा हि केवलम् ॥३

सुचक्र षट्क-भेदनं
स्वभक्त-चित्त-शोधनम् ।
कृतान्त-तोरणार्गलं
गुरोः कृपा हि केवलम् ॥४

परात्म-जीव-दूतिका
स्वशिष्य-भक्ति-सूतिका ।
भवाब्धि-पार-कौशलं
गुरोः कृपा हि केवलम् ॥५

पुनाति जीवनं धनं
पुनाति देहवन्धनम् ।
पुनाति सर्व्वभूतलं
गुरोः कृपा हि केवलम् ॥६

तनोति शान्ति-सम्पदं
क्षिणोति दुःखमापदम् ।
प्रदातुमीशतामलं
गुरोः कृपा हि केवलम् ॥७

यशो धनं वयो वलं
समस्तवस्तु चञ्चलम् ।
ममैकमस्तु सम्वलं
गुरोः कृपा हि केवलम् ॥८

गुरुकृपाष्टकं समाप्तम् ।

श्रीचैतन्यचरितामृतसंस्कृतपद्यानुवादः

अन्त्यलीला

सूचीपत्रम्

परिच्छेदः	बिषयः	पत्रपृष्ठसंख्या
प्रथमः	श्रीरूपसङ्गोत्सवः	१-२३
द्वितीयः	श्रीहरिदासदण्डरूपशिक्षा	२४-३७
तृतीयः	श्रीहरिदासठाकुरमहिमा	३७-५६
चतुर्थः	श्रीसनातनसङ्गोत्सवः	५६-७६
पञ्चमः	प्रद्युम्नमिश्रोपाख्यानम्	७६-६२
षष्ठः	श्रीरघुनाथदासमिलनम्	६३-११६
सप्तमः	वल्लभभट्टमिलनम्	११६-१३३
अष्टमः	भिक्षासंकोचनम्	१३३-१४१
नवमः	गोपीनाथपट्टनायकोद्धारः	१४२-१५३
दशमः	भक्तदत्तास्वादनम्	१५४-१६६
एकादशः	श्रीहरिदासनिर्य्याणम्	१६७-१७५
द्वादशः	जगदानन्दतैलभञ्जनम्	१७५-१८७
त्रयोदशः	जगदानन्दवृन्दावनगमनम्	१८७-१६८
चतुर्दशः	चटकगिरिगमने दिव्योन्मादः	१६८-२०६
पञ्चदशः	उद्यानविहारः	२१०-२२०
षोड़शः	कालिदासप्रसाद-विरहोन्मादप्रलापः	२२१-२३५
सप्तदशः	कूर्म्माकारानुभावोन्मादप्रलापः	२३६-२४४
अष्टादशः	समुद्रपतनम्	२४४-२५६
उनविंशः	विरहप्रलाप-मुखसङ्घर्षणादिवर्णनम्	२५६-२६८
विंशः	शिक्षाश्लोकार्थास्वादनम्	२६८-२८३

—०—

ॐ

श्रीमत्-स्वामी भास्करानन्द-सरस्वती



आविर्भावकालः

आषाढ़ : २१, शकाब्दाः १८१३

(২১শে আষাঢ় ১২৯৮ সাল)

(The 4th July, 1891)

तिरोभावकालः

फाल्गुन : ६, शकाब्दाः १८८१

(৬ই ফাল্গুন ১৩৬৬ সাল)

(The 19th February 1960)

श्रीलकृष्णदासकविराजप्रणीत-

श्रीचैतन्यचरितामृतस्य संस्कृतपद्यानुवादः

श्रीचैतन्यचरितामृते अन्त्यलीलायां प्रथमः परिच्छेदः

"पङ्गुं लङ्घयते शैलं मूकमावर्त्तयेच्छ्रुतिम् ।
यत्कृपा तमहं वन्दे कृष्णचैतन्य मीश्वरम् ॥१॥

दुर्गमे पथि मेऽन्धस्य स्खलत्पादगते र्मुहुः ।
स्वकृपा-यष्टिदानेन सन्तः सन्त्ववलम्वनम् ॥२॥"

सनातनश्च रूपश्च भट्टः श्रीरघुनाथकः ।
श्रीजीवो भट्टगोपालो रघुनाथश्च दासकः ॥१

इत्येषां विदधे षण्णां गुरूणां पादवन्दनम् ।
येन विघ्ना विनश्यन्ति पूर्य्यते च यथेप्सितम् ॥२

"जयतां सूरतौ पङ्गो र्मम मन्दमते र्गती ।
मत्-सर्वस्व-पदाम्भोजौ राधामदनमोहनौ ॥३॥

दीव्यद्वृन्दारण्यकल्पद्रुमाधः
श्रीमद्रत्नागारसिंहासनस्थौ ।
श्रीमद्राधाश्रीलगोविन्ददेवौ
प्रेष्ठालीभिः सेव्यमानौ स्मरामि ॥४॥

श्रीमान्रासरसारम्भी वंशीवटतटस्थितः ।
कर्षन् वेणुस्वनै र्गोपी र्गोपीनाथः श्रियेऽस्तु नः ॥५॥"

मुहुर्जयतु चैतन्यो नित्यानन्दो जयत्वलम् ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥३

संक्षेपेण प्रभोर्मध्यलीलासौ वर्णिता मया ।
भक्ताः शृणुत तस्यान्त्यलीलां सा वर्ण्यतेऽधुना ॥४

मध्येऽस्या मध्यलीलायाः पूर्वग्रन्थेऽत्र वर्णितः ।
संक्षेपादन्त्यलीलायाः सूत्राणाञ्च गणो मया ॥५
ज्ञात्वाहं जरसाग्रस्तो मृत्युं सन्निधि मागतम् ।
सूत्राण्यन्तिमलीलायाः कृतवांस्तत्र कानिचित् ॥६
पूर्वत्र लिखितग्रन्थसूत्राणा मनुसारतः ।
नालिखं यानि तान्यत्र लिखिष्यामि सविस्तरम् ॥७
श्रीमद्वृन्दावनान्नीलाचलं प्राप्तो महाप्रभुः ।
इति स्वरूपगोस्वामी वार्त्तां गौड़ेषु प्रैरयत् ॥८
ताञ्चाकर्ण्य शचीमाता भक्ताः सर्वे च नन्दिताः ।
भक्ताः सर्वे मिलित्वाथ नीलाद्रिं गन्तु मुद्यताः ॥९
कुलीनग्रामवास्तव्या भक्तास्ते खण्डवासिनः ।
आचार्य्यं श्रीशिवानन्द मुपस्थाय ततो ययुः ॥१०
पथि कुर्वन् शिबानन्दः सर्वघट्टव्यवस्थितिम् ।
वासस्थानञ्च सर्वेषां विदधत्तानपालयत् ॥११
तमेवाणुव्रजन्नासीत् सारमेयश्च कश्चन ।
भक्ष्यं दत्त्वा शिवानन्दः पालयंस्तं सहानयत् ॥१२
एकदाथ नदीपारं गन्तुं तस्मिन् समुद्यते ।
ओड्रीयो नाविको नावं नारोपयत कुक्कुरम् ॥१३
शुनि तस्मिन्ननेतव्ये शिवानन्दः सुदुःखितः ।
दशपण्या वराटानां तारयामास तं नदीम् ॥१४
विश्राम्यति शिवानन्दे घट्टे कुत्रचिदेकदा ।
भक्ष्यान्नं व्यस्मरद्दातुं सारमेयाय सेवकः ॥१५
रात्रौ भोजनकालेऽथ शिवानन्दः समागतः ।
अपृच्छत् सेवकं कच्चिदन्नं श्वा प्राप्तवानिति ॥१६
असौ न प्राप्तवानन्नमिति श्रुत्वा स दुःखितः ।
तत्क्षणात् प्रेरयामास तमन्वेष्टुं जनान् दश ॥१७

Bhaja Nitai Gour Radhe Shyam, Japa Hare Krishna Hare Ram.

अन्विष्यापि न लब्ध्वा तं प्रत्यावृत्तेषु तेषु सः ।
उपवासं शिवानन्दश्चक्रे दुःखितमानसः ॥१८

प्रातरन्विष्यमानोऽपि न प्राप्तः क्वापि कुक्कुरः ।
ततस्ते वैष्णवाः सर्वे जाता विस्मितमानसाः ॥१९

अथ व्रजन्त उत्कण्ठा-व्यग्रा नीलाचलं गताः ।
पूर्ववत् समगच्छन्त ते सर्वे प्रभुणा सह ॥२०

अथ सर्वान् समादाय जगन्नाथं विलोक्य च ।
सर्वैः सार्द्धं प्रभुश्चक्रे महाप्रसादभोजनम् ॥२१

पूर्ववत् प्रैरयत् सर्वान् स्वं स्वं वासञ्च निर्दिशन् ।
अथान्येद्यु र्गताः सर्वे सन्निधानं महाप्रभोः ॥२२

तमेव कुक्कुरं तत्र दृष्टवन्तः सविस्मयम् ।
किञ्चिदल्पतरं दूर मध्यासीनं महाप्रभोः ॥२३

प्रभुः प्रसादशस्यानि नारिकेलस्य विक्षिपन् ।
ब्रूहि कृष्ण हरे रामेत्यब्रवीच्च हसन्मुखः ॥२४

भुञ्जानः श्वापि शस्यानि कृष्णेत्यूचे मुहुर्मुहुः ।
दृष्ट्वा श्रुत्वा च तत् सर्वे बभूवु र्विस्मयान्विताः ॥२५

शिवानन्दस्तु तं दृष्ट्वा दण्डवत् प्रणमन् भुवि ।
आसीद्दैन्योक्तिभिस्तेन स्वापराधं क्षमापयन् ॥२६

अथान्येद्यु र्न केनापि कुक्कुरोऽसौ विलोकितः ।
सिद्धदेहं समाश्रित्य वैकुण्ठं प्राप्तवानसौ ॥२७

दिव्यलीलाश्चकारैवं श्रीशचीनन्दनः प्रभुः ।
कृष्णेत्युच्चारयन् श्वानमप्यमोक्षयताचिरात् ॥२८

अथेतः प्रभुणाज्ञप्तो रूपो वृन्दावनं गतः ।
नाटकं कृष्णलीलायाश्चक्रे रचयितुं मनः ॥२९

श्रीमद्वृन्दावने धाम्नि प्रारब्धं तेन नाटकम् ।
मङ्गलाचरणे नान्दीश्लोक स्तत्रैव निर्मितः ॥३०

अथ नाटकवृत्तान्तं चिन्तयंश्च व्रजन् पथा ।
साङ्केतिकानि सूत्राणि लिखितुञ्चोपचक्रमे ॥३१
एवं द्वौ भ्रातरौ गौड़देशमध्यं समागतौ ।
गौड़देशं समायातोऽनुपमो व्यसृजत्तनुम् ॥३२
ततः श्रीरूपगोस्वामी प्रतस्थे निकषा प्रभुम् ।
उत्कण्ठितमना आसीद्वीक्षितुं स महाप्रभुम् ॥३३
किन्तु सोऽनुपमस्यार्थं तत्रैव कृतवांश्चिरम् ।
भक्तानां सङ्गलाभार्थं गच्छन्नपि न चाप तान् ॥३४
उड़िष्याविषये ग्रामे सत्यभामापुराभिधे ।
गच्छन् पथा विशश्राम तत्रैकां रजनी मसौ ॥३५
रात्रौ स्वप्ने ददर्शासौ दिव्यां नारीञ्च काञ्चन ।
सा तत्-सम्मुखमागत्य कृपयैवं तमब्रवीत् ॥३६
मम वृत्तान्त मालम्ब्य रच्यतां नाटकं पृथक् ।
अपूर्वं नाटकं तत्ते भवेन्मेऽनुग्रहादिति ॥३७
अथ श्रीरूपगोस्वामी स्वप्नं दृष्ट्वा व्यतर्कयत् ।
सत्यभामादिशन्नूनं निर्मातुं नाटकं पृथक् ॥३८
मया रचित मेकत्र तद्वृत्तं व्रजलीलया ।
द्वे एव रचयिष्येते नाटके साम्प्रतं मया ॥३९
इत्येवं चिन्तयन्नेव नीलाद्रिं स ययौ द्रुतम् ।
निवासं हरिदासस्य समागच्छन्नुपस्थितः ॥४०
भूयिष्ठ मनुजग्राह तं हरिदासठक्कुरः ।
तवागमन मुक्तोऽहं प्रभुणेत्यवदच्च तम् ॥४१
प्रभोर्दिदृक्षया रूपं ज्ञात्वा सोत्कण्ठमानसम् ।
हरिदासोऽ ब्रवीत् सम्प्रत्येवात्रायास्यति प्रभुः ॥४२
उपान्न-भोगमालोक्य हरिदासं निरीक्षितुम् ।
प्रभुः प्रत्यहमागच्छत्तदाप्येतो ह्यतर्कितः ॥४३

नमन्तं दण्डवद्रूपं हरिदासो व्यजिज्ञपत् ।
मिलित्वा हरिदासेन रूपमाश्लिष्टवान् प्रभुः ॥४४
निषण्णो हरिदासेन रूपेण च कियच्चिरत् ।
पृष्ट्वा च कुशलं रूप मिष्टगोष्ठीं चकार सः ॥४५
सनातनस्य वृत्तान्तं पृष्टो गोस्वामिना ततः ।
रूपः प्रत्यवदत्तस्य न प्राप्तं दर्शनं मया ॥४६
एतो गङ्गापथेनाहं गतो राजपथेन सः ।
अतएव समं तेन नाभूत् सम्मेलनं मम ॥४७
तञ्च वृन्दावनं यान्तं प्रयागे श्रुतवानहम् ।
तनुत्यागञ्च रूपोऽथानुपमस्य न्यवेदयत् ॥४८
वासं निरूप्य रूपाय गोस्वामी प्रस्थित स्ततः ।
प्रभोस्ते सङ्गिनो भक्ताः समं रूपेण सङ्गताः ॥४९
आह्वायन् सकलान् भक्तानपरेद्यु र्महाप्रभुः ।
रूपं सङ्गमयामास सार्द्धं तैरनुकम्पया ॥५०
रूपश्च कृतवां स्तेषां सर्वेषां पादवन्दनम् ।
सर्वे ते कृपया रूपमालिलिङ्गुः पृथक् पृथक् ॥५१
नित्यानन्दं तथाद्वैतं प्रति प्रोचे महाप्रभुः ।
इमं कृपयतं रूपं कायेन मनसा युवाम् ॥५२
अस्याविर्भवताच्छक्तिः कृपया युवयोर्द्वयोः ।
यया विरचयेत् कृष्णरसभक्तिमयं जनः ॥५३
गौड़ीया उत्कलीयाश्च भक्ता आसन् प्रभोस्तु ये ।
तेषामप्यभवद्रूपः सर्वेषां स्नेहभाजनम् ॥५४
प्रभुः प्रत्यह मागच्छन् रूपेण समगच्छत ।
प्रसादं मन्दिरात् प्राप्तं ताभ्यां द्वाभ्यां प्रदत्तवान् ॥५५
इष्टगोष्ठीं कियत्कालं कृत्वा ताभ्यां महाप्रभुः ।
कर्म माध्याह्निकं कर्त्तुं वासं प्रत्यागमन्निजम् ॥५६

इत्येवं कृत आचारे प्रभुणा प्रतिवासरम् ।
लेभे निःसीम मानन्दं रूपस्तु कृपया प्रभोः ॥५७

प्रभुणाथ समं भक्तै र्गुण्डिचामार्जने कृते ।
गत्वा तै र्यूथिकोद्यानं विदधे वनभोजनम् ॥५८

हरीति ब्रुवतो भक्तान् प्रसादञ्चाश्नतोऽखिलान् ।
हरिदासश्च रूपश्च दृष्ट्वा हर्षमबापतुः ॥५६

प्रभोः प्रसादशेषं तौ गोबिन्दस्य करादुभौ ।
लब्ध्वा प्रेमामृतोन्मत्तौ प्रारभेताञ्च नर्त्तितुम् ॥६०

अन्येद्युः प्रभुरागत्य समं रूपेण सङ्गतः ।
उपविष्टोऽब्रवीद्रूपं सर्वज्ञानां शिरोमणिः ॥६१

व्रजधाम्नो वहिर्देशं कृष्णो मा नीयतां त्वया ।
कृष्णः स्थातुं न शक्नोति व्रजं सन्त्यज्य कर्हिचित् ॥६२

"तथाहि श्रीलघुभागवतामृते पूर्वखण्डे द्वात्रिंशाङ्कधृतयामलवचनम्—

कृष्णोऽन्यो यदुसम्भूतो यस्तु गोपेन्द्रनन्दनः ।
बृन्दावनं परित्यज्य स क्वचिन्नैव गच्छति ॥६॥"

इति व्याहृत्य मध्याह्नकृत्यं कर्त्तुं गते प्रभौ ।
मनसा रूपगोस्वामी प्राप्तः कञ्चन विस्मयम् ॥६३

विभिन्नं नाटकं कर्त्तुं सत्यभामादिदेश माम् ।
मन्ये तच्च पृथक् कर्त्तुं सम्प्रत्यादिष्टवान् प्रभुः ॥६४

बृत्तान्तद्वय मेकत्र नाटके रचितं पुरा ।
मयेदानीन्तु कर्त्तव्यं द्विधा तन्नाटकद्वयम् ॥६५

द्विधैव घटनीयञ्च नान्दीप्रस्तावनाद्वयम् ।
मया चिन्तायता सर्वं लिखितव्यं पृथक् पृथक् ॥६६

अथासौ रथयात्रायां जगन्नाथं विलोकयन् ।
रथाग्रे प्रभुमद्राक्षीत् कुर्वन्तं नृत्यकीर्त्तने ॥६७

नृत्यता प्रभुणा श्लोकं गीतं श्रुत्वा तदर्थकम् ।
श्लोकं श्रीरूपगोस्वामी तदैव कृतवानिति ॥६८

तत् सर्वं पूर्वमेवाहं वृत्तमाख्यातवानपि ।
भूय एव समासेन कथयिष्यामि सम्प्रति ॥६९

प्रभुः सङ्कीर्त्तने श्लोकं सामान्यं कञ्चनापठत् ।
किमर्थं पठति श्लोकमित्यवेदीन्न कश्चन ॥७०

एकः स्वरूपगोस्वामी तस्यार्थं केवलं विदन् ।
रसास्वादाय तच्छलोकानुरूपं विदधे पदम् ॥७१

ज्ञात्वा प्रभो रभिप्रायं रूपगोस्वामिना तदा ।
तथार्थेन कृतः श्लोकः प्रतिभातः प्रभो र्यथा ॥७२

"तथाहि काव्यप्रकाशे प्रथमोल्लासे चतुर्थः श्लोकः—

यः कौमारहरः स एवहि वरस्ता एव चैत्रक्षपा-
स्ते चोन्मीलित-मालती-सुरभयः प्रौढ़ाः कदम्बानिलाः ।
सा चैवास्मि तथापि तत्र सुरत-व्यापार-लीलाविधौ
रेवा-रोधसि वेतसीतरुतले चेतः समुत्कण्ठते ॥७॥"

"श्रीरूपगोस्वामिकृतः श्लोको यथा—

प्रियः सोऽयं कृष्णः सहचरि कुरुक्षेत्रमिलित-
स्तथाहं सा राधा तदिदमुभयोः सङ्गमसुखम् ।
तथाप्यन्तःखेलन्मधुर-मुरली-पञ्चमजुषे
मनो मे कालिन्दी-पुलिन-विपिनाय स्पृहयति ॥८॥"

तालपत्रे लिखित्वेमं श्लोकं न्यस्यच्छदिष्यसौ ।
अगच्छद्रूपगोस्वामी समुद्र मवगाहितुम् ॥७३

तस्मिन्नवसरे तेन सङ्गमार्थं गतः प्रभुः ।
लब्ध्वा श्लोकं छदिर्न्यस्तमारेभे पठितुं ततः ॥७४

प्रभुः श्लोकं पठन् सौख्यात् प्रेमाविष्टोऽभवद् यदा ।
तदैव रूपगोस्वामी स्नात्वा तत्र समागतः ॥७५

अवलोक्य प्रभुं रूपो दण्डवत् पतितोऽङ्गने ।
तमाहत्य चपेटेन वक्तु मारभत प्रभुः ॥७६
ममेदं हृदयं गूढ़ं कथं त्वं ज्ञातवानसि ।
इत्येवासौ ब्रुवन् रूपमालिलिङ्ग प्रभुर्द्दृढ़म् ॥७७
अथ तं श्लोकमादाय स्वरूपाय प्रदर्शयन् ।
रूपस्यैव परीक्षार्थं तमपृच्छन्महाप्रभुः ॥७८
रूपो हृदयवार्त्तां मे कथं विज्ञातवानिति ।
स्वरूपः प्रोक्तवान् मन्ये स्वयं त्वं कृतवान् कृपाम् ॥७६
अन्यथा केनचिन्नैव मर्थोऽय मुपलभ्यते ।
तर्कये त्वं कृपां तत्र पुरैव कृतवानिति ॥८०
प्रभुणोक्त मयं पूर्वं प्रयागे मिलितो मया ।
विज्ञाते योग्यपात्रेऽस्मिन् सञ्जाता करुणा मम ॥८१
ततः सञ्चारयन् शक्ति महमेन मुपादिशम् ।
त्वमप्यस्मै रसानाञ्च विशेषानुपदेक्ष्यसि ॥८२
स्वरूपोऽवोचत श्लोकं यदेमं श्रुतवानहम् ।
तदैव ज्ञातवानस्मि त्वं कृपां कृतवानिति ॥८३

"तथाहि न्यायः—

फलेन फलकारण मनुमीयते ॥६॥

तथाहि नैषधीयचरिते तृतीयसर्गे सप्तदशः श्लोकः—

स्वर्गापगा-हेममृणालिनीनां
नालामृणालाग्रभुजो भजामः ।
अन्नानुरूपां तनुरूपऋद्धिं
कार्य्यं निदानाद्धि गुणानधीते ॥१०॥"

वैष्णवाश्चतुरो मासानुषित्वा गौड़मव्रजन् ।
तत्रासीद्रूपगोस्वामी प्रभोश्चरणमाश्रयन् ॥८४

निवासे हरिदासस्य रूपे लिखति नाटकम् ।
कदाचित् समुपायातो महाप्रभुरतर्कितः ॥८५

तौ ससम्भ्रम मुत्थायापततां दण्डवद्भुवि ।
प्रभुरासनमध्यास्त समाश्लिष्याथ तावुभौ ॥८६

कं ग्रन्थं लिखसीत्युक्त्वा पत्रमेकं दधत् प्रभुः ।
दृष्ट्वा च लिखितान् वर्णां श्चेतसा सुखमन्वभूत् ॥८७

श्रीरूपस्याक्षरश्रेणी मुक्तापङ्क्ति रिवाबभौ ।
अस्तौषीदथ तान् वर्णान् प्रीतचित्तो महाप्रभुः ॥८८

तस्मिन्नेव प्रभुः पत्रे श्लोकमेकं व्यलोकत ।
वाचयन्नेव तं श्लोकं प्रेमावेशवशोऽभवत् ॥८९

"तथाहि विदग्धमाधवे प्रथमाङ्के त्रयोदशः श्लोकः—

तुण्डे ताण्डविनी रतिं वितनुते तुण्डावली-लब्धये
कर्ण-क्रोड़-कड़म्बिनी घटयते कर्णार्बुदेभ्यः स्पृहाम् ।
चेतः-प्राङ्गण-सङ्गिनी विजयते सर्वेन्द्रियाणां कृतिं
नो जाने जनिता कियद्भिरमृतैः कृष्णेति वर्णद्वयी ॥११॥"

हरिदासोऽथ तं श्लोकमाकर्ण्योल्लसितान्तरः ।
श्लोकस्यार्थं स्तुवन्नेव मारेभे नर्त्तितुं तदा ॥९०

महिमा शास्त्रसाधुभ्यः कृष्णनाम्नः श्रुतो मया ।
कुतोऽपि नेदृशो नाम-महिमा कर्णितस्त्विति ॥९१

ततो महाप्रभुस्तौ द्वौ समालिङ्ग्य पुनः पुनः ।
कर्त्तुं माध्याह्निकं स्नानं समुद्रं गतवांस्ततः ॥९२

अथान्येद्यु र्जगन्नाथ मवलोक्य महाप्रभुः ।
सार्वभौम-स्वरूपाभ्यां रामानन्देन चान्वितः ॥९३

सम्मेलनाय रूपेण समं तत्र व्रजन् पथा ।
तान् सर्वान् कथयामास श्रीरूपस्य गुणावलीम् ॥९४

द्वौ श्लोकौ वाचयंस्तस्य सम्प्राप्तः परमं सुखम् ।
अब्रवीन्निजभक्तस्य गुणान् पञ्चमुखीभवन् ॥६५

सार्वभौमं तथा रामानन्दं तत्र विशेषतः ।
परीक्षणाय रूपस्य गुणान् वक्तुं प्रचक्रमे ॥६६

भक्तानामीश्वरो दोषान्न गृह्णाति स्वभावतः ।
स्वल्पामपि प्रसन्नात्मा तत्-सेवां बहुमन्यते ॥६७

"तथाहि भक्तिरसामृतसिन्धौ दक्षिणविभागे विभावलहर्यां
सप्ततितमः श्लोकः—

भृत्यस्य पश्यति गुरूनपि नापराधान्
सेवां कृतामपि मनाग्बहुधाभ्युपैति ।
आविष्करोति पिशुनेष्वपि नाभ्यसूयां
शीलेन निर्मलमतिः पुरुषोत्तमोऽयम् ॥१२॥"

अथ भक्तैः समं प्राप्तं प्रभुमालोक्य तावुभौ ।
पादौ तस्य ववन्दाते पतन्तौ भुवि दण्डवत् ॥६८

सङ्गमय्य प्रभुर्भक्तैस्तै सार्द्धं तावुभौ जनौ ।
सर्वान् भक्तान् समादाय न्यषीदत् पिण्डकोपरि ॥६९

श्रीरूपो हरिदासश्च निषण्णौ पिण्डकादधः ।
तस्योपरि तु नारूढौ सर्वेषामग्रतश्च तौ ॥१००

आज्ञप्तः प्रभुणा रूपः श्लोकोऽसौ वाच्यतामिति ।
नासौ वाचयितुं शक्तो लज्जया जोषमाश्रयत् ॥१०१

ततः स्वरूपगोस्वामी तञ्च श्लोक मवाचयत् ।
समाकर्ण्य जनाः सर्वेऽभवन् विस्मितचेतसः ॥१०२

"तथाहि श्रीरूपगोस्वामिकृतः श्लोकः—

प्रियः सोऽयं कृष्णः सहचरि कुरुक्षेत्रमिलित-
स्तथाहं सा राधा तदिदमुभयोः सङ्गमसुखम् ।

तथाप्यन्तःखेलन्मधुर-मुरली-पञ्चम-जुषे
मनो मे कालिन्दी-पुलिन-विपिनाय स्पृहयति ॥१३॥"

अथोक्तं रायभट्टाभ्यां प्रसादेन विना तव ।
एवं ते हृदयं वेत्ति कथङ्कारमयं जनः ॥१०३

ये सिद्धान्ताः पुरा प्रोक्ताः शक्तिं सञ्चार्य्य नस्त्वया ।
न तेषा मन्त माप्नोति जातु वेधा अपि प्रभो ॥१०४

अतो ज्ञातं प्रसादं ते पुरायं प्राप्तवानिति ।
हृदयस्यानुवादस्ते नान्यथा सम्भवेदिति ॥१०५

प्रभुणोक्तं पठ श्लोकं रूप तं नाटकस्य ते ।
यमाकर्ण्य जहत्येव दुःखशोकौ जना इति ॥१०६

इत्थमाज्ञापयामास भूयोभूयः प्रभुर्यदा ।
तदा वाचयितुं रूपस्तं श्लोक मुपचक्रमे ॥१०७

"तथाहि विदग्धमाधवे प्रथमाङ्के त्रयोदशः श्लोकः—

तुण्डे ताण्डविणी रतिं वितनुते तुण्डावलीलब्धये
कर्ण-क्रोड़-कड़म्बिनी घटयते कर्णार्बुदेभ्यः स्पृहाम् ।
चेतः-प्राङ्गणसङ्गिनी विजयते सर्वेन्द्रियाणां कृतिं
नो जाने जनिता कियद्भिरमृतैः कृष्णेति वर्णद्वयी ॥१४॥"

इत्येवं श्लोक माकर्ण्य सर्वे भक्तजनाः प्रभोः ।
श्रीरामानन्दरायश्च जाताः सानन्दविस्मयाः ॥१०८

सर्वैरुक्तं श्रुता नाममहिमानोऽप्यनेकधा ।
कोऽपि वर्णयितुं नाल मित्थं मधुरता मिति ॥१०९

रायः कथितवान् मन्ये ग्रन्थः कोऽपि विरच्यते ।
वर्त्ततेऽभ्यन्तरे यस्य सिद्धान्तानामियं खनिः ॥११०

स्वरूपः प्रोक्तवान् कृष्णलीलामाश्रित्य नाटकम् ।
एष निर्मातु मेकत्र व्रजस्य च पुरस्य च ॥१११

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

लीला मारब्धवानासीदिदानीन्त्वाज्ञया प्रभोः ।
लीलाद्वयं विभज्यैव कुरुते नाटकद्वयम् ॥११२
विदग्धमाधवं नाम तथा ललितमाधवम् ।
ते प्रेमरससर्वस्वे सर्वाद्भुतमये इति ॥११३
रायः कथितवान्नान्दी-श्लोकं तावत् पठेति तम् ।
रूपो मत्वा प्रभोराज्ञां श्लोकमेव मवाचयत् ॥११४

"तथाहि विदग्धमाधवे प्रथमाङ्के प्रथमः श्लोकः—
सुधानां चान्द्रीणामपि मधुरिमोन्माददमनी
दधाना राधादिप्रणयघनसारैः सुरभिताम् ।
समन्तात् सन्तापोद्गम-विषम-संसार-सरणी-
प्रणीतां ते तृष्णां हरतु हरिलीलाशिखरिणी ॥१५॥"

रायोऽथ पृष्टवानिष्टदेववर्णन मुच्यताम् ।
पठितुं नाशकद्रूपः सङ्कोचात् प्रभुसन्निधौ ॥११५
प्रभुरादिष्टवान् ब्रूहि सङ्कोचस्ते कथं ह्रिया ।
ग्रन्थस्य ते फलं सर्वान् बैष्णवान् श्रावयेति तम् ॥११६
ततः श्रीरूपगोस्वामिप्रोक्तं श्लोकञ्च शृण्वता ।
प्रभुणोक्तमियं नूनमतिस्तुतिरभूदिति ॥११७

"तथाहि विदग्धमाधवे प्रथमाङ्के द्वितीयः श्लोकः—
अनर्पितचरीं चिरात् करुणयावतीर्णः कलौ
समर्पयितु मुन्नतोज्ज्वलरसां स्वभक्तिश्रियम् ।
हरिः पुरट-सुन्दर-द्युति-कदम्ब-सन्दीपितः
सदा हृदयकन्दरे स्फुरतु वः शचीनन्दनः ॥१६॥"

अथैवं श्लोक माकर्ण्य सर्वे भक्तास्तमब्रुवन् ।
त्वमस्मान् श्रावयन् श्लोकं कृतार्थान् कृतबानिति ॥११८
रायोऽपृच्छत् कया द्वारा पात्रं प्रावेशयद्भवान् ।
रूपः प्रत्यवदत् कालसाम्यान्नाम प्रवर्त्तकम् ॥११९

"तथाहि नाटकचन्द्रिकायां द्वादशः श्लोकः—

आक्षिप्तः कालसाम्येन प्रवेशः स्यात् प्रवर्त्तकम् ॥१७॥

यथा विदग्धमाधवे प्रथमाङ्के दशमः श्लोकः—

सोऽयं वसन्तसमयः समियाय यस्मिन्
पूर्णं तमीश्वर मुपोढ़नवानुरागम् ।
गूढ़ग्रहा रुचिरया सह राधयासौ
रङ्गाय सङ्गमयिता निशि पौर्णमासी ॥१८॥"

रायः प्रोवाच शुश्रूषे ब्रूहि प्ररोचनादिकम् ।
रूपो विज्ञाय शुश्रुषां प्रभो रेवमवोचत ॥१२०

"तथाहि विदग्धमाधवे प्रथमाङ्केऽष्टमः श्लोकः—

भक्ताना मुदगादनर्गलधियां वर्गो निसर्गोज्ज्वलः
शीलैः पल्लवितः स वल्लवबधूबन्धोः प्रबन्धोऽप्यसौ ।
लेभे चत्वरताञ्च ताण्डवविधेर्वृन्दाटवीगर्भभू-
र्मन्ये मद्विधपुण्यमण्डलपरीपाकोऽयमुन्मीलति ॥१९॥

तथा तत्रैव षष्ठः श्लोकः—

अभिव्यक्ता मत्तः प्रकृतिलघुरूपादपि बुधा
विधात्री सिद्धार्थान् हरिगुणमयी वः कृतिरियम् ।
पुलिन्देनाप्यग्निः किमु समिध मुन्मथ्य जनितो
हिरण्यश्रेणीनामपहरति नान्तःकलुषताम् ॥२०॥"

रायोऽथ पृष्टवान् प्रेमोत्पत्तिकारण मुच्यताम् ।
श्रीरूपः पूर्वरागञ्च विकारं चेष्टितानि च ॥१२१
कामलेखादिकं सर्वं प्रत्यवादीद् यथाक्रमम् ।
तथाकर्ण्य प्रभोर्भक्ताः सर्वेऽभूवं श्चमत्कृताः ॥१२२

"रागोत्पत्तिहेतुर्यथा तत्रैव द्वितीयाङ्केऽष्टमः श्लोकः—

एकस्य श्रुतमेव लुम्पति मतिं कृष्णेति नामाक्षरं
सान्द्रोन्मादपरम्परा मुपनयत्यन्यस्य वंशीकलः ।

एष स्निग्धघनद्युति र्मनसि मे लग्नः पटे वीक्षणात्
कष्टं धिक् पुरुषत्रये रतिरभून्मन्ये मृतिः श्रेयसी ॥२१॥

तथा तत्रैव सप्तमः श्लोकः—

इयं सखि सुदुःसाध्या राधाहृदयवेदना ।
कृता यत्र चिकित्सापि कुत्सायां पर्य्यवस्यति ॥२२॥

तथा तत्रैव त्रयस्त्रिंशः श्लोकः—

धरिअ पड़िच्छन्दगुणं सुन्दर महृ मन्दिरे तुमं वससि ।
तह तह रुन्धसि वलिअं जह जह चइआ पलाएह्मि ॥२३॥

तत्रैब चतुर्दशः श्लोकः—

अग्रे वीक्ष्य शिखण्डखण्डमचिरादुत्कम्पमालम्बते
गुञ्जानान्तु विलोकनान्मुहुरसौ सास्रं परिक्रोशति ।
नो जाने जनयन्नपूर्वनटनक्रीड़ाचमत्कारितां
बालायाः किल चित्तभूमिमविशत् कोऽयं नवीनग्रहः ॥२४॥

तत्रैव षट्चत्वारिंशः श्लोकः—

अकारुण्यः कृष्णो यदि मयि तवागः कथमिदं
मुधा मा रोदी र्मे कुरु परमिमामुत्तरकृतिम् ।
तमालस्य स्कन्धे सखि कलितदोर्वल्लरिरियं
यथा बृन्दारण्ये चिरमविचला तिष्ठति तनुः ॥२५॥"
पृष्टं रायेण भावानां स्वभावः कथ्यतामिति ।
रूपेणोक्त मिमे भावाः श्रीकृष्णविषया इति ॥१२३

"तथाहि तत्रैव सप्तदशः श्लोकः—

पीड़ाभि र्नव-कालकूट-कटुता-गर्वस्य निर्वासनो
निःस्यन्देन मुदां सुधा-मधुरिमाहङ्कारसङ्कोचनः ।
प्रेमा सुन्दरि नन्दनन्दन-परो जागर्त्ति यस्यान्तरे
ज्ञायन्ते स्फुटमस्य वक्र-मधुरा स्तेनैव विक्रान्तयः ॥२६॥"

राय: कथितवान् ब्रूहि सहज प्रेमलक्षणम् ।
रूपगोस्वामिना प्रेमधर्मः सहज औच्यत ॥१२४

"तथाहि तत्रैव पञ्चमाङ्के तृतीयः श्लोकः—

स्तोत्रं यत्र तटस्थतां प्रकटयच्चित्तस्य धत्ते व्यथां
निन्दापि प्रमदं प्रयच्छति परीहासश्रियं बिभ्रती ।
दोषेण क्षयितां गुणेन गुरुतां केनाप्यनातन्वती
प्रेम्णः स्वारसिकस्य कस्यचिदियं विक्रीड़ति प्रक्रिया ॥२७॥"

"रागपरीक्षार्थमुपेक्षां कृत्वा श्रीकृष्णस्य पश्चात्तापो यथा—
तत्रैव द्वितीयाङ्के चत्वारिंशः श्लोकः—

श्रुत्वा निष्ठुरतां ममेन्दु-वदना प्रेमाङ्कुरं भिन्दती
स्वान्ते शान्तिधुरां विधाय विधुरे प्रायः पराञ्चिष्यति ।
किंवा पामर-काम-कार्मुक-परित्रस्ता विमोक्ष्यत्यसून्
हा मौग्ध्यात् फलिनी मनोरथलता मृद्वी मयोन्मूलिता ॥२८॥

तत्रैव एकचत्वारिंशः श्लोकः—

यस्योत्सङ्गसुखाशया शिथिलिता गुर्वी गुरुभ्यस्त्रपा
प्राणेभ्योऽपि सुहृत्तमाः सखि तथा यूयं परिक्लेशिताः ।
धर्मः सोऽपि महान्मया न गणितः साध्वीभिरध्यासितो-
धिग् धैर्य्यं तदुपेक्षितापि यदहं जीवामि पापीयसी ॥२९॥

तत्रैव पञ्चचत्वारिंशः श्लोकः—

गृहान्तः खेलन्त्यो निजसहजबाल्यस्य बलना-
दभद्रं भद्रं वा किमपि नहि जानीमहि मनाक् ।
वयं नेतुं युक्ताः कथमशरणां कामपि दशां
कथं वा न्याय्या ते प्रथयितु मुदासीनपदवी ॥३०॥

तथा तत्रैव सप्तत्रिंशः श्लोकः—

अन्तः क्लेश-कलङ्किताः किल वयं यामोऽद्य याम्यां पुरीं
नायं वञ्चनसञ्चयप्रणयिनं हासं तथाप्युज्झति ।

अस्मिन् सम्पुटिते गभीरकपटै राभीरपल्लीविटे
हा मेधाविनि राधिके तव कथं प्रेमा गरीयानभूत् ॥३१॥

तथा तत्रैव तृतीयाङ्केऽष्टमः श्लोकः—

हित्वा दूरे पथि धवतरो रन्तिकं धर्मसेतो-
र्भङ्गोदग्रा गुरुशिखरिणं रंहसा लङ्घयन्ती ।
लेभे कृष्णार्णव नवरसा राधिकावाहिनी त्वां
वाग्वीचीभिः किमिव विमुखीभावमस्यास्तनोषि ॥३२॥"

रायः कथितवान् बृन्दावन-वेणुकलस्वनान् ।
राधा-कृष्ण-स्वरूपञ्च कथं वर्णितवानसि ॥१२५
उदीरय कवित्वं ते श्रृण्वन्नस्मि चमत्कृतः ।
इति श्रुत्वा नमस्कुर्वन् रूपः प्रोचे यथाक्रमम् ॥१२६

"यथा विदग्धमाधवे प्रथमाङ्क ऊनविंशः श्लोकः—

सुगन्धौ माकन्द-प्रकर-मकरन्दस्य मधुरे
विनिस्यन्दे वन्दीकृत-मधुपबृन्दं मुहुरिदम् ।
कृतान्दोलं मन्दोन्नतिभिरनिलैश्चन्दनगिरे-
र्ममानन्दं वृन्दाविपिन मतुलं तुन्दिलयति ॥३३॥

तथा तत्रैव विंशः श्लोकः—

वृन्दावनं दिव्यलतापरीतं लताश्च पुष्पस्फुरिताग्रभाजः ।
पुष्पाणि च स्फीत-मधुव्रतानि मधुव्रताश्च श्रुतिहारिगीताः ॥३४॥

तथा तत्रैव सप्तविंशः श्लोकः—

क्वचिद्भृङ्गीगीतं क्वचिदनिल-भङ्गी-शिशिरता
क्वचिद्वल्लीलास्यं क्वचिदमल-मल्ली-परिमलः ।
क्वचिद्धाराशाली करकफलपालीरसभरो
हृषीकाणां बृन्दं प्रमदयति वृन्दावनमिदम् ॥३५॥

"मुरली यथा, तत्रैव तृतीयाङ्के प्रथमः श्लोकः—

परामृष्टाङ्गुष्ठत्रयमसितरत्नैरुभयतो
वहन्ती सङ्कीर्णौ मणिभिररुणैस्तत्परिसरौ ।
तयोर्मध्ये हीरोज्ज्वल-विमल-जाम्बूनदमयी
करे कल्याणीयं विहरति हरेः केलिमुरली ॥३६॥

तथा तत्रैव पञ्चमाङ्के पञ्चदशः श्लोकः—

सद्वंशतस्तव जनिः पुरुषोत्तमस्य
पाणौ स्थिति मुंरलिके सरलासि जात्या ।
कस्मात्त्वया वत गुरो विंषमा गृहीता
गोपाङ्गनागण-विमोहन-मन्त्र-दीक्षा ॥३७॥

तथा तत्रैव चतुर्थाङ्केऽष्टमः श्लोकः—

सखि मुरलि विशाल-च्छिद्र-जालेन पूर्णा
'लघु रतिकठिना त्वं नीरसा ग्रन्थिलासि ।
तदपि भजसि शश्वच्चुम्बनानन्दसान्द्रं
हरिकरपरिरम्भं केन पुण्योदयेन ॥३८॥

तथा तत्रैव प्रथमाङ्के त्रयोविंशः श्लोकः—

रुन्धन्नम्बुभृतश्चमत्कृतिपरं कुर्वन्मुहुस्तुम्बुरुं
ध्यानादन्तरयन् सनन्दनमुखान् बिस्मापयन् वेधसम् ।
औत् सुक्यावलिभि र्वलिं चटुलयन् भोगीन्द्रमाघूर्णयन्
भिन्दन्नण्ड-कटाह-भित्ति मभितो बभ्राम वंशीध्वनिः ॥३९॥"

तथा तत्रैव चतुर्दशः श्लोकः—

अयं नयन-दण्डित-प्रवरपुण्डरीक-प्रभः
प्रभाति नव-जागुड़-द्यु ति-विड़म्बि-पीताम्बरः ।
अरण्यज-परिष्क्रिया-दमित-दिव्यवेशादरो
हरिन्मणि-मनोहर-द्यु तिभिरुज्ज्वलाङ्गो हरिः ॥४०॥

तथा ललितमाधरे चतुर्थाङ्के सप्तविंशः श्लोकः—

जङ्घाधस्तटसङ्गि-दक्षिणपदं किञ्चिद्विभुग्न-त्रिकं
साचि-स्तम्भित-कन्धरं सखि तिरः-सञ्चारि-नेत्राञ्चलम्।
वंशीं कुट्‌मलिते दधान मधरे लोलाङ्गुलीसङ्गतां
रिङ्गद्‌भ्रू-भ्रमरं वराङ्गि परमानन्दं पुरः स्वीकुरु ॥४१॥

तथा तत्रैव प्रथमाङ्के पञ्चचत्वारिंशः श्लोकः—

कुलवरतनु-धर्मग्रावबृन्दानि भिन्दन्
सुमुखि निशितदीर्घापाङ्ग-टङ्क-च्छटाभिः।
युगपदयमपूर्वः कः पुरो विश्वकर्मा
मरकतमणिलक्षैर्‌ गोष्ठकक्षां चिनोति ॥४२॥

तथा तत्रैव द्विचत्वारिंशः श्लोकः—

नवाम्बुधर-मण्डली-मद-विड़म्बि-देहद्यु ति-
व्रजेन्द्र-कुल-चन्द्रमाः स्फुरति कोऽपि नव्यो युवा।
सखि स्थिर-कुलाङ्गना-निकर-नीविबन्धार्गल-
च्छिदाकरण-कौतुकी जयति यस्य वंशीध्वनिः ॥४३॥

तथा विदग्धमाधवे प्रथमाङ्केऽष्टाविंशः श्लोकः—

वलादक्ष्णोर्लक्ष्मीः कवलयति नव्यं कुवलयं
मुखोल्लासः फुल्लं कमलवन मुल्लङ्घयति च।
दशां कष्टामष्टापदमपि नयत्याङ्गिकरुचि
र्विचित्रं राधायाः किमपि किल रूपं विलसति ॥४४॥

तथा तत्रैव पञ्चमाङ्केऽष्टादशः श्लोकः—

विधुरेति दिवा विरूपतां शतपत्रं वत शर्वरीमुखे।
इति केन सदा श्रियोज्ज्वलं तुलना मर्हति मत्‌प्रियाननम् ॥४५॥

तथा तत्रैव द्वितीयाङ्के पञ्चाशः श्लोकः—

प्रमदरसतरङ्गस्मेरगण्डस्थलायाः
स्मरधनुरनुबन्धिभ्रूलतालास्यभाजः।

मदकलचलभृङ्गीभ्रान्तिभङ्गीं दधानो
हृदय मिद मदाङ्क्षीत् पक्ष्मलाक्ष्याः कटाक्षः ॥४६॥"
रायः प्रोचे कवित्वं ते सुधाधारेव राजते ।
नाटकस्य द्वितीयस्य नान्दीश्लोक मुदीरय ॥१२७
रूपः प्रत्यवदत् क्व त्वं सहस्रांशुसमप्रभः ।
क्वाहं क्षुद्रतम-ज्योतिर्लेश-खद्योत-सन्निभः ॥१२८
तवाग्रे धृष्टता नूनं मुखव्यादानमेव मे ।
इत्युदीर्य्य स तन्नान्दीश्लोकव्याख्यामुदैरयत् ॥१२६

"तथा ललितमाधवे प्रथमाङ्के प्रथमः श्लोकः—
सुररिपु-सुदृशामुरोज-कोकान् मुखकमलानि च खेदयन्नखण्डः ।
चिर मखिलसुहृच्चकोरनन्दी दिशतु मुकुन्दयशःशशी मुदं वः ॥४७॥"
रायोऽजिज्ञासताभीष्टदेवस्तोत्र मुदीरय ।
रूपस्तु हृदि सकोचं प्राप्य वक्तुं प्रचक्रमे ॥१३०

"तथा तत्रैव प्रथमाङ्के तृतीयः श्लोकः—
निज-प्रणयितासुधा मुदयमाप्नुवन् यः क्षितौ
किरत्यल मुरीकृतद्विजकुलाधिराजस्थितिः ।
स लुञ्चिततमस्तति मंम शचीसुताख्यः शशी
वशीकृतजगन्मनाः किमपि शर्म विन्यस्यतु ॥४८॥"
इत्याकर्ण्य समुल्लासहृष्टचेता अपि प्रभुः ।
रोषाभासं वहिष्कुर्वन् किञ्चिदेवम भाषत ॥१३१
क्व ते कृष्णरसैः पूर्णः काव्यपीयूषसागरः ।
कथं मिथ्यास्तुतिक्षारविन्दुः क्षिप्तस्तमन्तरा ॥१३२
रायोऽब्रूत सुधापूरो रूपस्य वचनं ध्रुवम् ।
कर्पूरविन्दु मेवैकं तन्मध्ये न्यस्तवानयम् ॥१३३
प्रभुः प्रत्युक्तवान् राय त्वमनेनापि मोदसे ।
यच्छ्रुत्वा जायते लज्जा जनाश्चोपहसन्ति यत् ॥१३४

रायेनोक्त मिदं श्रुत्वा प्राप्नुवन्ति सुखं जनाः ।
मङ्गलाचरणेऽभीष्टदेवस्य युज्यते स्तुतिः ॥१३५
रूपमूचे स पात्रस्य केनाङ्गेन प्रवेशनम् ।
तच्छ्रुत्वा रूपगोस्वामी सविशेषं तदब्रवीत् ॥१३६

"तथाहि ललितमाधवे प्रथमाङ्के दशमः श्लोकः—

नटता किरातराजं निहत्य रङ्गस्थले कलानिधिना ।
समये तेन विधेयं गुणवति ताराकरग्रहणम् ॥४६॥"

इदमामुखविध्यङ्गं नाम्नोद्घात्यक उच्यते ।
इत्येवं कथयन् धार्ष्ट्यं लोलयामि तवाग्रतः ॥१३७

"तल्लक्षणं यथा साहित्यदर्पणे षष्ठपरिच्छेदे—

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स उद्घात्यक उच्यते ॥५०॥"

रायोऽकथयदङ्गानां विशेषं वर्णयाग्रतः ।
श्रीरूपोऽवर्णयत् किञ्चित् समासेन समुद्दिशन् ॥१३८

"तथाहि ललितमाधवे प्रथमाङ्के द्वाविंशः श्लोकः—

ह्रिय मवगृह्य गृहेभ्यः कर्षति राधां वनाय या निपुणा ।
सा जयति निसृष्टार्था वरवंशजकाकली दूती ॥५१॥

तथा तत्रैव प्रथमाङ्क एकविंशः श्लोकः—

हरिमुद्दिशते रजोभरः पुरतः सङ्गमयित्यमुं तमः ।
व्रजवामदृशां न पद्धतिः प्रकटा सर्व्वदृशः श्रुते रपि ॥५२॥

तथा तत्रैव द्वितीयाङ्क एकादशः श्लोकः—

सहचरि निरातङ्कः कोऽयं युवा मुदिरद्युति-
र्व्रजभुवि कुतः प्राप्तो माद्यन्मतङ्गजविभ्रमः ।
अहह चटुलैरुत्सर्पद्भि र्दृगञ्चलतस्करै
र्मम धृतिधनं चेतःकोषाद् विलुण्ठयतीह यः ॥५३॥

तथा तत्रैव द्वितीयाङ्के दशमः श्लोकः—

विहार-सुरदीर्घिका मम मनःकरीन्द्रस्य या
विलोचन-चकोरयोः शरदमन्दचन्द्रप्रभा ।
उरोऽम्बरतटस्य चाभरण-चारुतारावली
मयोन्नतमनोरथैरियमलम्भि सा राधिका ॥५४॥"

इत्याकर्ण्यावदद्रायः श्रीमहाप्रभुपादयोः ।
रूपस्य कवितां स्तौमि सहस्रेण मुखैरिव ॥१३६
इदं खल्वमृत-स्रोतो न कवित्वं भवेदिदम् ।
युक्तं सिद्धान्तसारैश्च सर्वैर्नाटकलक्षणैः ॥१४०
पारिपाट्य मिह प्रेम्णो वर्णितं परमाद्भुतम् ।
शृण्वतो जायते चित्तकर्णयो र्हर्षघूर्णनम् ॥१४१

"तथाहि प्राचीनकृतः श्लोकः—

किं काव्येन कवेस्तस्य किं काण्डेन धनुष्मतः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥५५॥"

तव शक्तिं विना नैवं वाणी जीवस्य सम्भवेत् ।
स्वशक्त्या वाचयस्येतं त्वमेवेत्यनुमीयते ॥१४२
प्रभुणोक्तं प्रयागेऽयं मया सम्मिलितोऽभवत् ।
तदैवाहं गुणैरस्य जातः सन्तुष्टमानसः ॥१४३
मधुरोऽयं प्रसङ्गोऽस्य काव्यं सालङ्कृति स्वतः ।
इत्थं विना कवित्वेन न स्फुरन्ति रसाः क्वचित् ॥१४४
यूयं सर्वे प्रदत्तास्मै कृपयैवं वरं यथा ।
वर्णयेद् व्रजलीलायां सदा प्रेमरसायनम् ॥१४५
नाम्ना सनातनो योऽसावस्य ज्येष्ठः सहोदरः ।
न कश्चित् तत्समो विज्ञप्रवरोऽस्तीह भूतले ॥१४६
यथा ते विषयत्यागे रीति स्तस्यापि सा तथा ।
तत्रैव दैन्य-वैराग्य-पाण्डित्यानि चकासति ॥१४७

मयैव प्रेरितौ बृन्दावन मेतौ सहोदरौ ।
भक्तिशास्त्रप्रचाराय स्वशक्तिं ददता ततः ॥१४८
रायेणोक्तं भवानीशो यदाकाङ्क्षति तद्भवेत् ।
अलं पुत्तलिकां दारुमयीं नर्त्तयितुं भवान् ॥१४६
यान् रसान् मन्मुखेनैव भवान् प्राचारयत्तदा ।
तान् सर्वानेव पश्यामि लिखनेऽत्रास्य सम्प्रति ॥१५०
वाञ्छा व्रजरसव्यक्तौ तव भक्तानुकम्पया ।
यं कारयसि कुर्य्यात् स विश्वं वश्यं यतस्तव ॥१५१
आशिश्लेष ततो रूपं प्रेम्णा श्रीमन्महाप्रभुः ।
अकारयच्च तेनापि सर्वेषां पादवन्दनम् ॥१५२
समालिङ्गन्नथाद्वैतनित्यानन्दादयोऽपि तम् ।
श्रीरूपं निखिला भक्ताः कृपाविष्टेन चेतसा ॥१५३
प्रभोस्ताञ्च कृपां रूपे तथा तस्य च सद्गुणान् ।
परिलक्ष्य जनाः सर्वे जाता विस्मितमानसाः ॥१५४
गृहीत्वा सकलान् भक्तांस्ततो याते महाप्रभौ ।
श्रीरूपं गाढ़ माश्लिष्यद्धरिदासश्च ठाकुरः ॥१५५
उक्तोऽसौ हरिदासेन सीमा भाग्यस्य नास्ति ते ।
त्वया यद्वर्णितं सर्वं महत्त्वं तस्य वेत्ति कः ॥१५६
प्रत्युवाचाथ तं रूपो नाहं जानामि किञ्चन ।
वचो वच्मि तदेवाहं यद्वाचयति मां प्रभुः ॥१५७

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे सामान्यभक्ति-
लहर्य्यां द्वितीयः श्लोकः—

हृदि यस्य प्रेरणया प्रवर्त्तितोऽहं वराकरूपोऽपि ।
तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य ॥५६॥"

इत्थं कृष्णकथा-रङ्ग-प्रसङ्गोत्सव-सङ्गतौ ।
श्रीरूपो हरिदासश्च कालं तौ निन्यतुः सुखम् ॥१५८

उषित्वा चतुरो मासान् सर्वे भक्ता महाप्रभोः ।
प्रतिप्रस्थापिता स्तेन गौड़देशं ययुस्ततः ॥१५६
रूपो नीलाचले तस्थौ प्रभुपादौ समाश्रयन् ।
सानन्दं दोललीलां स ददर्श प्रभुणा सह ॥१६०
अथ श्रीदोललीलान्ते रूपमाज्ञापयत् प्रभुः ।
शक्तिं सञ्चारयंस्तस्मिन् स्वप्रसादेन भूयसा ॥१६१
इतो वृन्दावनं गच्छ तत्र वासं विधत्स्व च ।
श्रीसतातनमप्यत्र सकृत् सम्प्रेरयिष्यसि ॥१६२
निरूप्यन्तां व्रजं गत्वा रसशास्त्राणि च त्वया ।
लुप्ततीर्थानि सर्वाणि प्रकाश्यन्ताञ्च यत्नतः ॥१६३
रसभक्तिं तथा कृष्णसेवनं त्वं प्रचारय ।
तत्राहमपि यास्यामि सकृत्तत्तद्विलोकितुम् ॥१६४
इत्येवं ब्रुवता श्रीमत्प्रभुणालिङ्गितस्तदा ।
शिरसा रूपगोस्वामी जग्राह चरणौ प्रभोः ॥१६५
यात्रानुज्ञां गृहीत्वासौ भक्तेभ्योऽपि महाप्रभोः ।
पुन गौंड़पथेनैव श्रीवृन्दावन मागमत् ॥१६६
एतावत् कथितं भूयो रूपेण मिलनं प्रभोः ।
य इदं शृणुयात् सोऽयं विन्देत् पादौ महाप्रभोः ॥१६७
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
कृष्णदासः स आह श्रीचैतन्यचरितामृतम् ॥१६८

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे श्रीरूपसङ्गोत्सवो नाम
प्रथमः परिच्छेदः ।

—०—

अन्त्यलीलायां द्वितीयः परिच्छेदः

"वन्देऽहं श्रीगुरोः श्रीयुतपदकमलं श्रीगुरून् वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम्।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यदेवं
श्रीराधाकृष्णपादान् सहगणललिताश्रीविशाखान्वितांश्च ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वलम्।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१

अवतारोऽभवद् गौर उद्धर्त्तुं निखिलान् जनान्।
जीवान्निस्तारयामास त्रिधोपायै महाप्रभुः ॥२

साक्षाद्दर्शनमावेशो भक्ते योग्यतमेऽथवा।
कुत्रचित् स्वयमेवाविर्भवनं वाभवत् प्रभोः ॥३

प्रायेणोद्धारिताः सर्वे साक्षात् सन्दर्शनाद्भुवि।
आवेशोऽस्याभवद्देहे नकुलब्रह्मचारिणः ॥४

नृसिंहानन्द-प्रद्युम्नं निकषा विर्बभूव सः।
ईश्वरस्य स्वभावो हि लोकनिस्तारणं परम् ॥५

साक्षाद्दर्शयतात्मानं तेन निस्तारितं जगत्।
ईक्षाञ्चक्रे सकृद् यस्तं स कृतार्थोऽभवत्तदा ॥६

गौड़देशात् समागत्य तद्भक्ताः प्रतिवत्सरम्।
प्रभुणा मिलिता भूयः स्वदेशाय प्रतस्थिरे ॥७

नानादेशागताश्चान्ये जगन्नाथं विलोक्य ते।
चैतन्यचरणौ दृष्ट्वा लेभिरे चरितार्थताम् ॥८

ये सप्तद्वीपवास्तव्या नवखण्डनिवासिनः।
ये पुनर्देवगन्धर्वा नरवेशेन चागताः ॥९

अवलोक्य प्रभुं सर्वे ययुर्भूत्वा च वैष्णवाः।
ननृतुः कृष्णः इत्युक्त्वा ते प्रेमाविष्टचेतसः ॥१०

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

तेनेत्थं दर्शनेनैव तारितेऽपि जगत्त्रये ।
न ये संसारिणः केचित्तमुपेतु मशक्नुवन् ॥११
तान् सर्वान् प्रभुरुद्धर्त्तु-कामो देशेषु तेष्वपि ।
जीवानां योग्यभक्तानां देहेष्वावेश मादधे ॥१२
तेषु प्रकाशयामास शक्तिं जीवेष्वसौ निजाम् ।
बभूवु दर्शनात्तेषां सर्वे देशाश्च वैष्णवाः ॥१३
आवेशेन च तेनैवं तारितं भुवनत्रयम् ।
गौड़े दिग्दर्शनं तस्यावेशस्य कथ्यते मया ॥१४
नकुलब्रह्मचारीति सन्निधावम्बिकापुरः ।
महतीं योग्यतां प्राप्तः सोऽभूत् परमवैष्णवः ॥१५
मानवान् गौड़देशस्थान् समुद्धर्त्तुमनाः प्रभुः ।
नकुलस्य हृदि स्वस्य तदावेशं समादधे ॥१६
ग्रहग्रस्त इव प्रेमाविष्टोऽसौ नकुलस्तदा ।
उन्मत्तोऽहसदक्रन्ददनृत्यच्च जगौ पुनः ॥१७
स्तम्भ-स्वेदाश्रु-कम्पैश्च विकारैः सात्त्विकैर्युतः ।
सदा मुहुर्मुहुः प्रेम्णा सहुङ्कारं ननर्त्त सः ॥१८
गौरकान्ति र्यथा तस्य प्रेमावेशस्तथाभवत् ।
तं द्रष्टुं गौड़देशीया जनाः सर्वे समागताः ॥१९
उच्यतां कृष्णनामेति सोऽवदत्तान् ददर्श यान् ।
प्रेमोन्मत्ता बभूवुस्ते जनास्तस्यैव दर्शनात् ॥२०
चैतन्यस्य तथावेशं नकुलस्य कलेवरे ।
श्रुत्वायातः शिवानन्दः सन्दिहानमनास्तदा ॥२१
यदा तस्य परीक्षार्थ मिच्छा जातास्य चेतसि ।
वहिरेव तदा तिष्ठन्नसावेवं व्यतर्कयत् ॥२२
आह्वयिष्यति यद्येष स्वयं मामत्रसंस्थितम् ।
मदीयाभीष्टमन्त्रञ्च ज्ञात्वा वक्ष्यति चेत् स्वयम् ॥२३

चैतन्यस्य तदावेशं ज्ञास्याम्यस्मिन्नसंशयम् ।
इति ध्यायन् शिवानन्दस्ततो दूर मधिष्ठितः ॥२४
असंख्या जनता तत्र ययुः केऽप्याययुस्ततः ।
न केचिज्जनसंघट्टाद्दर्शनं तस्य लेभिरे ॥२५
ब्रह्मचारी ततः प्रोचे शिवानन्दोऽस्ति दूरतः ।
जनै र्द्विचतुरै र्गत्वा स मामानीयता मिति ॥२६
ते शिवानन्द इत्युच्चैः प्रोच्याधावन् समन्ततः ।
अत्र कोऽसि शिवानन्दाहूयसे ब्रह्मचारिणा ॥२७
इत्याकर्ण्य शिवानन्दसेनः सानन्दमानसः ।
तमुपेत्य नमस्कुर्वन्निकषा तमुपाविशत् ॥२८
ब्रह्मचारी तमूचेऽथ यत्र सन्दिग्धवानसि ।
निश्चयेन ब्रवीमि त्वां तदेकाग्रमनाः शृणु ॥२९
इष्ट-श्रीगौरगोपाल-मन्त्रस्ते चतुरक्षरः ।
हृदि तिष्ठन्नविश्वास स्त्वयातो मुच्यता मिति ॥३०
ततोऽजायत विश्वासः शिवानन्दस्य चेतसि ।
तस्मिन् भक्तिं चकारासौ बहुमानपुरःसरम् ॥३१
प्रभावोऽचिन्तनीयोऽयमित्थमेव महाप्रभोः ।
अधुना श्रूयतामाविर्भावस्तस्याभवद् यथा ॥३२
श्रीशचीमन्दिरे तद्वन्नित्यानन्दस्य नर्त्तने ।
भवने राघवस्याथ श्रीवासस्य च कीर्त्तने ॥३३
स्थानेष्वेषु चतुर्ष्वाविर्बभूव श्रीप्रभुः सदा ।
सहजातस्वभावेन प्रेमाविष्टोऽभवत् प्रभुः ॥३४
आविर्भूय यथैवासौ नृसिंहानन्दसन्निधौ ।
कृतवान् भोजनं तच्च श्रूयतामवधानतः ॥३५
नाम्ना श्रीकान्तसेनोऽभूच्छिवानन्दस्वसुः सुतः ।
सोऽति सौभाग्यवानासीत् कृपयैव महाप्रभोः ॥३६

प्रथमं सोऽयमेकाकी वर्षे कस्मिन्नपि प्रभुम् ।
दिदृक्षमाण आगच्छदुत्कण्ठाव्यग्रमानसः ॥३७
महाप्रभु रमुं दृष्ट्वा कृतवान्महतीं कृपाम् ।
असौ मासद्वयं तत्र न्यवसत् प्रभुसन्निधौ ॥३८
प्रस्थातुं तञ्च गौड़ाय प्रभुराज्ञापयत्ततः ।
भक्तान्निषेधयामास तेनात्रागमनं प्रति ॥३६
तत्रैवाहं गमिष्यामि स्वयमेवात्र वत्सरे ।
मिलिष्यामि तथा सर्वैस्तत्राद्वैतादिभिः सह ॥४०
अथ ब्रूहि शिवानन्दं पौषे मासीह भाविनि ।
अवश्यमेव यास्यामि निकषा तमतर्कितः ॥४१
तत्रास्ते जगदानन्दो भिक्षां मे सोऽपि दास्यति ।
कोऽपि नायातु वर्षेऽस्मिन्निति सर्वान्निवेदय ॥४२
श्रीकान्तो गौड़मागत्य सन्देशं तं व्यजिज्ञपत् ।
तमाकर्ण्याभवन् भक्ताः सर्वे सानन्दमानसाः ॥४३
तत्र यात्रोद्यतोऽप्यासीदाचार्य्यः स्थितिमाश्रयत् ।
प्रतीक्ष्य जगदानन्द-शिवानन्दौ प्रभुं स्थितौ ॥४४
पौषमासागमे पुञ्जीकृत-द्रव्यसमुच्चयौ ।
तावुभाववतस्थाते सायं पर्य्यन्त मन्वहम् ॥४५
तन्मास्येव मतीतेऽपि गोस्वामिनि च नागते ।
दुःखितौ जगदानन्द-शिवानन्दौ बभूवतुः ॥४६
अकस्मादागतस्तत्र नृसिंहानन्द एकदा ।
उभाभ्यां सङ्गतस्ताभ्या मासने चोपवेशितः ॥४७
उपलभ्य तयोर्दुःखं नृसिंहानन्द उक्तवान् ।
कथमद्य निरानन्दौ युवां पश्याम्युभाविति ॥४८
ततस्तञ्च शिवानन्दः सर्वं वृत्तान्त मब्रवीत् ।
प्रभुः स्वागममाज्ञाप्य कथं नागतवानिति ॥४६

तच्छ्रुत्वा ब्रह्मचारी तौ प्रोचे सन्तुष्यतं युवाम् ।
अहं तावत्तृतीयेऽह्नि तमानेष्यामि निश्चितम् ॥५०
प्रेमाणञ्च प्रभावञ्च तस्य विविदतुश्च तौ ।
प्रभुरानेष्यतेऽनेनेत्यास्तां निश्चितमानसौ ॥५१
प्रद्युम्न-ब्रह्मचारीति तस्य नामाभवन्निजम् ।
नृसिंहानन्द इत्याख्यां तस्मै गौरप्रभुर्ददौ ॥५२
ततो दिनद्वयं ध्यायन् स शिवानन्द मब्रवीत् ।
अह मानीतवान् पानिहाटिग्रामं महाप्रभुम् ॥५३
आगमिष्यत्तसौ नूनं श्वो मध्याह्ने तवालयम् ।
भिक्षां तस्मै प्रदास्यामि पाकसम्भार मानय ॥५४
आनेष्यामि ततोऽहं तमवश्य मतिसत्वरम् ।
निश्चयेन ब्रवीम्येतन्मा कञ्चित् संशयं कुरु ॥५५
यथा प्रयोजनं सर्वं सम्यगाधेहि तत्परः ।
अतीव त्वरया पाकं विधास्येऽहमतः शृणु ॥५६
पक्तव्यद्रव्यसम्भारानानय त्वं मदर्थितान् ।
इत्याकर्ण्य शिवानन्दस्तं तत्प्रार्थित मानयत् ॥५७
अथासौ प्रातरारभ्याकरोत् पाकाननेकशः ।
नानाव्यञ्जनसूपांश्च पूपान् क्षीरोद्भवांस्तथा ॥५८
जगन्नाथकृते भोगं स पृथक् पर्यवेशयत् ।
अपरं सज्जयामास चैतन्यस्य प्रभोः कृते ॥५९
स्वेष्टदेव-नृसिंहस्य पृथग्भोगं समादधे ।
तेभ्यस्त्रिभ्यः समर्प्यासौ दध्यौ तिष्ठन् वहिस्ततः ॥६०
सोऽपश्यत्तत्र चैतन्य मासीनं त्वरयागतम् ।
भोगांस्त्रीनेव भुञ्जानं निशेषीकृतभाजनम् ॥६१
तं दृष्ट्वानन्दसम्मूढः प्रद्युम्नोऽश्रुपरिप्लुतः ।
सफुत्कार मुवाचासौ किं करोषि करोषि किम् ॥६२

जगन्नाथादभिन्नोऽसि तद्भोगं भोक्तु मर्हसि ।
नृसिंहस्य कथं भोगमिमं भक्षितवानसि ॥६३
जानाम्यद्य नृसिंहस्य प्रभोर्जात मुपोषणम् ।
प्रभौ कृतोपवासे हि कथं जीवति किङ्करः ॥६४
तस्य भोजनमालोक्य जातोल्लासोऽपि सोऽन्तरे ।
संलक्ष्य श्रीनृसिंहन्तु दुःखाभासं वहिर्दधे ॥६५
कृष्णचैतन्यगोस्वामी निश्चितं भगवान् स्वयम् ।
जगन्नाथ-नृसिंहाभ्यां न भेदस्तस्य कश्चन ॥६६
इति ज्ञातुं मनो गूढं प्रद्युम्नस्याभवदत्तदा ।
प्रभुस्तद्दर्शयामास तथा कृत्वैव भोजनम् ॥६७
पानिहाटिं ययौ कृत्वा भोजनं श्रीमहाप्रभुः ।
परिपाटीं समालोक्य व्यञ्जनानां तुतोष च ॥६८
किं फुत्कारं करोषीति शिवानन्देन भाषितः ।
उवाच ब्रह्मचारी तं व्यवहारेण ते प्रभोः ॥६९
त्रयाणामेव भोगान् स एकाकी भुक्तवान् स्वयम् ।
जात एवोपवासोऽद्य जगन्नाथ-नृसिंहयोः ॥७०
इत्याकर्ण्य शिवानन्दोऽचिन्तयज्जातसंशयः ।
प्रेमावेशादनेनैव भुच्यते सत्यमेव वा ॥७१
तत एवं शिवानन्दः कथितो ब्रह्मचारिणा ।
पचाम्यन्नं नृसिंहाय द्रव्यमानीयतामिति ॥७२
आनीते भोगसम्भारे शिवानन्देन तत्क्षणात् ।
पक्त्वा भोगं नृसिंहाय प्रद्युम्नोऽथ न्यवेदयत् ॥७३
पराब्देऽथ शिवानन्दो गृहीत्वा भक्तमण्डलम् ।
समागत्य च नीलाद्रिं ददर्श चरणौ प्रभोः ॥७३
एकस्मिन्दिवसे तत्र सभायां श्रीमहाप्रभुः ।
उवाचैवं प्रसङ्गेन नृसिंहानन्द-सद्गुणान् ॥७५

पौषे मासि गताब्देऽसौ मिष्टान्न-व्यञ्जनानि माम् ।
अभोजयद् यथा जातु नैवाहं भुक्तवांस्तथा ॥७६
इत्याकर्ण्य वभूवुस्ते भक्ता विस्मितमानसाः ।
अजायत च विश्वासः शिवानन्दस्य चेतसि ॥७७
इत्थं शचीगृहे नित्यं कृतवान् भोजनं प्रभुः ।
सङ्कीर्त्तनञ्च शुश्राव श्रीवासस्य निकेतने ॥७८
आययौ च मुहुर्द्रष्टुं नित्यानन्दस्य नर्त्तनम् ।
आविर्भावं प्रभुश्चक्रे सर्वदा राघवालये ॥७६
प्रेमाधीनो हि गौराङ्गो यत्र प्रेमास्त्यनुत्तमम् ।
प्रभुः प्रेमवशस्तत्र स्वात्मानं दर्शयत्यसौ ॥८०
शिवानन्दस्य कः कुर्य्यात् प्रेमसीमानिरूपणम् ।
यस्य प्रेम्णा प्रभुर्वश्यो भूयोभूयस्तमाययौ ॥८१
एवं गौरप्रभो राविर्भावोऽयं कथितो मया ।
श्रूयते येन चैतन्यप्रभावं सोऽवगच्छति ॥८२
आचार्य्यो भगवान्नाम पण्डितः पुरुषोत्तमे ।
उवासार्य्य-चरित्रोऽसौ प्रभोः पार्श्वं समाश्रितः ॥८३
अभूद् गोपावतारोऽसौ सख्य-प्रवण-मानसः ।
गोस्वामिना स्वरूपेण समं सख्यं सदाचरत् ॥८४
ऐकान्त्येन स चैतन्यप्रभोश्चरणमाश्रितः ।
प्रभुं निमन्त्रयामास स्ववेश्मन्यन्तरान्तरा ॥८५
पक्त्वासौ निजगेहेऽन्नं विविधव्यञ्जनानि च ।
प्रायशो भोजयामास गृहीत्वैकाकिनं प्रभुम् ॥८६
वैराग्यनिष्ठ आचार्य्यो विषयाद्विमुखोऽभवत् ।
पितात्वस्य शतानन्दखानाख्यो विषयी परम् ॥८७
अनुजो नाम गोपालभट्टाचार्य्योऽस्य सोदरः ।
काश्यामधीत्य वेदान्तं तत्समीपमुपाययौ ॥८८

आचार्य्येण तत स्तस्मिन्नुपनीते प्रभोः पदम् ।
अन्तर्य्यामी प्रभुस्तेन न लेभे चेतसा सुखम् ॥८६
चकाराचार्य्यसम्बन्धात् प्रीत्याभासं प्रभुर्वहिः ।
हृदि नाजायतोल्लासः कृष्णभक्ति विना प्रभोः ॥६०
अथ स्वरूप माचार्य उक्तवानपरेद्यवि ।
वेदान्तं समधीत्यैष गोपालः प्राप्तवानिह ॥६१
अस्माभिर्मिलितै र्भाष्यं श्रूयतां तन्मुखादिति ।
श्रुत्वा स-प्रेमकोपेन स्वरूपस्तमवोचत ॥६२
अहो गोपाल-सङ्गेन बुद्धिभ्रंशोऽभवत्तव ।
मायावादं यतः श्रोतुं जातं ते कौतुकं हृदि ॥६३
यस्तु शारीरकं भाष्यं शृणुयाद्वैष्णवोऽपि सन् ।
सेव्य-सेवकतां त्यक्त्वा मन्येतात्मान मीश्वरम् ॥६४
कृष्णप्राणधनोऽप्येष महाभागवतोऽपि सन् ।
मायावादं समाकर्ण्य विपर्य्यस्तमना भवेत् ॥६५
आचार्य्येणोक्त मस्माकं कृष्णनिष्ठैक-चेतसाम् ।
परावर्त्तयितुं चित्तं न भाष्यं शक्नुयादिति ॥६६
स्वरूपः प्रोक्तवान् मायावादस्य श्रवणात् पुनः ।
जनो जानाति चिद्ब्रह्म माया मिथ्येति केवलम् ॥६७
ईश्वरेऽखिलमज्ञानं जीवस्य ज्ञानकल्पिते ।
इति श्रुत्या विदीर्य्यंते भक्तानां प्राण-चेतसी ॥६८
आचार्य्योऽथ स्थित स्तूष्णीं लज्जया च भयेन च ।
प्रेरयामास गोपालं स्वदेशायापरेद्यवि ॥६६
आचार्य्यः प्रभुमेकस्मिन्दिवसेऽथ न्यमन्त्रयत् ।
गृहेऽन्नं पक्तुमारेभे बहुधा व्यञ्जनानि च ॥१००
स स्तोक-हरिदासाख्यं प्रभोः कीर्त्तनगायकम् ।
प्रोक्तवान् स्वयमाहूय गृहञ्चानीय तं प्रति ॥१०१

गत्वा मद्वचनाद् याचन् स्वसारं शिखिमाहितेः।
उत्तमां स्तण्डुलानेकमानमानांस्त्वमानय ॥१०२
नाम्नासौ माधवी देवी भगिनी शिखिमाहितेः।
तपस्या-निरता वृद्धा जरसा श्रेष्ठवैष्णवी ॥१०३
प्रभुर्यां गणयामास राधिका-गण मन्तरा।
स मेने जगतां मध्ये पात्रं सार्द्धजनत्रयम् ॥१०४
द्वौ श्रीस्वरूपगोस्वामि-श्रीरामानन्दरायकौ।
शिखिमाहितिरेकोऽन्यस्तत्स्वसार्द्धजनस्तथा ॥१०५
तामेव याचतानीतान् हरिदासेन तण्डुलान्।
दृष्ट्वाचार्य्योऽधिकोल्लासं हृदये प्रत्यपद्यत ॥१०६
स पक्त्वा व्यञ्जनं प्रेष्ठं प्रभो र्दैवकुलाहृतम्।
प्रसादञ्च तथा खण्डार्द्रकं निम्बु च सैन्धवम् ॥१०७
मध्याह्ने प्रभुरागत्य भोजनायोपविष्टवान्।
आचार्य्यं परिपप्रच्छ दृष्ट्वा शाल्यन्नमुत्तमम् ॥१०८
उत्तमान्येवमन्नानि क्व प्राप्तास्तण्डला इति।
आचार्य्येणोक्त मानीता याचित्वा माधवीमिति ॥१०९
प्रभुः पप्रच्छ को गत्वा तां प्रार्थ्यानीतवानिति।
स स्तोकहरिदासस्य नामाचार्य्योऽब्रवीत्ततः ॥११०
प्रभुरेवं स्तुवन्नन्नं भुक्तवां स्तदनन्तरम्।
गत्वा स्वकीयमावासमेवं गोविन्दमादिशत् ॥१११
पालनीयो ममादेशस्त्वयाद्य प्रभृति ध्रुवम्।
अत्र प्रवेशनात् स्तोकहरिदासो निवार्य्यताम् ॥११२
हरिदासोऽभवद्दुःखी द्वाःप्रवेशनिषेधनात्।
द्वाः प्रवेशनिषेधेऽस्य न कश्चिद्वेद कारणम् ॥११३
कृतवत्युपवासञ्च हरिदासे दिनत्रयम्।
ते स्वरूपादयः सर्वे पृष्टवन्तो महाप्रभुम् ॥११४

अनेन हरिदासेन कोऽपराधः कृतः प्रभो ।
स कथं वारितो द्वारा दुपवासं करोति च ॥११५
प्रभुणोक्तं विरक्तोऽपि प्रकृतिं योऽभिभाषते ।
नैवाहं वदनं तस्य जातु शक्नोमि वीक्षितुम् ॥११६
दुर्वारो हीन्द्रियग्रामो गृह्णाति विषयान् सदा ।
अलं दारुमयी नारी मनो हर्त्तुं मुनेरपि ॥११७

"तथाहि श्रीमद्भागवते नवमस्कन्धे एकोनविंशाध्याये पञ्चदशः श्लोकः—

मात्रा स्वस्रा दुहित्रा वा नाविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥२॥"

कृत्वा मार्कटवैराग्यं क्षुद्रा जीवगणा इमे ।
भ्रमन्तीन्द्रियसञ्चारैः प्रकृत्यालापतत्पराः ॥११८
इत्युक्त्वा गतवानाभ्यन्तरगेहं महाप्रभुः ।
गोस्वामिनस्तथावेशात् सर्वे तूष्णीमुपाविशन् ॥११९
सर्वेऽन्येद्यु मिलित्वाथ चरणान्ते महाप्रभोः ।
निमित्तं हरिदासस्य किञ्चित्तस्मै न्यवेदयन् ॥१२०
अस्य स्वल्पोऽपराधोऽयं प्रसन्नोऽस्मिन् भव प्रभो ।
जाता सम्प्रति शिक्षास्य ना पराधं करिष्यति ॥१२१
प्रभुणोक्तं मनो जातु वश्यतां मे न गच्छति ।
नातः प्रकृतिसम्भाषी सन्न्यासी दृश्यते मया ॥१२२
वृथा वाचः परित्यज्य यात यूयं स्वकर्मणे ।
यदि वक्ष्यथ भूयोऽपि नैव द्रक्ष्यथ मा मिह ॥१२३
इत्याकर्ण्य जनाः सर्वे पिहित-श्रवणाः करैः ।
उत्थाय च ततः स्वंस्वं कर्म कर्त्तुं प्रतस्थिरे ॥१२४
ततो माध्याह्निकं कर्म कर्त्तुं यातो महाप्रभुः ।
इमां महाप्रभोर्लीलां न कश्चिद् बोद्धुमर्हति ॥१२५

अन्येद्युः परमानन्दपुरीं भक्ता उपागताः ।
ततो निवेदयामासुः प्रभुं प्रसादयेति तम् ॥१२६
तदैकाकी पुरीस्वामी समुपेतो महाप्रभुम् ।
प्रभुस्तञ्च नमस्कृत्यासयामास ससम्भ्रमम् ॥१२७
तं पप्रच्छ क आदेशः कथमागमनं तव ।
हरिदासे प्रसादार्थ मिति स्वामी न्यवेदयत् ॥१२८
तच्छ्रुत्वा प्रभुणावाचि गोस्वामिन् शृणु मे वचः ।
त्वमत्रैवावतिष्ठस्व सर्वानादाय वैष्णवान् ॥१२९
यास्याम्यालालनाथाय मामाज्ञापय तत्तथा ।
तत्रैकाकी निवत्स्यामि गोविन्दः सह यास्यति ॥१३०
इत्येवं कथयन्नेव प्रभु र्गोविन्द माह्वयत् ।
पुरीं नत्वा स चोत्थाय ततो गन्तुं प्रचक्रमे ॥१३१
सम्भ्रमेण पुरीस्वामी समुपेत्य महाप्रभुम् ।
अनुनीय गृहं प्रत्यावर्त्त्य चैवं तमब्रवीत् ॥१३२
ईश्वरस्त्वं स्वतन्त्रोऽसि यथेच्छं कर्त्तुमर्हसि ।
त्वयि पर्य्यनुयोगाय प्रभावः कस्य वर्त्तते ॥१३३
सर्व एव तवाचारा लोकेभ्यो हितसिद्धये ।
वयं सर्वे न जानीमो गम्भीरं हृदयं तव ॥१३४
इत्युक्त्वैव पुरीस्वामी गतवान्निजमालयम् ।
समीपं हरिदासस्य सर्वे भक्तास्ततो ययुः ॥१३५
ऊचे स्वरूपगोस्वामी हरिदास वचः शृणु ।
विश्वासं कुरु यत् सर्वे वयं ते हितकामिनः ॥१३६
प्रभु र्निर्बन्धवान् जातो यत् स्वतन्त्रोऽयमीश्वरः ।
कृपालुहृदयो देवः करुणां ते विधास्यति ॥१३७
त्वयि कुर्वति निर्बन्धं निर्बन्धोऽस्यापि वर्त्स्यति ।
कृतस्नानाशनस्यैव स्वयं क्रोधो विलीयते ॥१३८

इत्युक्त्वा स्नापयित्वा ते हरिदासमभोजयन् ।
सान्त्वयित्वा च तं सर्वे स्वं स्वमालयमाययुः ॥१३९
वीक्षितुं श्रीजगन्नाथं यदा गच्छन्महाप्रभुः ।
हरिदासस्तदा दूरे तिष्ठन्नेव तमैक्षत ॥१४०
महाप्रभुः कृपासिन्धु रिति को बोद्धुमर्हति ।
शिक्षणायैव धर्मस्य निजभक्तमदण्डयत् ॥१४१
इत्थं वीक्ष्य बभूवुस्ते भक्ता जातभयाः पुनः ।
नारीसम्भाषणं सर्वे स्वप्नकालेऽपि तत्यजुः ॥१४२
हरिदासः क्रमेणैवं वर्षमेक मयापयत् ।
न तथापि प्रसादोऽभुच्चेतसि श्रीमहाप्रभोः ॥१४३
हरिदासस्ततो रात्रिशेषे नत्वैकदा प्रभुम् ।
कञ्चित् किञ्चिदविज्ञाप्य प्रयागं गतवानसौ ॥१४४
महाप्रभोः पदप्राप्तिकृते सङ्कल्पितान्तरः ।
त्रिवेणीमवगाह्यैव प्राणांस्तत्याज तत्क्षणात् ॥१४५
तदानीमेव दिव्येन देहेन प्रभु मागतः ।
असौ तस्य कृपां लब्ध्वावतस्थेऽन्तर्हितः सदा ॥१४६
जगौ गान्धर्वदेहेन कृतान्तर्धान एव सः ।
अन्यैरविदितो रात्रौ गीतिमश्रावयत् प्रभुम् ॥१४७
एकदा परिपप्रच्छ सर्वान् भक्तान् महाप्रभुः ।
हरिदासः क्व चास्ते भोः स समानीयतामिह ॥१४८
ऊचुस्ते हरिदासेन वर्षे सम्पूर्णतां गते ।
क्व गतं नक्तमुत्थाय नैव तद्वेद कश्चन ॥१४९
इत्याकर्ण्य प्रभुं स्मेरवदनं समवस्थितम् ।
पश्यतां सर्वभक्तानां चित्तेऽजायत विस्मयः ॥१५०
एकदा जगदानन्दो गोविन्दश्च स्वरूपकः ।
दामोदरो मुकुन्दश्च श्रीकाशीश्वरशङ्करौ ॥१५१

समुद्रं ते गताः स्नातुं दूरेऽशृण्वन् कियत्यपि ।
हरिदासं स्वकण्ठेन तं गायन्त मिवोच्चकैः ॥१५२
नैव दृष्टो नरः कोऽपि गीतमात्रन्तु तैः श्रुतम् ।
तद् गोविन्दादिभिः सर्वैरेवमेवान्वमीयत ॥१५३
आत्मानं हतबान् भुक्त्वा हरिदासो विषादिकम् ।
नूनं तेनैव पापेन सोऽभवद्ब्रह्मराक्षसः ॥१५४
श्रूयते गीतमेवास्य नाकृतिर्दृश्यते यतः ।
स्वरूपस्त्ववदन्मिथ्यानुमानं भवतामिदम् ॥१५५
कृष्णकीर्त्तन माजन्म सेवनञ्च महाप्रभोः ।
तत् कृपापात्रताप्राप्तिः क्षेत्रे यस्य मृतिः पुनः ॥१५६
दुर्गतिर्न भवेत्तस्य लभेतैव स सद्गतिम् ।
तन्नूनं ज्ञास्यते पश्चाद् भङ्ग्यैव श्रीमहाप्रभोः ॥१५७
अथायातो नवद्वीपं प्रयागात् कोऽपि वैष्णवः ।
हरिदासस्य बृत्तान्तं सहि सर्वानवोचत ॥१५८
यथा भूत्तस्य सङ्कल्पस्त्रिवेणीञ्चाबिशद् यथा ।
श्रीवासाद्यास्तथा श्रुत्वा सर्वे जाताः सविस्मयाः ॥१५९
ततो वर्षान्तरे भक्तैः शिवानन्दोऽखिलैः सह ।
सानन्दचेतसागत्य प्रभुणा समगच्छत ॥१६०
हरिदासः क्व चास्तीति श्रीवासः पृष्टवान् यदा ।
प्रभुः प्रत्यवदच्चेति स्वकर्मफलभाक् पुमान् ॥१६१
श्रीवासोऽपि ततस्तस्य वृत्तान्तं समभाषत ।
यथासीत्तस्य सङ्कल्पस्त्रिवेणीं सोऽविशद् यथा ॥१६२
श्रुत्वा प्रसन्नचित्तोऽसौ प्रभुः प्रोचे हसन्निदम् ।
प्रायश्चित्तमिदं नूनं प्रकृत्या दर्शने कृते ॥१६३
ततः सर्वे स्वरूपाद्या मिलित्वैवं व्यतर्कयन् ।
त्रिवेण्या हि प्रभावेण हरिदासः प्रभुं गतः ॥१६४

इत्थं लीलाश्चकारासौ श्रीशचीनन्दनः प्रभुः।
शृण्वतां याश्च भक्तानां तृप्यतः कर्णचेतसी ॥१६५
शिक्षयामास वैराग्यं लोकान् स्वकृपया प्रभुः।
गाढ़ं प्रेम च भक्तानां प्रकटीकृतवानसौ ॥१६६
व्यञ्जयं स्तीर्थमाहात्म्यं कृतवान् भक्तमात्मसात्।
कर्माणि पञ्चसप्तानि स चक्रे लीलयैकया ॥१६७
मधुरो ह्येष चैतन्य-लीला-गम्भीर-सागरः।
अविज्ञेयोऽपि लोकानां धीरैर्भक्तैस्तु बुध्यते ॥१६८
श्रद्धया श्रूयतां सर्वैश्चैतन्यचरितामृतम्।
तर्कं मा कुरु तर्केण भविष्यति विपर्य्ययः ॥१६९
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१७०

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे श्रीहरिदास-दण्डरूप-
शिक्षा नाम द्वितीयः परिच्छेदः।

—०—

अन्त्यलीलायां तृतीयः परिच्छेदः

"वन्देऽहं श्रीगुरोः श्रीयुतपदकमलं श्रीगुरून् वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम्।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यदेवं
श्रीराधाकृष्णपादान् सहगणललिताश्रीविशाखान्वितांश्च ॥१॥

गौरचन्द्रो मुहुर्जीयान्नित्यानन्दो जयत्यसौ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ॥१
आसीद्विप्रसुतः कश्चिदोड्रीयः पुरुषोत्तमे।
मृदुलव्यवहारोऽसौ पितृहीनोऽतिसुन्दरः ॥२

प्रत्यहं प्रभुमभ्येत्य नमस्कारं चकार सः ।
आलपत् प्रभुणा सार्द्धं सोऽभवत् प्रभुजीवनः ॥३
प्रीति रासीत् प्रभौ तस्य दयाञ्चक्रे प्रभुश्च तम् ।
नतु दामोदरस्तस्य प्रीतिं सोढ़ुं क्षमोऽभवत् ॥४
स च विप्रकुमारं तं वारंवारं न्यषेधयत् ।
नैवाशक्नोदवस्थातु मनालोक्य स तु प्रभुम् ॥५
आगच्छत् सोऽन्वहं तस्मिन्नप्रीणाच्च भृशं प्रभुः ।
यत्र प्रीतिर्गतिस्तत्र बालानां प्रकृति र्हि सा ॥६
तथा दामोदरो दृष्ट्वा हृदि दुःखमविन्दत ।
बालो वक्तुमशक्तोऽपि न मेने तस्य वारणम् ॥७
अन्येद्यु र्बालके तस्मिन् प्रभोः सन्निधिमागते ।
प्रीत्या वार्त्तामपृच्छत्तं गोस्वामी श्रीमहाप्रभुः ॥८
कालेन कियता बाले समुत्थाय गृहं गते ।
सोढ़ुं दामोदरोऽशक्तः प्रभुं वक्तुं प्रचक्रमे ॥९
क्वान्योपदेशपाण्डित्यं क्व वा गोस्वामिनः स्थितिः ।
गोस्वामिन् वेद्मि गोस्वामी गोस्वामीति च साम्प्रतम् ॥१०
सर्वे सम्प्रति गास्यन्ति जना गोस्वामिनो गुणान् ।
गोस्वामिनः प्रतिष्ठैवं भविता पुरुषोत्तमे ॥११
इत्याकर्ण्य प्रभुः प्रोचे किन्नु दामोदरोच्यते ।
अथ दामोदरेणोक्तं स्वतन्त्रोऽसि त्वमीश्वरः ॥१२
चरन्तमपि सच्छन्दं कस्त्वां वक्तुं क्षमेत वा ।
नावरीतुं तु शक्नोषि जगतां मुखरं मुखम् ॥१३
न कथं पण्डितोऽपि त्वं विचारयसि चेतसा ।
ब्राह्मण्याः पतिहीनायाः पुत्रे प्रीतिं करोषि किम् ॥१४
अपि चेद् ब्राह्मणी सेयं तापसी च पतिव्रता ।
सुन्दरी युवती सेति तदेवास्या हि दूषणम् ॥१५

त्वमप्यसि युवश्रेष्ठस्तथा परमसुन्दरः ।
ददास्यवसरं कर्णाकर्णिसंलपतां नृणाम् ॥१६
इति दामोदरे वाचमुक्त्वा तूष्णीं गते प्रभुः ।
प्राप्नुवन् हृदि सन्तोषं हसन्नेवमचिन्तयत् ॥१७
तरङ्गोऽयं विशुद्धस्य प्रेम्ण एव निगद्यते ।
दामोदरसमानो मे नान्तरङ्गोऽस्ति कश्चन ॥१८
इत्थं विचार्य्य मध्याह्नकृत्यं कर्त्तुं ययौ प्रभुः ।
अन्येद्यु र्निभृतं दामोदर माहूतवानसौ ॥१६
प्रभुणोक्तं नवद्वीपं याहि दामोदराधुना ।
तत्र गत्वावतिष्ठस्व जनन्या निकटे मम ॥२०
वर्त्तते नापरस्तस्या रक्षको हि त्वया विना ।
सावधानः कृतो यस्मात्त्वयैवाहमपि स्फुटम् ॥२१
निरपेक्ष स्त्वया तुल्यो नास्ति कोऽपि गणेषु मे ।
धर्मो जातु न रक्ष्येत निरपेक्षतया विना ॥२२
नैव यत् सम्भवेन्मत्तस्त्वत्तस्तद्भवति ध्रुवम् ।
मामप्यदण्डयो यत्त्वं तदन्यस्य तु का कथा ॥२३
जनन्याश्चरणौ प्राप्य वस तस्या निकेतने ।
स्वच्छन्दाचरणं नैव कस्यापि स्यात्तवाग्रतः ॥२४
आगमिष्यसि मां द्रष्टुं त्वं कदाप्यन्तरान्तरा ।
पुनरप्यविलम्बेन तत्रैवेतो गमिष्यसि ॥२५
मम कोटिं नमस्कारान् जनन्यै मे निवेदय ।
उक्त्वा मे सुखवृत्तान्तं सुखं तस्याः सदा कुरु ॥२६
श्रावयिष्यन्निजां वार्त्तां तुभ्यमेव निरन्तरम् ।
मामेव प्रैरयत् सोऽत्र त्वत्सकाशं महाप्रभुः ॥२७
इत्युक्त्वा हृदि सन्तोषं जनन्या जनयन्मम ।
अन्यद्गुह्यतमं वृत्तं स्मारयिष्यसि तां पुनः ॥२८

भूयोभूयोऽहमायामि तव मात र्निकेतनम् ।
भक्षयामि च मिष्टान्नव्यञ्जनान्यखिलानि ते ॥२६
तानि तानि च भुञ्जानं मां तथा ज्ञातवत्यपि ।
मन्यसे स्फुर्त्तिमात्रं तद् वाह्य-विच्छेद-निश्चयात् ॥३०
गतायां माघसंक्रान्त्यां नाना व्यञ्जनपिष्टकान् ।
क्षीरञ्च परमान्नञ्च मातस्त्वमपचस्ततः ॥३१
भोगं निवेद्य कृष्णाय यदा ध्यातवती तदा ।
स्फुरणान्मम नेत्रे तेऽभवतामश्रु-सम्भृते ॥३२
ससम्भ्रम महं तत्र गत्वा सर्वमभक्षयम् ।
पश्यन्त्या माञ्च भुञ्जानं तव सौख्यमजायत ॥३३
क्षणादेव विमृज्याश्रु रिक्तं दृष्ट्वा च भाजनम् ।
स्वप्ने दृष्टवतीव त्वं भक्तं भुक्तं निमाइना ॥३४
तव वाह्यवियोगेऽस्मिन् पुनर्भ्रान्तिरजायत ।
न मया सज्जितो भोग इति ज्ञानं तवाभवत् ॥३५
पश्यन्ती पाकपात्राणि सर्वान्यन्नभृतानि तु ।
स्थानं संस्कृत्य भोगं त्वं पुनरेव न्यवेदयत् ॥३६
इत्थमेव त्वया दत्तं भोगं भुञ्जे पुनः पुनः ।
विशुद्धोऽयं तव प्रेमा मामाकर्षति सन्ततम् ॥३७
अहं नीलाचलेऽत्रैव निवसामि तवाज्ञया ।
मातस्ते प्रेमशक्तिर्मां नयत्येव तवान्तिकम् ॥३८
इत्येवं कथयन् भूयोभूयस्तां स्मारयिष्यसि ।
मम नाम गृहीत्वा च तस्या वन्दिष्यसे पदम् ॥३६
इत्युक्त्वासौ जगन्नाथ-प्रसादान्नं समानयन् ।
जनन्यै वैष्णवेभ्यश्च प्रदातुं व्यभजत् पृथक् ॥४०
अथ दामोदरः श्रीमन्नवद्वीपं समागतः ।
मातरञ्च समासाद्य तस्थौ तत्पादसन्निधौ ॥४१

महाप्रसाद मानीत माचार्य्यप्रमुखाय सः।
दत्त्वा वैष्णववृन्दाय प्रभोरादेश माचरत् ॥४२

पुरो दामोदरस्यासीन्न कस्यापि स्वतन्त्रता।
तद्भयादेव तत्रत्याः ससङ्कोचं समाचरन् ॥४३

यस्याल्पमपि सोऽपश्यद् गणेषु स्थित्यतिक्रमम्।
तं वाचा दण्डयं स्तत्र मर्य्यादां पुनरानयत् ॥४४

सोऽयं दामोदरस्यैव वाग्दण्डः कथितो मया।
अज्ञानकल्मषं यस्य श्रवणेन पलायते ॥४५

समुद्रकोटिगम्भीरतमा लीला महाप्रभोः।
किं चकार किमर्थं स तद्बोद्धुं कोऽपि नाशकत् ॥४६

अतस्तस्य निगूढ़ोऽर्थो नाल्पोऽपि ज्ञायते मया।
बाह्यार्थस्य प्रकाशाय प्रयासः क्रियते मुहुः ॥४७

एकदा हरिदासेन सङ्गतः श्रीमहाप्रभुः।
इष्टगोष्ठीं कियत्कालं कृत्वा तं परिपृष्टवान् ॥४८

निखिला यवना एव हरिदास कलौ युगे।
कुर्वन्त्यतिदुराचारा गो-विप्र-प्राणहिंसनम् ॥४९

अमीषां वत सर्वेषां कथं निस्तारणं भवेत्।
तस्य पश्यामि नोपाय मिति दुःखं महन्मम ॥५०

हरिदासस्तमूचेऽथ मा कृथाश्चिन्तनं प्रभो।
दृष्ट्वा यवनसंसारं न दुःखं कुरु चेतसा ॥५१

अनायासेन मोक्ष्यन्ते यवना अखिला अपि।
नामाभासेन हाराम हारामेति ब्रुवन्ति ते ॥५२

भक्तैः प्रेम्णैव हा राम हा रामेति यदुच्यते।
यवनाना महो भाग्यं नाम गृह्णन्ति तत्तु ते ॥५३

नामाभासो भवेत्तेषां सङ्केतेन तु यद्यपि।
नाम्नस्तेजस्तथाप्येतन्न विनश्यति कर्हिचित् ॥५४

"तथाहि नृसिंह-पुराणवचनम्—

दंष्ट्रिदंष्ट्राहतो म्लेच्छो हारामेति पुनः पुनः ।
उक्त्वापि मुक्तिमाप्नोति किं पुनः श्रद्धया गृणन् ॥२॥"

पुत्रं नारायणे त्युक्त्वाकारयन्तमजामिलम् ।
विष्णुदूतस्तमभ्येत्य मोचयामास बन्धनात् ॥५५
रामेत्यक्षरयोर्युग्मं न जातु व्यवधीयते ।
तेन भूषित एवायं हाशव्दः प्रेमवाचकः ॥५६
नाम्नोऽक्षरसमूहस्य स्वभावस्तावदेष हि ।
सत्यपि व्यवधानेऽसौ स्वप्रभावं न मुञ्चति ॥५७

"तथाहि श्रीहरिभक्तिविलासस्यैकादशविलास ऊननवत्यधिक-
द्विशततमाङ्कधृतं पद्मपुराणवचनम्—

नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम् ।
तच्चेद्देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र ॥३॥"

नामाभासाद्भवेन्नूनं सर्वपापपरिक्षयः ।

"तथाहि श्रीभक्तिरसामृतसिन्धौ दक्षिणविभागे विभाव-
लहर्य्यां द्विपञ्चाशः श्लोकः—

तं निर्व्याजं भज गुणनिधे पावनं पावनानां
श्रद्धा-रज्यन्मति रतितरा मुत्तमःश्लोकमौलिम् ।
प्रोद्यन्नन्तःकरणकुहरे हन्त यन्नामभानो-
राभासोऽपि क्षपयति महापातकध्वान्तराशिम् ॥४॥"

नामाभासाद्भवत्येव संसारस्य परिक्षयः ॥५

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे द्वितीयाध्याय एक-
चत्वारिंशः श्लोकः—

म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
अजामिलोऽप्यगाद्धाम किमुत श्रद्धया गृणन् ॥५॥"
नामाभासाद्भवेन्मुक्तिः सर्वशास्त्रेषु दृश्यते ।
श्रीमद्भागवतग्रन्थे तत्प्रमाण मजामिलः ॥५६
इत्याकर्णयतः सौख्यं ववृधे मनसि प्रभोः ।
भङ्गयन्तरेण भूयोऽपि तमेवं पृष्टवान् प्रभोः ॥६०
पृथिव्यां बहवो जीवाः सन्ति स्थावरजङ्गमाः ।
तेषां केन प्रकारेण सर्वेषां मोचनं भवेत् ॥६१
प्रत्यूचे हरिदासेन तवैव कृपया प्रभो ।
स्थावरा जङ्गमाः सर्वे पुरा निस्तारितास्त्वया ॥६२
यथोच्चैः स्वरयोगेन कृतं सङ्कीर्त्तनं त्वया ।
जङ्गम-स्थावराणां तद्बभूव श्रवणं तथा ॥६३
श्रुत्वैव क्षयमाप्नोति जङ्गमानां हि संसृतिः ।
स्थावरेषु लगन् शव्दः प्रत्युदेति प्रतिध्वनिः ॥६४
नासौ प्रतिध्वनिः किन्तु ते कुर्वन्त्येव कीर्त्तनम् ।
तवैवानुग्रहेणेत्थमसम्भाव्यस्य सम्भवः ॥६५
उच्चैः सङ्कीर्त्तनं सर्वजगतीषु प्रवर्त्तते ।
प्रेमाविष्टा स्तदाकर्ण्य नृत्यन्ति स्थिरजङ्गमाः ॥६६
गच्छन् वृन्दावनं भारिखण्डे त्वं कृतवान् यथा ।
तथोक्तं बलभद्रेण भट्टाचार्य्येण मां प्रति ॥६७
जीवोद्धारकृते तुभ्यं वासुदेवो न्यवेदयत् ।
त्वञ्च प्रत्यशृणोस्तस्मै जीवानां भवमोचनम् ॥६८
जगन्निस्तारणार्थोऽयमवतार स्तव प्रभो ।
भक्तानामग्रतस्तच्च त्वयाप्यङ्गीकृतं पुरा ॥६९
उच्चैः सङ्कीर्त्तनं तस्माद्भवानेव प्रचारयन् ।
स्थिरजङ्गमजीवानां भवं खण्डितवानिति ॥७०

प्रभुणोक्तं विमोक्ष्यन्ते यदा जीवा इमेऽखिलाः ।
ब्रह्माण्डं निखिलं तावत्तदा शून्यं भविष्यति ॥७१

प्रत्यूचे हरिदासस्तं यावत्त्वं भुवि तिष्ठसि ।
स्थावरान् जङ्गमांश्चैतान् सर्वान् जीवानिह स्थितान् ॥७२

तावद्विमोच्य संसाराद् वैकुण्ठं प्रेरयिष्यसि ।
सूक्ष्मान् जीवांश्च कर्मार्थं पुनरुद्बोधयिष्यसि ॥७३

ते च जीवा भविष्यन्ति पुनः स्थावरजङ्गमाः ।
ब्रह्माण्डं पूर्ववत्तैश्च परिपूर्णं भविष्यति ॥७४

अयोध्यावासिनो जीवान् गृहीत्वा रघुनन्दनः ।
वैकुण्ठं गतवानन्यैरयोध्यां पूरयन् यथा ॥७५

अवतीर्य्य तथैव त्वं हट्टं सज्जितवानिह ।
कोऽपि बोद्धुं न शक्नोति निगूढ़ं तव नाटकम् ॥६

व्रजभूमौ यथा पूर्वं श्रीकृष्णोऽवतरन्नसौ ।
जीवान् ब्रह्माण्डवास्तव्यान् मोचयामास संसृतेः ॥७७

"तथाहि श्रीमद्भागवते दशमस्कन्धे ऊनत्रिंशाध्याये पञ्चदशः

श्लोकः—

न चैवं विस्मयः कार्य्यो भवता भगवत्यजे ।
योगेश्वरेश्वरे कृष्णे यत एतद्विमुच्यते ॥६॥

तथाहि विष्णुपुराणे चतुर्थांशे पञ्चदशाध्याये द्वादशवचनम्—

भगवानिह कीर्त्तितः संस्मृतश्च द्वेषानुबन्धेनाप्यखिल-
सुरासुरादिदुर्लभं फलं प्रयच्छति किमुत सम्यग्भक्तिमताम् ॥७॥"

अवतीर्य्य तथैव त्वं श्रीनवद्वीप-धामनि ।
सर्वब्रह्माण्डवास्तव्यान् जीवानुद्धृतवानसि ॥७८

चैतन्यमहिमा ज्ञातो मयेति यो हि भाषते ।
स जानातु पुनस्तावन्ममैवं निश्चितं मतम् ॥७९

तव लीला-सुधा-सिन्धुर्वर्धमानोऽनिशं महान् ।
तस्य नैकोऽपि विन्दुर्मे मनसो जातु गोचरः ॥८०
इति श्रृण्वंश्चमत्कारावेशेना चिन्तयत् प्रभुः ।
कथं मे गूढ़लीलेयं हरिदासेन बुध्यते ॥८१
मनसैव तमाश्लिष्यत् सन्तुष्टेन महाप्रभुः ।
वाह्यप्रकाश माशङ्क्यात्यजद्दैहिकचेष्टितम् ॥८२
ईश्वरस्य स्वभावोऽयमैश्वर्य्यस्य निगूहनम् ।
न तद् गोपायितुं शक्यं भक्तेभ्यो ज्ञायते तु तैः ॥८३

"तथाह्यालकमन्दारसंज्ञो श्रीसम्प्रदायकृद्यामुनाचार्य्यस्तोत्रेऽ-
ष्टादशः श्लोकः—

उल्लङ्घित-त्रिविध-सीम-समातिशायि-
सम्भावनं तव परिव्रढ़िमस्वभावम् ।
मायावलेन भवतापि निगुह्यमानं
पश्यन्ति केचिदनिशं त्वदनन्यभावाः ॥८॥"

अथ सर्वान्निजान्भक्तानभ्युपेत्य महाप्रभुः ।
ऊचे मुखशतेनेव हरिदासगुणावलीम् ॥८४
उल्लासो ववृधे भक्तगुणान् कथयतः प्रभोः ।
श्रेष्ठः सर्वेषु भक्तेषु हरिदासः पुनस्ततः ॥८५
असंख्या हरिदासस्य गुणाः सीमाविवर्जिताः ।
तदंशं वर्णयन् कश्चिद् याति पारं न कश्चन ॥८६
श्रीबृन्दावनदासेन ग्रन्थे चैतन्यमङ्गले ।
श्रीमतो हरिदासस्य गुणाः केचित् प्रकाशिताः ॥८७
चरित्रं हरिदासस्यानन्तं वक्तुं न शक्यते ।
पवित्रयितु मात्मानं कोऽपि किञ्चन भाषते ॥८८
श्रीवृन्दावनदासेन न येषां वर्णना कृता ।
गुणांस्तान् हरिदासस्य भक्ताः श्रृण्वन्तु कांश्चन ॥८९

हरिदासो यदा स्वीयगेहवासं परित्यजन् ।
प्रत्युवास कियत्कालं वेणापोल-वनान्तरे ॥६०
रहस्तत्रोटजं कृत्वा तुलसी मर्चयंस्तदा ।
नामान्यकीर्त्तयल्लच्चत्रयकृत्वो दिवानिशम् ॥६१
भिक्षानिर्वाहणं कुर्वन् ब्राह्मणानां निकेतने ।
सोऽभवन्निखिलै र्लोकैः प्रभावेणैव पूजितः ॥६२
तद्देशाधिकृतो रामचन्द्रखानाभिधानकः ।
कोऽप्यासीद्वैष्णव-द्वेषी पाषण्ड-प्रवरो जनः ॥६३
पूज्यमानं जनैः सोढुं हरिदासमशक्नुवन् ।
सोऽकरोद्बहुधोपायान् कर्त्तुं तस्यावमाननाम् ॥६४
न लब्ध्वा हरिदासस्य च्छिद्रं किञ्चित् कथञ्चन ।
आनीय गणिकाः सर्वास्तदुपायार्थमब्रवीत् ॥६५
एष वैष्णवसन्न्यासी हरिदासाभिधानकः ।
वैराग्यधर्मनाशोऽस्य युष्माभिः क्रियतामिति ॥६६
काचिदूचेऽथ तं वेश्या सुन्दरी यौवनोद्धता ।
हरिष्यामि मतिं तस्य त्रिभिरेव दिनैरिति ॥६७
खान ऊचे पदातिर्मे तत्त्वया सह गच्छतु ।
स त्वया युक्तमेवामुं धृत्वानेष्यति मामिति ॥६८
तं सोचे प्रथमस्तावत्तेन सङ्गोऽस्तु मे सकृत् ।
पदातिं ते ग्रहीष्यामि द्वितीयेऽवसरे पुनः ॥६९
ततोऽसौ गणिका रात्रौ सुन्दराकल्पमण्डिता ।
निवासं हरिदासस्य जगामोल्लसितान्तरा ॥१००
तुलसीं सा नमस्कृत्य तद्गेहद्वारमाययौ ।
ततो गोस्वामिनं नत्वा तत्र तिष्ठन्त्यवर्त्तत ॥१०१
दर्शयन्त्यङ्ग मुद्घाट्य तस्य द्वारि निषीदती ।
वक्तुं प्रचक्रमे किञ्चित् स्वरेण श्रुतिहारिणा ॥१०२

प्रभो त्वमतिसौम्योऽसि नवीनं तव यौवनम् ।
मनो धर्त्तुं न शक्नोति दृष्ट्वा त्वां कापि कामिनी ॥१०३
तव सङ्गमलाभाय प्रलुब्धं मम मानसम् ।
त्वय्यप्राप्ते मया प्राणाः शक्यन्ते नैव रक्षितुम् ॥१०४
अथोक्तं हरिदासेन तावन्नैवाश्रृणोमि ते ।
यावत् संख्येयकं नामकीर्त्तनं पूर्य्यते मम ॥१०५
अत्रोपविशती तावन्नामसङ्कीर्त्तनं श्रृणु ।
नामसंख्यासमाप्तौ तु साधयिष्यामि ते मनः ॥१०६
इत्याकर्ण्योपविष्टासीत्तत्र सा गणिकोत्तमा ।
कीर्त्तनं कुर्वतः प्रात हंरिदासस्य चाभवत् ॥१०७
प्रतस्थे प्रातरालोक्य तदोत्थाय च सा ततः ।
वृत्तान्तं निखिलं रामचन्द्रखानाय चाब्रवीत् ॥१०८
पूर्वेद्युर्वचनेनासौ मामङ्गीकृतवान् यतः ।
तेन सार्द्धं ममावश्यं सङ्गमोऽद्य भविष्यति ॥१०९
परेद्युः सा विभावर्य्यां वेश्या तत्र समागता ।
वह्वेवं सान्त्वयामास हरिदासोऽपि तां तदा ॥११०
प्राप्तवत्यसि दुःखं ह्यो नापराधं गृहाण मे ।
करिष्येऽवश्यमेवाहं तव प्रार्थनपूरणम् ॥१११
तावदत्र निषण्णा त्वं नामसङ्कीर्त्तनं श्रृणु ।
पूर्णायां नामसंख्यायां पूर्णकामा भविष्यसि ॥११२
ततोऽसौ तुलसीं नत्वा वेश्या द्वारि निषीदती ।
श्रृण्वती च ततो नाम प्रोचे हरि-हरीति च ॥११३
रात्रिशेषे हृतस्थैर्य्यामुत्कण्ठाप्रचलत्तनुम् ।
वारमुख्यां विलोक्यैवं हरिदास उवाच ताम् ॥११४
कोटिकृत्वोऽस्मि मासेन नामयज्ञेषु दीक्षितः ।
अद्य मे जपतो नामान्यवसानं गता निशा ॥११५

भविष्यत्यद्य तत्-पूर्त्तिरित्यासीन्मम निश्चयः ।
जपन्नपि निशां सर्वां नाहं तत्पूरणे क्षमः ॥११६
श्वः समाप्तिं गते यज्ञे व्रतं यास्यति पूर्णताम् ।
स्वच्छन्देन त्वया सार्द्धं सङ्गो मे भविता ततः ॥११७
अथ गत्वा ततो वेश्या खानं वार्त्तामवोचत ।
आगमच्च परेद्युः सा सायं ठाकुरसन्निधिम् ॥११८
तुलसीं सा नमस्कृत्य नमस्कृत्य च ठाकुरम् ।
द्वार्य्यासीनाश्रृणोन्नाम कृत्वा हरि-हरि-ध्वनिम् ॥११९
हरिदासोऽवदत् कालः सम्पूर्णोऽद्य भविष्यति ।
ततोऽहं पूरयिष्यामि तव सर्वं मनोरथम् ॥१२०
अवसानं गता रात्रिः कीर्त्तनं तस्य कुर्वतः ।
प्रत्यावृत्तं तु वेश्यायाश्चित्तं ठाकुरसन्निधौ ॥१२१
दण्डवत् पतिता वेश्या ततष्ठाकुरपादयोः ।
सा रामचन्द्रखानस्य वार्त्ता मुक्त्वा न्यवेदयत् ॥१२२
वारयोषिदहं पापं कृतवत्यस्मि पुष्कलम् ।
अधमां कृपया देवो निस्तारयतु मामिति ॥१२३
ठाकुरः स्माह खानस्य सर्वं वेदाहमाशयम् ।
सोऽज्ञो मूर्खश्च तेनाहं मन्ये दुःखं न किञ्चिन ॥१२४
अगमिष्यं तदैवाहं स्थानमेतत् परित्यजन् ।
तथापि स्थितवानस्मि तवैवार्थे दिनत्रयम् ॥१२५
वेश्या प्रोवाच तं मह्यं कृपयोपदिश प्रभो ।
किं कर्त्तव्यं मया येन भवक्लेशो निवार्य्यते ॥१२६
सोऽथोवाच गृहद्रव्यं विप्रेभ्यः सर्वमर्पय ।
एत्य गेहेऽत्र विश्रामं लभस्व च निरन्तरम् ॥१२७
जपन्ती सर्वदा नाम तुलसीसेवनं कुरु ।
ततः श्रीकृष्णपादाब्ज मचिरादेव लप्स्यसे ॥१२८

इत्युक्त्वा ठाकुर स्तस्यै श्रीनामोपदिशंस्ततः ।
समुत्थाय प्रतस्थे च कुर्वन् हरिहरि-ध्वनिम् ॥१२९
अथ वाराङ्गनामुख्या लब्ध्वादेशं गुरोरसौ ।
गेहवित्तान्यशेषाणि ब्राह्मणेभ्यो ददौ तदा ॥१३०
स्थिता तत्र गृहे सैकवस्त्रा मुण्डितमस्तका ।
नाम जप्तवती लक्षत्रयकृत्वो दिवानिशम् ॥१३१
चर्वणोपोषणे कृत्वा सिषेवे तुलसी मसौ ।
इन्द्रियेषु च दान्तेषु तस्याः प्रेम प्रकाशितम् ॥१३२
प्रसिद्धा वैष्णवी साभून्महत्त्वं परमं गता ।
तद्दर्शनाय यान्ति स्म महान्तो वैष्णवास्तदा ॥१३३
वेश्यायाश्चरितं दृष्ट्वा सर्वे लोकाश्चमत्कृताः ।
हरिदासस्य माहात्म्यं सनमस्कार मब्रुवन् ॥१३४
स रामचन्द्रखानोऽपराधवीजमरोपयत् ।
तद्वीजात् पादपोजातः पश्चात् स फलवानभूत् ॥१३५
फलं यच्चाद्भुताख्यानं महतामपराधजम् ।
प्रसङ्गात्तद् ब्रवीम्यत्र भक्तैराकर्ण्यतां मुदा ॥१३६
स रामचन्द्रखानो हि प्रकृत्याभूदवैष्णवः ।
हरिदासेऽपराधेन बभूवासुरवत् पुनः ॥१३७
विनिन्दन् वैष्णवं धर्ममवजज्ञौ च वैष्णवान् ।
चिरं कृतापराधानां परिणामोऽभवत्तदा ॥१३८
श्रीनित्यानन्दगोस्वामी यदा गौड़ं समाययौ ।
प्रेमप्रचारणार्थं स आरेभे भ्रमितुं तदा ॥१३९
प्रेमप्रचारणायासौ पाषण्डदलनाय च ।
द्वाभ्यामेव निमित्ताभ्यां सोऽवधूतोऽभ्रमत् सदा ॥१४०
नित्यानन्दो हि सर्वज्ञः प्राप्तस्तस्य निकेतनम् ।
आगत्योपाविशद्दुर्गामन्दिराभ्यन्तरे पुनः ॥१४१

अङ्गनेऽपि ततः पूर्णे वहुभिस्तस्य सङ्गिभिः ।
शुद्धान्तात् प्रैरयत्तत्र रामचन्द्रः स्वसेवकम् ॥१४२
भृत्यः प्रोवाच गोस्वामिन् खानेन प्रहितोऽस्मि ते ।
व्यवस्थापयितुं वासं गृहस्थानां गृहे तव ॥१४३
गोशाला गोपजातीनां वर्त्ततेऽतीव विस्तृता ।
स्थानमेतत्तु सङ्कीर्णमसंख्याः सन्ति ते जनाः ॥१४४
गोस्वामी गेहमध्यात्तच्छ्रुत्वा कोपाद्वहिर्गतः ।
अट्टाट्टं प्रहसन्नेवं भाषितुं तं प्रचक्रमे ॥१४५
उच्यते सत्यमेतेन नेदं योग्यं गृहं मम ।
म्लेच्छानामेव गोहत्यां कुर्वतां युज्यते त्विदम् ॥१४६
इत्युक्त्वोत्थाय च क्रोधाद् गोस्वामी प्रस्थित स्ततः ।
तस्य दण्डविधानाय तस्मिन् ग्रामेऽपि न स्थितः ॥१४७
स आज्ञप्त स्ततो रामचन्द्रखानेन सेवकः ।
उच्चखान मृदं भूमे र्गोस्वामी या मधिष्ठितः ॥१४८
मन्दिरञ्चाजिरं सर्वमलिम्पद् गोमयाम्बुना ।
तथापि रामचन्द्रस्य प्रसन्नं नाभवन्मनः ॥१४९
रामचन्द्रः करं राज्ञे चौर्य्याजीवोऽपि नो ददौ ।
तन्मेच्छसचिवः क्रोधादाजगाम तदालयम् ॥१५०
आयातश्च तदेवासौ दुर्गामन्दिरमावसत् ।
अवध्य-प्राणिनो हत्वा तत्र मांस मपाचयत् ॥१५१
रामचन्द्रमथो बद्धा तत्पत्नीतनयैः सह ।
लुण्ठयामास तद्गेहं तं ग्रामञ्च दिनत्रयम् ॥१५२
विधायावध्यमांस्पाकं त्र्यहं तत्रैव मन्दिरे ।
बलात् सर्वान् गृहीत्वासौ ततोऽगच्छत् परेद्यवि ॥१५३
एवं हृतेषु खानस्य जाति-वित्त-जनेषु च ।
ग्रामस्तस्य ततो लोकशून्य एवाभवच्चिरम् ॥१५४

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

यत्र देशे भवेद् ग्रामे महता मवमानना ।
एकस्याप्यपराधेन देशः सर्वोऽपि रिच्यते ॥१५५
ठाकुरो हरिदासोऽथ व्रजंश्चन्द्रपुरं गतः ।
आचार्य्यबलरामस्य निवासे न्यवसत्ततः ॥१५६
गोवर्द्धनो हिरण्यश्च मध्यभूस्वामिना वुभौ ।
देशस्यास्तां तयो रेष बलरामः पुरोहितः ॥१५७
हरिदासे दृढ़ा-भक्तिस्तत्कृपाभाजनञ्च सः ।
यत्नेन स्थापयामास स्वग्रामे तत्र ठाकुरम् ॥१५८
निर्जने पर्णशालायां स कुर्वन्नामकीर्त्तनम् ।
आचार्य्यबलरामस्य गृहे भिक्षान्न मग्रहीत् ॥१५९
कुर्वन्नध्ययनं दासरघुनाथो हि वालकः ।
ठाकुरं हरिदासं सोऽन्वहमभ्येत्य दृष्टवान् ॥१६०
कृतवान् हरिदासोऽपि करुणां तत्र वालके ।
सैव तत्-करुणा तस्य चैतन्यप्राप्तिकारणम् ॥१६१
महिम्ना हरिदासस्य यथा तच्चाभवत्तथा ।
वक्ष्येऽहमद्भुताख्यानं भक्ताः शृण्वन्तु साम्प्रतम् ॥१६२
एकदा बलरामोऽसौ विनीताग्रहमाह्वयन् ।
ठाकुरं प्रापयामास तयोर्भूस्वामिनोः सभाम् ॥१६३
अथ तौ ठाकुरं दृष्ट्वाभ्युत्थाय च सहोदरौ ।
पतित्वा पादयोर्भक्त्या तस्मै ददतु रासनम् ॥१६४
सभायां पण्डिताः सर्वे ब्राह्मणाः सज्जनास्तथा ।
गोवर्द्धनो हिरण्यश्च भ्रातरौ पण्डितावुभौ ॥१६५
ऊचुस्ते हरिदासस्य गुणान् पञ्चमुखा इव ।
प्रापतु स्तौ सुखं तावत् परमं द्वौ सहोदरौ ॥१६६
त्रिलक्षसंख्यकं नाम सङ्कीर्त्तयति ठाकुरः ।
इति तै र्नाममाहात्म्यं पण्डितैः समुदाहृतम् ॥१६७

केचित्तत्र वदन्तिस्म नाम्नः पापक्षयो भवेत् ।
ऊचुः केचन जीवानां मोक्षो भवति नामतः ॥१६८
कथितं हरिदासेन नाम्नो नैतत् फलद्वयम् ।
फलं कृष्णपदे प्रेम नाम्न एवोपजायते ॥१६९

"तथाहि श्रीमद्भागवत एकादशस्कन्धे द्वितीयाध्यायेऽष्टत्रिंशः श्लोकः—

एवंव्रतः स्वप्रियनामकीर्त्या जातानुरागो द्रुतचित्त उच्चैः ।
हसत्यथो रोदिति रौति गायत्युन्मादवन्नृत्यति लोकबाह्यः ॥९॥"

मोक्षपापक्षयौ नाम्नो द्वे फले आनुषङ्गिके ।
युज्यते तत्र दृष्टान्तः प्रकाशः सवितु र्यथा ॥१७०

"तथाहि पद्यावल्यां पञ्चदशाङ्कधृत-श्रीधरस्वामिकृतः श्लोकः—

अंहः संहरदखिलं सकृदुदयादेव सकललोकस्य ।
तरणिरिव तिमिरजलधिं जयति जगन्मङ्गलं हरे र्नाम ॥१०॥"

क्रियतामर्थ एतस्य श्लोकस्य पण्डितैरिति ।
सर्वेऽप्यूचु स्त्वयैवार्थः स्पष्टं विव्रियतामिति ॥१७१
हरिदासस्ततोऽवादीदुदयः सवितुर्यथा ।
उदये न भवत्येव प्रारम्भे स्यात्तमःक्षयः ॥१७२
तस्कर-प्रेत-रक्षोभ्यो भयं नश्येच्च सर्वथा ।
धर्म्यकर्मप्रकाशस्तु सम्भवेदुदये सति ॥१७३
इत्थं नामोदयारम्भे पापादीनां क्षयो भवेत् ।
सति नामोदये कृष्णपदे प्रेमोपजायते ॥१७४
मुक्तिस्तुच्छं फलं सा तु नामाभासाच्च जायते ।
दित्स्यमानापि कृष्णेन मुक्तिर्भक्तैर्न गृह्यते ॥१७५

"तथाहि श्रीमद्भागवते षष्ठस्कन्धे द्वितीयाध्याय ऊनपञ्चाशः श्लोकः—

म्रियमाणो हरेर्नाम गृणन् पुत्रोपचारितम् ।
अजामिलोऽप्यगाद्धाम किमुत श्रद्धया गृणन् ॥११॥"

तथा तत्रैव तृतीयस्कन्ध ऊनविंशाध्याय एकादशः श्लोकः—

सालोक्य-सार्ष्टि-सारूप्य-सामीप्यैकत्वमप्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥१२॥"

गोपालचक्रवर्त्याख्यः कश्चिद् भूस्वामिनोस्तयोः ।
वेश्मन्युवास राजस्वप्रापणाधिकृतो द्विजः ॥१७६
राजस्वप्रापणं कुर्वन् गौड़स्थम्लेच्छभूपतेः ।
मुद्रा द्वादश लक्षाणि वार्षिकाणि निनाय तम् ॥१७७
सोऽतीव सुन्दराकारः पण्डितो नवयौवनः ।
नामाभासाद् भवेन्मुक्ति रिति श्रुत्वा न चक्षमे ॥१७८
अवादीत् परुषं वाक्य मसौ क्रोधवशं गतः ।
सिद्धान्तं भावुकस्येममाकर्णयत पण्डिताः ॥१७९
या मुक्ति र्जन्मकोट्यापि ब्रह्मज्ञानान्न जायते ।
नामाभासाद्भवेत् सैव मुक्तिरित्येष भाषते ॥१८०
जगाद हरिदासोऽथ संशयः क्रियते कथम् ।
शास्त्राण्याहुर्जनो नामाभासमात्रेण मुच्यते ॥१८१
यतो भक्तिसुखस्याग्रे मुक्ति स्तुच्छायते भृशम् ।
अतः श्रीभगवद्भक्तैः सा मुक्तिर्नैव गृह्यते ॥१८२

"तथाहि हरिभक्तिसुधोदये चतुर्दशाध्याये षट्त्रिंशः श्लोकः—

त्वत्-साक्षात्करणाह्लाद-विशुद्धाब्धि-स्थितस्य मे ।
सुखानि गोस्पदायन्ते ब्राह्मान्यपि जगद्गुरो ॥१३॥"

विप्रेण कथितं मुक्ति र्नामाभासाद् भवेन्न चेत् ।
तदा छेत्स्यामि ते नासामित्येवं कुरु निश्चयम् ॥१८३
हरिदासोऽवदन्नामाभासान्मुक्ति र्भवेन्न चेत् ।
तदा छेत्स्यामि मे नासामित्ययं मे सुनिश्चयः ॥१८४
इत्याकर्णाखिलाः सभ्या मुहुर्हाहेति चुक्रुशुः ।
तं विप्रं प्रोचतुर्धिग्धिक् तौ च भूम्यधिकारिणौ ॥१८५

तमेवं भर्त्सयामास बलरामः पुरोहितः ।
मूर्खो घटपटत्वात्मा त्वं भक्तिं वेत्सि रे कथम् ॥१८६

ठाकुरं हरिदासं त्वं यतोऽवज्ञातवानसि ।
भविता सर्वनाशस्ते ततः श्रेयो न लप्स्यसे ॥१८७

हरिदासे तदाकर्ण्योत्थाय प्रस्थातुमुद्यते ।
त्यक्तवन्तौ च तं विप्रमुभौ भूम्यधिकारिणौ ॥१८८

निपेतु र्हरिदासस्य पादयोस्ते सभासदः ।
हरिदासो हसन्नूचे मधुरं वचनञ्च तान् ॥१८९

युष्माकं नास्ति दोषोऽत्र विप्र एष तु बालिशः ।
एतस्यापि न दोषोऽस्ति तर्कनिष्ठं मनोऽस्य यत् ॥१९०

महिमा भगवन्नाम्नो नैव तर्कस्य गोचरः ।
तत्त्वान्येतानि सर्वाणि कथमेषोऽवगच्छतु ॥१९१

यूयं यात गृहं कृष्णः सर्वेषां शुभदोऽस्तु वः ।
दुःखितो मम सम्पर्कान्नैव कोऽपि भवत्विति ॥१९२

ततो हिरण्यदासेन गच्छता स्वं निकेतनम् ।
गृहद्वारप्रवेशात् स ब्राह्मणश्च निवारितः ॥१९३

तस्य विप्रस्य कोठोऽभूत् परं तस्माद्दिनत्रयात् ।
अत्युच्चा नासिका तस्य गलन्ती पतिताभवत् ॥१९४

अङ्गुल्यः करपादस्य चाम्पेयकलिकोपमाः ।
सर्वाः सङ्कोच मापन्नाः कोठाद्विगलिताः पुनः ॥१९५

तमालोक्य जनाः सर्वे बभूवु र्विस्मयान्विताः ।
हरिदासं प्रशंसन्तः प्रणेमु र्मनसा मुहुः ॥१९६

हरिदासे तु विप्रस्य दोषानगणयत्यपि ।
ईश्वरो भोजयामास फलं तस्य तथाविधम् ॥१९७

भक्तानां प्रकृति र्दोषानज्ञानां क्षमते मुहुः ।
भक्तनिन्दां न शक्नोति सोढ़ुं कृष्णः स्वभावतः ॥१९८

श्रुत्वा विप्रस्य तद्दुःखं हरिदासोऽतिदुःखितः ।
बलरामाय विज्ञाप्य ततः शान्तिपुरं ययौ ॥१६६
आचार्येणाथ सङ्गम्य दण्डवत् प्रणनाम तम् ।
अद्वैतोऽपि तमाश्लिष्य तदानीं बहुमन्यत ॥२००
गङ्गातीरे गुहां भित्त्वा रहस्तं वासयन्नसौ ।
भक्त्यर्थं भगवद्गीताव्याख्याम श्रावयच्च तम् ॥२०१
निवृत्तो तस्य भिक्षान्नेऽन्वह माचार्य्य-मन्दिरे ।
मिलित्वा तौ मिथः कृष्णकथास्वादं प्रचक्रतुः ॥२०२
एकदा हरिदासेन प्रोक्त मावेद्यते मया ।
गोस्वामिन् प्रत्यहं कस्माद्भिक्षान्नं प्रददासि मे ॥०३
ब्राह्मणानां कुलीनानां समाजे महतामिह ।
सत्यप्याद्रियमाणो मां मनसापि न लज्जसे ॥२०४
तवालौकिक माचारं ब्रुवन्नेवं विभेम्यहम् ।
तथा मामनुकम्पस्व यथा रक्षा भवेत्तव ॥२०५
तच्छ्रुत्वा वददाचार्य्यो भयं मा क्रियतां त्वया ।
तथैवाहं चरिष्यामि यथा शास्त्रमतं भवेत् ॥२०६
भवेत्त्वय्येव भुञ्जाने कोटिब्राह्मणभोजनम् ।
इत्युक्त्वा श्राद्धपात्रान्न मद्वैतस्तमभोजयत् ॥२०७
अथोद्धाराय विश्वेषा मित्थं सोऽचिन्तयत्तदा ।
मोक्ष्यते नु कथङ्कारं जगदेतदवैष्णवम् ॥२०८
अवतारयितुं कृष्णं प्रतिज्ञां कृतवानसौ ।
अद्वैतोऽर्च्चितु मारेभे तमम्भस्तुलसीदलैः ॥२०६
गुहायां हरिदासोऽपि कृतवान्नामकीर्त्तनम् ।
श्रीकृष्णोऽवतरिष्यत्येवेति तस्याप्यभून्मनः ॥२१०
द्वयोरेव तयोर्भक्त्या श्रीचैतन्योऽवतीर्णवान् ।
नाम-प्रेमप्रचारेण जगद्धृमुक्ताभ्यां सतम् ॥२११

हरिदासस्य चारित्र मन्यदेक मलौकिकम् ।
यदाकर्ण्य जनाः सर्वे भवन्त्येव चमत्कृताः ॥२१२

तर्कं मा कुरु नह्यस्य रीतिस्तर्कस्य गोचरः ।
आकर्ण्यतां सविश्रम्भं प्रतीत्या चानुकूलया ॥२१३

एकदा हरिदासोऽसावुपविष्टो गुहान्तरे ।
नाम-सङ्कीर्त्तनं प्रोच्चैः कुर्वन्नासीन्निरन्तरम् ॥२१४

तदासीद्रजनिर्ज्योत्स्नी निर्मलाश्च दिशोदश ।
अदेदीप्यन्त गङ्गाया लहर्यो ज्योत्स्नया तया ॥२१५

द्वारे श्रीतुलसीं सेव्यां वेदिमध्याधिरोपिताम् ।
गुहाशोभाञ्च पश्यन्तो जनास्तृप्तहृदोऽभवन् ॥२१६

अस्मिन्नवसरे काचिदङ्गनाङ्गन मागता ।
तदङ्गप्रभया सर्वं तत्क्षेत्रं पीततां गतम् ॥२१७

सौरभेण तदङ्गस्य सामोदा अभवन् दिशः ।
ध्वनिः श्रोत्र-चमत्कारी भूषणानां समुत्थितः ॥२१८

सेयं तत्र समागत्य तुलसीं प्राणमद्भुवि ।
ताञ्च प्रदक्षिणीकृत्य गुहाया द्वार माययौ ॥२१९

पादौ श्रीहरिदासस्य वन्दमाना कृताञ्जलिः ।
आसीना द्वारि सा किञ्चिन्मधुरं तमभाषत ॥२२०

जगतां वन्दनीयोऽसि गुणरूपसमृद्धिमान् ।
तव सङ्गार्थमेवाहमत्रेदानीमुपस्थिता ॥२२१

मामङ्गीकुरु साधो त्वं सानुकम्पेन चेतसा ।
नैसर्गिकी हि साधूनां दया दीनजनेष्विति ॥२२२

एतावद् ब्रुवती नानाभावान् सा तमदर्शयत् ।
येषां सन्दर्शनाद्धैर्य्यं मुनीनामपि नश्यति ॥२२३

हरिदासस्तु गम्भीराशयः शश्वदविक्रियः ।
तदा तां वक्तु मारेभे सदयेनैव चेतसा ॥२२४

संख्यया कीर्त्तनं नाम्नो महायज्ञो मतो मम ।
तत्र दीक्षित एवाहं तिष्ठामि प्रतिवासरम् ॥२२५
कीर्त्तनं पूर्य्यते यावत्तावन्नान्यत् करोम्यहम् ।
समाप्ते कीर्त्तने दीक्षा विश्रामं लभते मम ॥२२६
आसीना त्वमिह द्वारि नाम-सङ्कीर्त्तनं शृणु ।
पूर्णायां नामसंख्यायामाचरिष्यामि ते प्रियम् ॥१२७
इत्युक्त्वा हरिदासोऽसौ नामसङ्कीर्त्तनं जगौ ।
तत्रोपविशती सापि नाम शुश्राव कामिनी ॥२२८
कीर्त्तनं कुर्वतस्तस्य प्रभातायां क्रमान्निशि ।
नारी प्रभात मुद्वीक्ष्य प्रतस्थे तत उत्थिता ॥२२९
एवमेव समायाती सा नारी दिवसत्रयम् ।
अदर्शयद् बहून् भावान् ब्रह्मणोऽपि मनोहरान् ॥२३०
हरिदासः सदा कृष्ण-नामाविष्टमना अभूत् ।
तस्या भावप्रकाशोऽसौ बभूवारण्यरोदनम् ॥२३१
तृतीयस्य दिनस्यैवं रात्रिरन्तं गता यदा ।
ठाकुरं निकषा नारी तदा वक्तुं प्रचक्रमे ॥२३२
दिवसां स्त्रीन् समाश्वास्य त्वं मां वञ्चितवानसि ।
न समाप्तिं गता नामसंख्या नक्तन्दिनेऽपि ते ॥२३३
ठाकुरो हरिदासोऽथ प्रोचे किन्तु करोम्यहम् ।
नियमं कृतवानस्मि कथङ्कारं त्यजामि तम् ॥२३४
ततो नारी नमस्कृत्य ठाकुरं तमवोचत ।
अहं माया समायाता त्वामेवात्र परीक्षितुम् ॥२३५
ब्रह्माद्या निखिला जीवा मयैव खलु मोहिताः ।
नाहं मोहयितुं शक्ता त्वामेवैकन्तु केवलम् ॥२३६
महाभागवतोऽसि त्वं तवैवं दर्शनात्तथा ।
कृष्णसङ्कीर्त्तनस्यैवं श्रवणादपि त्वन्मुखात् ॥२३७

कृष्णनाम जिघृक्षामि चित्तं शुद्धं ममाधुना ।
मह्यं कृष्णोपदेशेन सदयो भव मां प्रति ॥२३८

श्रीचैतन्यावतारेऽस्मिन् प्रेमवन्या वहत्यहो ।
प्लवन्ते निखिला जीवाः प्रेम्णा धन्या वसुन्धरा ॥२३६

नानया वन्यया जीवः प्लवते यः स पामरः ।
कल्पकोट्यापि निस्तारस्तस्य नैव भविष्यति ॥२४०

पुरा सम्प्राप्तवत्यस्मि रामनाम शिवादहम् ।
ग्रहीतुं कृष्णनामास्मि लुब्धा सङ्गेन तेऽधुना ॥२४१

मुक्तये तारकब्रह्म रामनाम प्रवर्त्तते ।
पावनं कृष्णनामेदं ददाति प्रेमसम्पदम् ॥२४२

मां कृतार्थां विधेहि त्वं कृष्णनाम प्रयच्छ मे ।
महती प्रेमवन्येयं मामपि प्लावयेद् यथा ॥२४३

इत्युक्त्वा हरिदासस्य सा च पादाववन्दत ।
हरिदासोऽवदत् कृष्णनामसङ्कीर्त्तनं कुरु ॥२४४

इति लब्धोपदेशासौ माया प्रीतागमत्ततः ।
इत्यादिककथायां चेत् प्रतीति र्नोपजायते ॥२४५

ततः कारण मस्यात्र कथयामि प्रतीतये ।
शृण्वतां यद्धि सर्वेषां विश्वासो भवति ध्रुवम् ॥२४६

चैतन्यस्यावतारेऽत्र श्रीकृष्णप्रेमतृष्णया ।
पृथिव्यां लब्धजन्मानो ब्रह्मेश-सनकादयः ॥२४७

नृत्यन्तः कृष्णनामोक्त्वा प्लवन्ते प्रेमवन्यया ।
प्रह्लादो नारदश्चेत्य नरलोके प्रकाशितौ ॥२४८

श्रीकृष्ण-प्रेम-लोभेन प्राप्त-मानुषजन्मभिः ।
नामप्रेमरसास्वादः कृतो लक्ष्म्यादिभिः पुनः ॥२४६

का परेषां कथा श्रीमद्व्रजेन्द्रनन्दनः स्वयम् ।
नाम-प्रेम-रसास्वादं चकारावतरन्निह ॥२५०

प्रेम प्रार्थयते माया दासीति कोऽत्र विस्मयः ।
अकुर्वाणे कृपां साधौ प्रेम कृष्णे न जायते ॥२५१
इयं चैतन्यगोस्वामि-लीलायाः प्रकृतिर्भवेत् ।
लब्ध्वा प्रेमामृतं लोकत्रयं नृत्यति गायति ॥२५२
अथ कृष्णादयः सर्वे ये चान्ये स्थिरजङ्गमाः ।
कृष्णप्रेम्णा प्रमत्तास्ते कुर्वते कृष्णकीर्त्तनम् ॥२५३
इति स्वरूपगोस्वामी कड़चायां लिलेख याः ।
याश्चाहं श्रुतवान्दासरघुनाथमुखाम्बुजात् ॥२५४
निखिला एव ता लीलाः संक्षेपेण ब्रवीम्यहम् ।
लिखामि क्षुद्र-जीवोऽपि श्रीचैतन्यानुकम्पया ॥२५५
ठाकुर-हरिदासस्य महिमासौ मयोदितः ।
कर्णास्तृप्यन्ति भक्तानां यमाकर्णयतामिति ॥२५६
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२५७

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे श्रीहरिदासठाकुरमहिम्र-
कथनं नाम तृतीयः परिच्छेदः ।

—०—

अन्त्यलीलायां चतुर्थः परिच्छेदः

"वृन्दावनात् पुनः प्राप्तं श्रीगौरः श्रीसनातनम् ।
देहपातादवन् स्नेहाच्छुद्धं चक्रे परीक्षया ॥१॥"

श्रीचैतन्योमुहुर्जीयान्नित्यानन्दो जयत्वथ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
अथ नीलाचलाद्रूपे गौड़देश मुपागते ।
प्राप्तो नीलाचलं तावन्मथुरायाः सनातनः ॥२

एकाकी झारिखण्डीयपथेनैवागतो व्रजन् ।
कदाचिच्चणकांश्चर्वन् जातु कुर्वन्नुपोषणम् ॥३
झारिखण्डाम्बुदोषेण तथैवोपोषणेन च ।
जाता कण्डूर्गलत्-पूया खर्जनात्तत्कलेवरे ॥४
ततो निर्वेद मापन्नो मार्ग एव व्यचिन्तयत् ।
नीच-जातीयमत्यन्तासारमेतद्वपु र्मम ॥५
गत्वापि श्रीजगन्नाथं न लप्स्ये तस्य दर्शनम् ।
वीक्षितुं नापि शक्ष्यामि सर्वदा श्रीमहाप्रभुम् ॥६
मन्दिरं निकषा वासस्तस्येत्याकर्णितं मया ।
किन्तु नार्हाम्यहं गन्तुं मन्दिरस्यापि सन्निधौ ॥७
देव-कर्मानुरोधेन जगन्नाथस्य सेवकान् ।
भ्रमतस्तत्र तान् स्पृष्ट्वा सापराधो भवाम्यहम् ॥८
वरं तस्मात् क्षिपाम्येतद्वपुः पुण्यक्षितौ यदि ।
शममेष्यति दुःखं मे लप्स्येऽहं सद्गतिं तदा ॥९
जगन्नाथे वहिर्याते रथयात्रादिने पुनः ।
रथचक्रतले तस्य त्यक्ष्याम्येतत् कलेवरम् ॥१०
परमः पुरुषार्थोऽयं रथे त्यक्ष्यामि यद्वपुः ।
वीक्षमाणो जगन्नाथं पुरतश्च महाप्रभुम् ॥११
इत्येवं निश्चयं कृत्वा प्राप्यासौ नीलपर्वतम् ।
कुटीरं हरिदासस्य जनान् पृच्छन् समागमत् ॥१२
कृतवान् हरिदासस्य यदासौ पादवन्दनम् ।
तदा तं सोऽप्यभिज्ञाय समाशिश्लेष वक्षसा ॥१३
उत्कण्ठाकुलचित्तं तं दर्शनाय महाप्रभोः ।
हरिदासोऽब्रवीदेवं सम्प्रत्येवेष्यति प्रभुः ॥१४
अस्मिन्नवसरे दृष्ट्वोपान्न-भोगं महाप्रभुः ।
सङ्गन्तुं हरिदासेन तत्र भक्तैः सहाययौ ॥१५

निपेतुर्दण्डवद्भूमौ प्रभु मालोक्य तावुभौ ।
उत्थाप्य हरिदासन्तु समालिङ्गन्महाप्रभुः ॥१६
हरिदासो वभाषे तं नमत्येष सनातनः ।
ततः सनातनं दृष्ट्वा प्रभुरासीच्चमत्कृतः ॥१७
अग्रतोऽभिसरत्येव तमाश्लेष्टुं महाप्रभौ ।
अपक्रामन्नसौ पश्चादब्रवीत्तं सनातनः ॥१८
मा प्रभो स्पृश मां हन्त पादयोस्ते पताम्यहम् ।
एकतो मेऽधमा जाति र्गात्रे कोठरसोऽन्यतः ॥१६
इत्युक्तोऽपि समाश्लिष्यत्तं प्रसह्य महाप्रभुः ।
कण्डू-क्लेदै रलिप्यन्त श्रीमन्त्यङ्गानि तु प्रभोः ॥२०
अथ सङ्गमयामास प्रभुर्भक्तैः सनातनम् ।
कृतवानथ सर्वेषां स च पादाभिवन्दनम् ॥२१
उपविष्टे प्रभौ भक्तान् गृहीत्वा वेदिकोपरि ।
आसातां वेदिकामूले हरिदास-सनातनौ ॥२२
प्रभुणा कुशलप्रश्ने कृते प्रोचे सनातनः ।
परमं मङ्गलं मेऽद्य पादौ ते यन्मयेक्षितौ ॥२३
तेनासौ माथुराणाञ्च वैष्णवानामनामयम् ।
पृष्टो निवेदयामास सर्बेषां तत्र मङ्गलम् ॥२४
प्रभुः प्रोचेऽथ रूपोऽत्र दशमासानवस्थितः ।
इतो गोड़ं प्रयातस्य तस्याद्य दशमं दिनम् ॥२५
त्वदीयोऽनुपमो भ्राताऽनुजो वैकुण्ठमाप्तवान् ।
रघुनाथेऽभवत्तस्य भक्तिः साध्वी द्रढ़ीयसी ॥२६
ततः सनातनेनोक्तं जातो नीचकुलादहम् ।
तावन्मे कौलिकं कर्म धर्म-न्याय-विवर्जितम् ॥२७
त्यक्त्वा गर्हां कुले तस्मिन्मामङ्गीकृतवानसि ।
तवैव कृपया सर्वं कल्याणञ्च कुले मम ॥२८

शैशवात् प्रभृति भ्राता सोऽयं मेऽनुपमोऽनुजः ।
रघुनाथ मुपासीन आसीदेकान्तचेतसा ॥२६
सोऽजपद्रघुनाथस्य नाम ध्यायन्नहर्निशम् ।
श्रीरामायणमश्रौषीदगासीच्च निरन्तरम् ॥३०
अहं रूपश्च तस्यास्व जन्मना ज्येष्ठसोदरौ ।
द्वाभ्यामेव सहावाभ्यां सोऽवातिष्ठत सर्वदा ॥३१
अस्मत्तः श्रुतवान् कृष्णकथां भागवतञ्च सः ।
एकदावामुभावित्थमुक्तवन्तौ परीक्षितुम् ॥३२
श्रूयतां वल्लभ श्रीमन् कृष्णः परमसुन्दरः ।
असीमा स्तस्य सौन्दर्य्य-माधुर्य्य-प्रेमसम्पदः ॥३३
उभाभ्यां साकमावाभ्यां श्रीकृष्णं भज सर्वदा ।
स्थेयं कृष्ण-प्रसङ्गेन युगपद् भ्रातृभि स्त्रिभिः ॥३४
आवाभ्यामेवमुक्तस्य द्वाभ्यामेव पुनः पुनः ।
गौरवेणावयो स्तस्य प्रत्यावृत्तं मनो मनाक् ॥३५
तेनोक्तं युवयोराज्ञां लङ्घयिष्याम्यहं कथम् ।
कृष्णमेव भजे तावद्दीक्षामन्त्रः प्रदीयताम् ॥३६
इत्युक्त्वासौ तदा रात्रौ तस्यामेवं व्यचिन्तयत् ।
त्यजेयं रघुनाथस्य कथं श्रीचरणाविति ॥३७
एवं रोरुद्यमानोऽसौ सर्वां जाग्रच्च यामिनीम् ।
प्रात रावांमुपागच्छन्नेवमेव न्यवेदयत् ॥३८
विक्रीतं रघुनाथस्य पादपद्मे शिरो मया ।
तदाशक्नुवताच्छेतुं लभ्यते महती व्यथा ॥३९
कृपया तदुभावेव मामाज्ञापयतं युवाम् ।
सेविष्ये प्रतिजन्माहं रघुनाथपदाम्बुजम् ॥४०
रघुनाथस्य पादाब्जं परित्यक्तुं न शक्यते ।
प्राणा एव विदीर्य्यन्ते तत्त्यक्तु मनसोऽपि मे ॥४१

अथावाभ्यामुभाभ्यां स गाढ़ालिङ्गनपूर्वकम् ।
भक्तिः साध्वी दृढ़ा चेयं तवेत्युक्त्वा प्रशंसितः ॥४२
यस्मिन् वंशे वरीवर्त्ति कृपालेशस्तव प्रभो ।
खण्ड्यन्ते सकला क्लेशास्तस्य सर्वशुभोदयः ॥४३
अथ गोस्वामिना प्रोक्तं मुरारिगुप्त ईदृशः ।
एतदेव मतं तस्य मया पूर्वं परीक्षितम् ॥४४
भक्तः स एव धन्यः स्यात् प्रभोः पादौ त्यजेन्न यः ।
असावेव प्रभुर्धन्यो यो न मुञ्चेन्निजं जनम् ॥४५
सेवको यदि दुर्दैवाद् गच्छेदन्यत्र कुत्रचित् ।
तं केशेषु गृहीत्वैव धन्योऽसौ प्रभुरानयेत् ॥४६
साधु संवृत्तमत्र त्वं यदद्यागतवानसि ।
हरिदासेन सार्द्धं त्वं निवसात्र निकेतने ॥४७
कृष्णभक्तिरसज्ञाने परमप्रवरोह्ययम् ।
कुरु कृष्णरसास्वादं कृष्णनाम गृहाण च ॥४८
इत्युक्त्वा तत उत्थाय गत्वा च प्रभुरालयम् ।
प्रसादं प्रेरयामास गोविन्देन तयोः कृते ॥४९
एवं सनातन स्तिष्ठं स्तत्रादेशान्महाप्रभोः ।
जगन्नाथस्य चक्रं स विलोक्य प्रणनाम च ॥५०
प्रत्यहं प्रभुणागत्य स्वयं तावेव सङ्गतौ ।
इष्टगोष्ठ्या तथा कृष्णकथयास्तां कियच्चिरम् ॥५१
दिव्यं प्रसाद मानीय श्रीजगन्नाथमन्दिरात् ।
अवश्यं प्रददौ ताभ्यामुभाभ्भां प्रभुरन्वहम् ॥५२
एकदा प्रभुरागत्य ताभ्यां सम्मिलितोऽभवत् ।
ततः प्रचक्रमे वक्तु मतर्केण सनातनम् ॥५३
देहं त्यक्त्वापि लब्धव्यो नैव कृष्णः सनातन ।
नोचेत् कोटिरपि त्यक्तुं देहानां शक्यते क्षणात् ॥५४

देहत्यागान्न लभ्योऽसौ भजनादेव लभ्यते ।
नहि भक्तिं विना कृष्णलाभोपायोऽस्ति कश्चन ॥५५
देहत्यागादयः सर्वे एते धर्मा हि तामसाः ।
न रजस्तमसो धर्मात् कृष्णमर्मावगम्यते ॥५६
नहि कृष्णे विना भक्तिं जातु प्रेमोदयो भवेत् ।
कृष्णप्राप्ति र्विना प्रेम्णा नान्यतः सम्भवेदपि ॥४७

"तथाहि श्रीमद्भागवत एकादशस्कन्धे चतुर्दशाध्याय ऊनविंशः श्लोकः—

न साधयति मां योगो न साख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥२॥"

देहत्यागादिको धर्मस्तामसः पापकारणम् ।
न तेन प्राप्नुयात् कृष्णचरणौ जातु साधकः ॥५८
वियोगात् प्रेमिको भक्तः शरीरं त्यक्तुमिच्छति ।
स कृष्णं लभते प्रेम्णा मृत्युं न लभते ततः ॥५९
सोढ़ुं गाढ़ानुरागेण वियोगो नहि शक्यते ।
तदात्ममरणं तत्रानुरक्तः प्रतिपित्सते ॥६०

"तथाहि तत्रैव दशमस्कन्धे द्विपञ्चाशाध्याये पञ्चत्रिंशः श्लोकः—

यस्याङ्घ्रिपङ्कजरजःस्नपनं महान्तो
वाञ्छन्त्युमापतिरिवात्मतमोऽपहत्यै ।
यर्ह्यम्बुजाक्ष न लभेय भवत्प्रसादं
जह्यामसून् व्रतकृशान् शतजन्मभिः स्यात् ॥३॥"

तथा तत्रैवोनत्रिंशाध्याये द्वात्रिंशः श्लोकः—

सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हास्यावलोक-कल-गीतज-हृच्छयाग्निम् ।

नोचेद् वयं विरहजाग्न्युपयुक्त-देहा
ध्यानेन याम पदयोः पदवीं सखे ते ॥४॥"

तत् कुबुद्धिं परित्यज्य कुरु श्रवणकीर्त्तने ।
कृष्णप्रेमधनं तस्मादचिरादेव लप्स्यसे ॥६१
न भवेद् भजनायोग्यो नीचजातिः कदाचन ।
न च सत्कुलजातोऽपि विप्रो भजनमर्हति ॥६२
यो भजेत् स महानेव यस्त्वभक्तः स पामरः ।
न कृष्णभजने जातिकुलादीनां विचारणा ॥६३
कुरुते भगवान्दीनजनेष्वेवाधिकां दयाम् ।
अभिमानो भवेद् विद्या-कुल-वित्तवतां महान् ॥६४

"तथाहि श्रीमद्भागवते सप्तमस्कन्धे नवमाध्याये नवमः श्लोकः—

विप्राद्द्विषड् गुणयुतादरविन्दनाभ-
पादारविन्द-विमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पित-मनोवचनेहितार्थ-
प्राणं पुनाति स कुलं नतु भूरिमानः ॥५॥"

भजनेष्वपि सर्वेषु भक्तिः स्यान्नवधोत्तमा ।
कृष्णप्रेम च कृष्णञ्च दातुं शक्तिमती हि सा ॥६५
तन्मध्ये भवति श्रेष्ठं नाम-सङ्कीर्त्तनं हरेः ।
विन्देत् प्रेमधनं गृह्णन् नाम त्यक्तापराधकः ॥६६
इत्याकर्ण्य वचो दध्यौ विस्मयेन सनातनः ।
न मे मृत्युविचारस्य सौष्ठवं मन्यते प्रभुः ॥६७
ततोऽयमेव सर्वज्ञो निवारयति मामिति ।
ततस्तच्चरणौ धृत्वा स वक्तुमुपचक्रमे ॥६८
सर्वज्ञोऽसि कृपालुश्च स्वतन्त्रः परमेश्वरः ।
यथा नर्त्तयसि त्वं मां नृत्यामि काष्ठयन्त्रवत् ॥६९

अहं क्षुद्राशयो जाल्मः प्रकृत्या पामराधमः ।
को नु वा भविता लाभ स्तं मां जीवयतस्तव ॥७०
प्रभुणोक्तं त्वदीयोऽयं देहः स्वीयं धनं मम ।
पूर्वमेव त्वयैवात्मा मह्यमेव समर्पितः ॥७१
कथमेतत् परद्रव्यं विनाशयितुमिच्छसि ।
किं न कर्त्तुं समर्थोऽसि धर्माधर्मविवेचनम् ॥७२
तवैवेदं शरीरं मे साधनं सुमहत्तमम् ।
साधयिष्याम्यनेनैव भूयिष्ठं मे प्रयोजनम् ॥७३
भक्तभक्त्योस्तथा कृष्णप्रेम्णस्तत्त्व-निरूपणम् ।
वैष्णवैः करणीयानामाचाराणाञ्च निर्णयः ॥७४
कृष्णे भक्त्या तथा प्रेम्णा तत्सेवायाः प्रवर्त्तनम् ।
उद्धारो लुप्ततीर्थानां वैराग्यस्य च शिक्षणम् ॥७५
इत्येवं मथुरा-वृन्दावनयो र्निजयोर्मम ।
प्रिययोः क्षेत्रयोः कर्त्तुं कर्माणीच्छामि सर्वथा ॥७६
अत्र नीलाचले स्थित्वा मया मातुरनुज्ञया ।
तत्र शिक्षयितुं धर्मं स्वशक्त्या नैव शक्यते ॥७७
एतावन्निखिलं कर्म मया येन करिष्यते ।
तं देहं वाञ्छसि त्यक्तुं कथङ्कारमहं सहे ॥७८
ततः सनातनः प्रोचे नमस्तुभ्यं नमः प्रभो ।
को विज्ञातुं समर्थः स्याद् गम्भीरं हृदयं तव ॥७९
यथा मायाविना नर्त्यमाना दारव-पुत्तली ।
स्वयं नैव विजानाति किन्तु नृत्यति गायति ॥८०
यथा यं नर्त्तयस्येवं तथा नृत्यत्यसौ जनः ।
न वेद नर्त्यते केन कथं नृत्यत्यसा विति ॥८१
श्रूयतां हरिदासेति सम्बोध्य प्रभुर ब्रवीत् ।
परद्रव्यविनाशार्थ मभिकाङ्क्षत्ययं जनः ॥८२

परन्यस्तं धनं कोऽपि न भुङ्क्ते न ददाति च ।
निषेद्धव्यस्त्वया ष्येष नान्याय्यं कुरुते यथा ॥८३
हरिदासोऽथ तं प्रोचे मिथ्याहङ्कार माश्रितः ।
नैव बोद्धुं समर्थोऽस्मि गम्भीरं हृदयं तव ॥८४
न जाने त्वं कया द्वारा किं किं कर्मानुतिष्ठसि ।
अविज्ञप्तस्त्वया कोऽपि तन्न विज्ञातु मर्हति ॥८५
एवमेव त्वमेतं यदुररीकृतवानसि ।
अत्र कस्यापि सौभाग्यं न तथा सम्भवेदिति ॥८६
ततो महाप्रभुस्तौ द्वौ समालिङ्ग्य समुत्थितः ।
कर्त्तुं माध्याह्निकं कृत्यं प्रस्थानं कृतवांस्ततः ॥८७
हरिदासस्ततः प्रोचे समाश्लिष्य सनातनम् ।
तव सौभाग्यसीमा हि वदितुं नैव शक्यते ॥८८
तव देहो धनं स्वीयं ममेति प्रोक्तवान् प्रभुः ।
न त्वया सदृशः कोऽपि भाग्यवान् वर्त्तते जनः ॥८९
स्वेन देहेन यत्कर्म कर्त्तुं नालं महाप्रभुः ।
तस्यां श्रीमथुरायां तत्त्वामसौ कारयिष्यति ॥९०
सिध्यत्येव हि तत्कर्म यत् कर्त्तुं काङ्क्षतीश्वरः ।
एतत्तवैव सौभाग्य मिति निश्चितमुच्यते ॥९१
भक्तिसिद्धान्तशास्त्राणि तथाचारविनिर्णयम् ।
कारयिष्यत्यसौ देवस्त्वयेति ज्ञात आशयः ॥९२
देहोऽयं नोपयुक्तो मे कुत्रापि प्रभुकर्मणि ।
भारतक्षेत्रजातोऽपि यातोऽयं व्यर्थतामिति ॥९३
ततः सनातनः प्रोचे वर्त्तते कस्त्वया समः ।
महाभाग्यस्त्वमेवासि गणेष्वपि महाप्रभोः ॥९४
तस्यावतारकार्य्यं हि नाम्न एव प्रचारणम् ।
त्वया द्वारैव तत्कार्य्यं स्वकीयं कुरुते प्रभुः ॥९५

तन्नाम जप्यते लक्षत्रयकृत्वोऽन्वहं त्वया ।
सर्वेषामग्रतो नाम्नो महिमा च निगद्यते ॥९६
करोति स्वयमाचारं कोऽपि नैव प्रचारणम् ।
कुरुतेऽन्यः प्रचारन्तु न तथाचरति स्वयम् ॥९७
आचारञ्च प्रचारञ्च नाम्नः कार्य्यद्वयं पुनः ।
करोषि त्वं जगत्पूज्यो निखिलानां गुरुस्ततः ॥९८
एवं नाना कथारङ्गं कुर्वन्तौ तौ परस्परम् ।
कृष्णप्रसङ्गमास्वाद्य तस्थतु र्युगपत्तदा ॥९९
सर्वे गौड़स्थिता भक्ता यात्राकाले समागताः ।
पूर्ववद्ददृशुस्तत्र समवेता रथोत्सवम् ॥१००
तथैव कृतवान्नृत्यं रथस्याग्रे महाप्रभुः ।
दृष्ट्वा सनातन स्तच्च चमत्कृतमना अभूत् ॥१०१
ऊषुस्ते चतुरो मासान् गौड़भक्तगणाः प्रभोः
सर्वैः सम्मेलयामास प्रभुस्तैश्च सनातनम् ॥१०२
नित्यानन्दस्तथाद्वैतः पण्डितश्च गदाधरः ।
श्रीवास-जगदानन्द-वक्रेश्वर-मुरारयः ॥१०३
स्वरूपो वासुदेवश्च श्रीदामोदर-राघवौ ।
पुरी च भारती सार्वभौमः काशीश्वरस्तथा ॥१०४
रामानन्दश्च गोविन्दो भक्तास्ते शङ्करादयः ।
इत्येतैः प्रभुणा सर्वैं र्मेलितोऽभूत् सनातनः ॥१०५
यथार्हं कारिते तेन सर्वेषां पादवन्दने ।
सर्वैस्तं कारयामास करुणाभाजनं प्रभुः ॥१०६
स सर्वेषां प्रियोह्यासीत् पाण्डित्येन च सद्गुणैः ।
यथायोग्यं कृपा-मैत्री-गौरवाणाञ्च भाजनम् ॥१०७
वैष्णवेष्वथ सर्वेषु गौड़ं प्रतिगतेष्वसौ ।
तस्थौ तत्र प्रभोः पादौ वन्दमानः सनातनः ॥१०८

दोलयात्रादिपर्वाणि पश्यतः प्रभुणा सह ।
प्रत्यहं ववृधे तस्य परमानन्द आत्मनि ॥१०६

पूर्वस्मिन् मासि वैशाखे यदायातः सनातनः ।
परीक्षां कृतवांस्तस्य ज्यैष्ठे मासि महाप्रभुः ॥११०

प्रभु र्यमेश्वरोद्यानं ज्यैष्ठे मासे प्रयातवान् ।
भक्तानामनुरोधेन तत्र भिक्षान्न मग्रहीत् ॥१११

भिक्षाकालेऽथ मध्याह्ने तेनाहूतः सनातनः ।
आनन्दो ववृधे तस्य प्रभोराह्वानमाप्नुवन् ॥११२

मध्याह्नेऽग्निसमा जाताः समुद्रतटवालुकाः ।
तेन सैकतमार्गेण प्रतस्थेऽसौ सनातनः ॥११३

आहूतः प्रभुणास्मीति स चानन्दितमानसः ।
न तप्तवालुकादग्धावपि पादावमन्यत ॥११४

दाहस्फोटपरिव्याप्तपादयुग्मोऽप्युपेयिवान् ।
तत्र गृहीतभिक्षान्नं विश्राम्यन्तं महाप्रभुम् ॥११५

गोविन्दोऽथ ददौ तस्मै भिक्षाशेषान्नभाजनम् ।
प्रभोः पार्श्वं ययौ लब्ध्वा प्रसादं स सनातनः ॥११६

अपृच्छत् प्रभु रायातः पथा केन सनातन ।
समुद्रसैकतेनैव पथेत्यूचे सनातनः ॥११७

पृष्टोऽसौ प्रभुणा तप्तसैकतेनागतः कथम् ।
सिंहद्वारस्य मार्गेण शीतलेन कथं न वा ॥११८

तप्ताभिः सिकताभिस्ते व्रणा जाताः पदद्वये ।
चलितुं नैव शक्नोषि कथं वा सोढ़वानसि ॥११९

ततः सनातनेनोक्तं न बहु व्यथितोऽस्म्यहम् ।
पादयोर्मे व्रणा जाता इति नाह मवेदिषम् ॥१२०

सिंहद्वार मुपेतुं मे नाधिकारोऽस्ति कश्चन ।
प्रचरन्ति यतस्तत्र जगन्नाथस्य सेवकाः ॥१२१

गमनागमनैस्तेषा मवकाशो न विद्यते ।
सर्वनाशो भवत्येव दैवात्तान् स्पृशतो मम ॥१२२
इति तद्वच आकर्ण्य सन्तुष्टोऽभून्महाप्रभुः ।
ततस्तुष्टमनाः किञ्चित्तं वक्तुमुपचक्रमे ॥१२३
अपि चेदसि सर्वेषां जगतामपि पावनः ।
तव स्पर्शात् पवित्राः स्युर्मुनयो देवता अपि ॥१२४
भक्तास्तथापि मर्य्यादां रक्षन्त्येव स्वभावतः ।
अलङ्कारो हि साधूनां मर्य्यादापरिपालनम् ॥१२५
यात्यतिक्रम्य मर्य्यादां साधु र्लोकोपहास्यताम् ।
अयं लोकः परश्चेति द्वौ लोकौ तस्य नश्यतः ॥१२६
सन्तुष्यति मनो मेऽद्य मर्य्यादा रक्षिता त्वया ।
त्वय्यप्येवमकुर्वाणे कः कुर्य्यादपरो जनः ॥१२७
इत्येवं कथयन्नेव समाशिश्लेष तं प्रभुः ।
कण्डू-पूय-द्रवस्तस्य लगितः प्रभुविग्रहे ॥१२८
मुहुर्निषिध्यमानोऽपि तमाश्लिष्यन्महाप्रभुः ।
स्व-कण्डू-पूय-संसक्त्या दुःखं प्राप्नोत् सनातनः ॥१२६
एवं प्रभुश्च शिष्यश्च स्वंस्वं वासं गतावुभौ ।
अन्येद्यु र्जगदानन्द उपागच्छत् सनातनम् ॥१३०
उपविष्टौ च तौ कृष्णकथागोष्ठीं प्रचक्रतुः ।
ततः सनातनो दुःखं पण्डिताय न्यवेदयत् ॥१३१
दृष्ट्वा प्रभुमहं दुःखं नाशयिष्यन्निहागतः ।
आसीच्चेतसि या वाञ्छा प्रभुणा सापि वारिता ॥१३२
मुहुर्निवार्य्यमाणोऽपि मां परिष्वजते प्रभुः ।
मम कण्डू-द्रवस्तस्य श्रीमदङ्गानि लिम्पति ॥१३३
अतो जातापराधस्य निस्तारो मे न विद्यते ।
दुःखं मे जायतेऽनन्तं जगन्नाथमपश्यतः ॥१३४

स्वहितायागतस्यापि जातो मे तद्विपर्य्ययः ।
निश्चेतुं नापि शक्नोमि हितं केन भवेदिति ॥१३५
तमूचे पण्डितो वासयोग्यं वृन्दावनं तव ।
रथयात्रा मिहालोक्य तत्र प्रस्थीयतां त्वया ॥१३६
अभवच्च प्रभो राज्ञा युवां द्वावेव सोदरौ ।
तत्र वृन्दावने वासं सुखेनैव करिष्यथः ॥१३७
ईप्सितं प्रभुपादाब्जदर्शनं प्राप्तवानसि ।
रथे दृष्ट्वा जगन्नाथं त्वया प्रस्थीयतामिति ॥१३८
प्रोचे सनातनः सम्यगुपदेशः कृतस्त्वया ।
तत्र यास्यामि देशोऽसौ प्रभुणा मे समर्पितः ॥१३९
इत्युक्ते तावुभौ यातावुत्थाय स्वस्वकर्मणे ।
आजगामापरेद्युश्च मेलनार्थं महाप्रभुः ॥१४०
वन्दितौ हरिदासेन प्रभोः श्रीचरणौ ततः ।
सप्रेमालिङ्गनं तस्मै प्रददौ च महाप्रभुः ॥१४१
सुदूरादेव कुर्वन्तं प्रणिपातं सनातनम् ।
भूयोभूयस्तमाश्लेष्टु माजुहाव महाप्रभुः ॥१४२
सोऽपराधभये नैव मेलितुं नागतो यदा ।
तदा मेलितु मागच्छन्निकषा तं महाप्रभुः ॥१४३
ततः पश्चादपक्रम्य प्रसरन्तं सनातनम् ।
गृहीत्वा सवलात्कारं तमाश्लिष्यन्महाप्रभुः ॥१४४
तावादाय ततोऽलिन्दमध्यासीने महाप्रभौ ।
सनातनोऽतिनिर्विण्णो वक्तुमित्थं प्रचक्रमे ॥१४५
श्रेयसेऽहमिहायातस्तद्विपर्य्यासमाप्तवान् ।
अयोग्य स्तव सेवायामपराध्यामि सर्वदा ॥१४६
नीचजातिस्वभावेन दुष्टोऽहं कल्मषाशयः ।
अपराधो भवत्येव संस्पृष्टस्य त्वया मम ॥१४७

ततो भूयो मदङ्गाच्च पूयस्रावो भवत्ययम् ।
लग्नेऽप्यस्मिं स्तवाङ्गेषु स्पृशसि त्वं प्रसह्य माम् ॥१४८
वीभत्सं स्पृशतोऽप्यङ्गं घृणालेशोऽपि नास्ति ते ।
अनेनैवापराधेन सर्वनाशो भवेन्मम ॥१४९
न भविष्यति कल्याणं तस्मादत्र स्थितस्य मे ।
आज्ञापय रथं दृष्ट्वा यामि वृन्दावनं ततः ॥१५०
युक्तिं तावन्मया पृष्टो जगदानन्दपण्डितः ।
बृन्दावन-प्रयाणाय सोऽपि मामुपदिष्टवान् ॥१५१
इति तद्वच आकर्ण्य क्रुद्धान्तःकरणः प्रभुः ।
जगदानन्द मुद्दिश्य रोषादेवमभत्सयत् ॥१५२
गर्वमित्थं वहत्येष ह्यस्तनो वटुको जगाः ।
युष्मानारभते सर्वानुपदेष्टु मपि स्वयम् ॥१५३
आचारे परमार्थे च त्वमेवास्य गुरु र्यथा ।
न जानात्यात्मनो मूल्यं त्वामप्युपदिशत्ययम् ॥१५४
त्वं ममाप्युपदेष्टासि सम्मतश्च प्रमाणवित् ।
त्वामप्युपदिशन् वाल इत्थं कर्म करोत्ययम् ॥१५५
इत्याकर्ण्य प्रभोः पादौ गृह्णन्नूचे सनातनः ।
भाग्यवान् जगदानन्द इत्यद्य विदितं मम ॥१५६
आत्मनोऽपि यथाभाग्यं विज्ञात मधुनैव मे ।
जगत्यां जगदानन्दसमः कोऽपि न भाग्यवान् ॥१५७
पाय्यते जगदानन्द आत्मीयत्वसुधां त्वया ।
पाय्येऽहं स्तुति-सम्मान-निम्व-निर्गुण्ठिकारसम् ॥१५८
अद्याप्यात्मीयताबोधः सञ्जातो नैव ते मयि ।
अहोवत ममाभाग्यं स्वतन्त्रो भगवानसि ॥१५९
इति श्रुत्वाभवल्लज्जमानचित्तोमहाप्रभुः ।
किञ्चिद्भाषितु मारेभे तोषयिष्यन् सनातनम् ॥१६०

त्वत्तो न जगदानन्दो जातु प्रियतरो मम ।
मर्य्यादातिक्रमं सोढ़ुं न शक्नोमि कथञ्चन ॥१६१

क्व त्वं प्रामाणिकः सर्वशास्त्रेष्वपि विशारदः ।
क्व चासौ जगदानन्दो ह्यस्तनो वटुको नवः ॥१६२

ममापि बोधने शक्ति र्विद्यते ते महीयसी ।
बोधितोऽस्मि त्वया भक्तिव्यवहाराननेकशः ॥१६३

त्वामप्युपदिशत्येष मया सोढ़ुं न शक्यते ।
अतएव कृतं तस्य तथोपक्रोशनं मया ॥१६४

वहिरङ्गावबोधेन न त्वां स्तौमि सनातन ।
स्तावयन्ति गुणास्ते मां त्वमित्थं गुणवानसि ॥१३५

अपि चेद्बहुलोकेषु ममता कस्यचिद्भवेत् ।
प्रीत्याः स्वभावतः क्वापि कोऽपि भावः प्रजायते ॥१६६

तव वीभत्सताज्ञानं जातं निजकलेवरे ।
अमृतेन समानन्तु तदेव प्रतिभाति मे ॥१६७

अप्राकृतं शरीरं ते न जातु प्राकृतं भवेत् ।
तथापि प्राकृतं ह्येतदिति बुद्धिस्तवोदिता ॥१६८

न मयापेक्षितुं शक्यो देहोऽयं प्राकृतोऽपि ते ।
नास्ति भद्रमभद्रं वा प्राकृतं वस्तु किञ्चन ॥१६९

"तथाहि श्रीमद्भागवत एकादशस्कन्धेऽष्टाविंशाध्याये चतुर्थः श्लोकः —

किं भद्रं किमभद्रं वा द्वैतस्यावस्तुनः कियत् ।
वाचोदितं तदनृतं मनसा ध्यातमेव वा ॥६॥"

भद्राभद्रे इति द्वैतज्ञानं धर्मो हि मानसः ।
इदं भद्रमदोऽभद्रमित्येवं धीर्भवेद् भ्रमः ॥१७०

"तथाहि श्रीमद्भगवद्गीतायां पञ्चमाध्यायेऽष्टादशः श्लोकः—

विद्या-विनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥७॥

तथा तत्रैव षष्ठाध्यायेऽष्टमः श्लोकः—

ज्ञान-विज्ञान-तृप्तात्मा कूटस्थो विजितेन्द्रियः ।
युक्त इत्युच्यते योगी सम-लोष्ट्राश्मकाञ्चनः ॥८"

अहमस्मि तु सन्न्यासी धर्मो मे समदृष्टिता ।
पङ्क-चन्दनयो र्ज्ञानं समानं हि भवेन्मम ॥१७१

अतएव तव त्यागो मया जातु न युज्यते ।
नश्यत्येव निजोधर्मो जुगुप्सां कुर्वतो मम ॥१७२

हरिदासस्ततः प्रोचे यदुक्तं भवता प्रभो ।
वाह्यं प्रतारणावाक्यं तन्न युक्तं मतं मम ॥१७३

अधमान् मादृशान् यस्मात्त्वमङ्गीकृतवानसि ।
तेन दीनदयालुत्वं स्वभावस्ते प्रवर्त्तते ॥१७४

हसता प्रभुणाथोक्तं हरिदाससनातनौ ।
श्रूयतां वच्मि वां तत्त्वं युवयो र्मे मनो यथा ॥१७५

अहं मन्ये युवां लाल्यावात्मानञ्चैव लालकम् ।
दोषाँल्लाल्यस्य नेच्छेत लालको हि कदाचन ॥१७६

आत्मान मपि मन्येऽहं युवाभ्यामप्यमान्यवत् ।
युवामप्यभिमन्येऽहमात्मीयौ वालकाविव ॥१७७

तनयस्य पुरीषेऽपि लग्ने मातुः कलेवरे ।
घृणा तस्या न जायेत प्रत्युत स्यान्महत् सुखम् ॥१७८

लालको मन्यते लाल्यविष्ठां चन्दनपङ्कवत् ।
क्लेदः सनातनस्यायं घृणां मे जनयेत् कथम् ॥१७९

हरिदासस्ततोऽवादीदीश्वरस्त्वं दयामयः ।
हृदयं तव गम्भीरं विज्ञातुं नैव शक्यते ॥१८०

कीटाकीर्णगलत् कुष्ठं वासुदेव मपि प्रभो ।
त्वमालिङ्गितवान् गाढ़ं सानुकम्पेन चेतसा ॥१८१
तमालिङ्ग्यैव कन्दर्पतुल्याङ्गं कृतवानसि ।
न मया शक्यते बोद्धुं करुणा-लहरी तव ॥१८२
प्रभुणोक्तं न जातु स्यात् प्राकृतं वैष्णवाङ्गकम् ।
भक्तदेहश्चिदानन्दमयोह्यप्राकृतो भवेत् ॥१८३
दीक्षाकाले यदा भक्तः करोत्यात्मसमर्पणम् ।
श्रीकृष्णो विदधात्येव तं तदैवात्म-सम्मितम् ॥१८४
तस्य देहे तथा तेन चिदानन्दमये कृते ।
तेनाप्राकृतदेहेन तत्पादौ भजते च सः ॥१८५

"तथाहि श्रीमद्भागवत एकादशस्कन्ध ऊनत्रिंशाध्याये
द्वात्रिंशः श्लोकः—

मर्त्यो यदा त्यक्त-समस्तकर्मा
निवेदितात्मा विचिकीर्षितो मे ।
तदामृतत्वं प्रतिपद्यमानो
मयात्मभूयाय च कल्पते वै ॥६॥"

सनातनस्य देहेऽस्मिन् कण्डूरुत्पादयन्निमाः ।
मह्यं प्रेरितवानेतं श्रीकृष्णो मां परीक्षितुम् ॥१८६
अहं नालिङ्गयिष्यं चेदेनं मत्वा जुगुप्सितम् ।
अपराधोऽभविष्यन्मे तदा श्रीकृष्णपादयोः ॥१८७
अयं पारिषदो देहो दुर्गन्धो नैव सम्भवेत् ।
चतुःसमस्य सौगन्ध्यं प्राप्तोऽस्मि प्रथमे दिने ॥१८८
वस्तुतस्तु समाश्लिस्यत्तं यदैव महाप्रभुः ।
तदा प्रभृति तत्स्पर्शाद् गन्धोऽभूच्चन्दनोपमः ॥१८९
अथोक्तं प्रभुणा दुःखं मा मन्यस्व सनातन ।
त्वां परिष्वजमानोऽहं प्राप्नोम्येव महत् सुखम् ॥१९०

वर्त्तमानमिदं वर्षं निवसात्र मया सह ।
अत्ययेऽस्य मया वृन्दावनाय प्रेरयिष्यसे ॥१६१

इत्युक्त्वा च प्रभुर्भूयस्तमालिङ्गत् सनातनम् ।
कण्डूर्लुप्ता तदैवास्य देहश्चाभूत् सुवर्णवत् ॥१६२

हरिदासोऽथ तद्दृष्ट्वा विस्मयाक्रान्तमानसः ।
प्रभुं भाषितु मारेभे तवैवेदं छलं प्रभो ॥१६३

झारिखण्डस्य तद्वारि त्वमेवेममपाययः ।
वारिणा तेन देहेऽस्य त्वं कण्डूरुदपादयः ॥१६४

सनातनस्य कण्डूभिः परीक्षां कृतवानसि ।
लीलाभङ्गी त्वदीयेयं न केनापीह बुध्यते ॥१६५

ताबुभौ तत आलिङ्ग्य निजावासं गते प्रभौ ।
ऊचतुस्तौ महाप्रेममयात्मानौ प्रभोर्गुणान् ॥१६६

इत्थं सनातनस्तस्थौ सन्निधाने महाप्रभोः ।
संलपन् हरिदासेन कृष्णचैतन्यसद्गुणान् ॥१६७

दोलयात्रां विलोक्याथ व्यसृजत्तं महाप्रभुः ।
अशिक्षयच्च तं वृन्दावने कृत्यानि कृत्स्नशः ॥१६८

लब्धानुज्ञे प्रभोः पादात्तस्मिन् प्रस्थातुमुद्यते ।
उभयोरेव विच्छेददशासीद्वागगोचरः ॥१६६

येनारण्यपथेनैव प्रभु वृन्दावनं ययौ ।
अमुनैव पथा गन्तु मभ्यकाङ्क्षत् सनातनः ॥२००

या या लीलाः प्रभोरासन् यासु ग्रामनदीषु च ।
पथि यत्र लिखन् सर्वं बलभद्रात् स चाग्रहीत् ॥२०१

तत्र तत्र प्रभोर्भक्तै र्मिलित्वा निखिलैः सह ।
तास्ता लीलाभुवः पश्यन्नमुनैव पथा ययौ ॥२०२

पथि याः कृतवाँल्लीला यत्र यत्र स्थले प्रभुः ।
तत्तद्दृष्ट्वाभवत् प्रेमाविष्टचित्तः सनातनः ॥२०३

एवमेव व्रजन् बृन्दावनं प्रापत् सनातनः ।
पश्चात्तत्र गतो रूपगोस्वामी तेन सङ्गतः ॥२०४
रूपगोस्वामिना गौड़े वर्षमेकं चिरायितम् ।
कुटुम्बाना मवस्थान-धन-वण्टं प्रकुर्वता ॥२०५
यावन्तोऽर्थाः स्थिता गौड़े सर्वानानीय तावतः ।
कुटुम्बेषु च विप्रेषु ददौ देवालयेषु च ॥२०६
पूर्वसङ्कल्पितं सर्वं गोस्वामी निरवाहयत् ।
ततो निश्चिन्तचित्तोऽसौ ब्रुन्दारण्यं समाययौ ॥२०७
वृन्दारण्यकृतावासौ सङ्गतौ द्वौ सहोदरौ ।
निरवाहयतां सर्वं प्रभुणाज्ञापितं पुरा ॥२०८
उद्धृत्य लुप्ततीर्थानि नानाशास्त्रानुसारतः ।
श्रीमद्वृन्दावने कृष्णसेवा ताभ्यां प्रकाशिता ॥२०९
चक्रे सनातनो ग्रन्थं नाम्ना भागवतामृतम् ।
कृष्णस्य भक्त-भक्त्योश्च तत्त्वं विज्ञायते यतः ॥२१०
रचयामास सिद्धान्तसारं दशमटिप्पनीम् ।
ज्ञायन्ते हि यतः कृष्णलीलाप्रेमरसाः सुखम् ॥२११
हरिभक्तिविलासाख्यं वैष्णवाचारपुस्तकम् ।
रचितं तेन कृत्यानि लभ्यन्ते वैष्णवै र्यतः ॥२१२
यावन्योऽन्ये कृता ग्रन्थाः कस्तान् गणयितुं क्षमः ।
सेवा मदनगोपाल-गोविन्दयोः प्रकाशिता ॥२१३
रसामृतसिन्धुसारो रूपगोस्वामिना कृतः ।
कृष्णभक्तिरसानां हि विस्तारो यत्र लभ्यते ॥२१४
उज्ज्वल-नील-मण्याख्यो ग्रन्थोऽन्यस्तेन निर्मितः ।
श्रीराधाकृष्णयो र्लीलारसान्तो लभ्यते यतः ॥२१५
विदग्धमाधवं नाम तथा ललितमाधवम् ।
नाटकद्वितयं चक्रे कृष्णलीलारसाप्लुतम् ॥२१६

स दानकेलिकौमुद्यादिकान् ग्रन्थान् सहस्रशः ।
चक्रे येषु विचार्य्यन्ते सर्वे व्रजरसाः किल ॥२१७

तयोरासील्लघुभ्राता वल्लभोऽनुपमाभिधः ।
श्रीजीवाख्यो हि तत्-पुत्रः पण्डितानां महत्तमः ॥२१८

सोऽप्येवं त्यक्तसर्वस्वः पश्चाद्वृन्दावनं गतः ।
सोऽपि प्राचारयद्भक्तिशास्त्राणि सुबहून्यपि ॥२१९

स भागवतसन्दर्भं ग्रन्थसारञ्च निर्ममे ।
श्रीभागवतसिद्धान्तसीमा तत्रैव लभ्यते ॥२२०

ग्रन्थं निर्माय गोपालचम्पूं नाम स चापरम् ।
व्रजस्य प्रेमलीलाश्च रसान् सर्वानदर्शयत् ॥२२१

षट्सन्दर्भे कृतं कृष्णप्रेमतत्त्वनिरूपणम् ।
एवं विस्तारितं द्वाभ्यां ग्रन्थलक्षचतुष्टयम् ॥२२२

जीवगोस्वामिना गौड़ान्मथुरां गन्तुमिच्छता ।
नित्यानन्दं प्रभुं गत्वा याचितानुमति स्ततः ॥२२३

प्रभुः प्रीत्या निधायास्य मूर्द्ध्नि स्वचरणाम्बुजम् ।
आश्लेषं ज्ञापयामास प्रति रूपसनातनौ ॥२२४

तत आज्ञापयच्चैनं याहि बृन्दावनं लघु ।
प्रभुर्हि तव बंशाय तत्क्षेत्रं दत्तवानिति ॥२२५

आज्ञां लब्ध्वा प्रभो र्लेभे फलं तस्या इहागतः ।
भक्तिं प्राचारयच्छास्त्रं रचयन् स कियच्चिरम् ॥२२६

एतद् गुरुत्रयं सारो दासश्च रघुनाथकः ।
एषां पादानहं वन्दे सर्वेषामस्मि किङ्करः ॥२२७

पुनस्ताक्न्मयोक्तोऽयं श्रीसनातनसङ्गमः ।
यमेवाकर्णयन्नस्मि ज्ञातवानाशयं प्रभोः ॥२२८

चैतन्यचरितं ह्येतदिक्षुदण्डसमं भवेत् ।
चर्व्यमाणस्य तस्यैव रस आस्वाद्यते यतः ॥२२९

आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥२३०

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे पुनः सनातनसङ्गोत्सवो नाम चतुर्थः परिच्छेदः।

—o—

अन्त्यलीलायां पञ्चमः परिच्छेदः

"वैगुण्य-कीट-कलितः पैशुन्य-व्रण-पीड़ितः।
दैन्यार्णवे निमग्नोऽहं चैतन्य-वैद्यमाश्रये ॥१॥"
जीयाच्छ्रीकृष्णचैतन्यः शचीसूनुर्मुहुर्मुहुः।
नित्यानन्दप्रभुर्जीयाद्भूयोभूयः कृपामयः ॥१
जीयात् कृपाब्धिरद्वैतो जीयाद्भक्तगणः प्रभोः।
गदाधरः स्वरूपश्च तथा रूपसनातनौ ॥२
प्रभोः श्रीचरणावेत्य प्रद्युम्नोमिश्र एकदा।
दण्डवत् प्रणमन् किञ्चिदेवमेव न्यवेदयत् ॥३
अधमोऽहं गृहस्थानां दीनोऽस्मि श्रूयतां प्रभो।
प्राप्तः केनापि भाग्येन दुर्लभौ चरणौ तव ॥४
श्रीमत्कृष्णकथां श्रोतुं लालसा मम जायते
अतः कृष्णकथां देव ब्रूहि मामनुकम्पया ॥५
प्रभुरूचे न जानामि श्रीमत्कृष्णकथामहम्।
रामानन्दो हि जानाति तन्मुखाच्छ्रूयते मया ॥६
सौभाग्यं ते यतः कृष्णकथां शुश्रूषते मनः।
रामानन्दमुपागत्य तामाकर्णय सर्वथा ॥७
रुचिः कृष्णकथायां ते जाता सौभाग्यवानसि।
तत्-कथा रोचते यस्मै भुवि स एव भाग्यवान् ॥८

"तथाहि श्रीमद्भागवते प्रथमस्कन्धे द्वितीयाध्यायेऽष्टमः-

श्लोकः—

धर्मः स्वनुष्ठितः पुंसा विष्वक्सेनकथासु यः ।
नोत्पादयेद् यदि रतिं श्रम एव हि केवलम् ॥२॥"
ततः प्रद्युम्नमिश्रोऽसौ रामानन्दालयं गतः ।
तमुपावेशयत् कोऽपि रामानन्दस्य सेवकः ॥६
रामानन्द मनालोक्य पृष्टो मिश्रेण सेवकः ।
सर्वं रायस्य बृत्तान्तं स तं वक्तुं प्रचक्रमे ॥१०
वर्त्तेते देवकन्ये द्वे सौन्दर्य्यं परमं गते ।
कैशोरकवयः प्राप्ते निपुणे नृत्यगीतयोः ॥११
ते उभे निभृतोद्यानं स्वयं राय उपानयन् ।
निजनाटकगीतानि नर्त्तयन् शिक्षयत्यमू ॥१२
भवां स्तिष्ठत्विहासीनः सोऽचिरादागमिष्यति ।
भवताज्ञाप्यमानोऽसौ यथादेशं करिष्यति ॥१३
ततः प्रद्युम्नमिश्रेण तत्रोपविशता स्थितम् ।
श्रीरामानन्दरायस्तु समादायैव ते उभे ॥१४
कुर्वन्नासीत् स्वहस्तेन तयोरभ्यङ्गमर्दने ।
स्नापयंस्ते स्वहस्तेन तयोरङ्गान्यमार्जयत् ॥१५
स्वहस्तेन तयोर्वासो वासयन् भूषयन्नपि ।
सर्वाण्यङ्गानि रायोऽभून्निर्विकारमनास्तदा ॥१६
काष्ठपाषाणयोः स्पर्शाद् यथा भावो भवेत्तथा ।
रामानन्दस्य भावोऽभूत्तरुणीस्पर्शनादपि ॥१७
सेव्यताबोध मारोप्य कृतवान् सेवनं तयोः ।
स्वस्मिन् स्वाभाविकं दासीभावमारोपयंश्च सः ॥१८
दुरूहो महिमा भक्तगणानां हि महाप्रभोः ।
भक्तिप्रेम्णोः पराकाष्ठा रामानन्दस्य तेष्वपि ॥१६

अथ ते देवदास्यौ द्वे नृत्यं शिक्षयता तदा ।
ताभ्यां सङ्गीतगूढ़ार्थाभिनयस्तेन कारितः ॥२०
सञ्चारि-सात्त्विक-स्थायिभावानां लक्षणानि ते ।
उदभासयतां साध्वभिनयै मुंखचक्षुषि ॥२१
भावद्योतकलास्यं ते यथा रायेण शिक्षिते ।
दर्शयामासतुः सम्यग् जगन्नाथाग्रतस्तथा ॥२२
रामानन्द स्ततस्ते द्वे प्रसादं भोजयन् स्वयम् ।
निभृतं प्रेरयामास तयो र्निजनिकेतनम् ॥२३
प्रत्यहं नियमेनासौ राय एवमसाधयत् ।
अस्ति तस्य मनः क्वेति क्षुद्रा जीवा विदन्तु के ॥२४
अथ रायाय मिश्रस्यागमनं सेवकोऽवदत् ।
रामानन्दस्ततः शीघ्रं सभायां समुपस्थितः ॥२५
नमश्चकार मिश्रं स बहुसम्मानपूर्वकम् ।
विनयेन ततः किञ्चिदेवं तस्मै न्यवेदयत् ॥२६
भवन्तं चिरमायातं न मे कोऽपि व्यजिज्ञपत् ।
ततो जातापराधोऽस्मि भवतश्चरणाम्बुजे ॥२७
भवदागमनेनैव पूतमद्य गृहं मम ।
किं करोत्वेष दासस्ते तद्भवानादिशत्विति ॥२८
मिश्रः कथितवान् द्रष्टुं भवन्तं प्राप्तवानिह ।
भवतो दर्शनेनाहमात्मानं पूतवानिति ॥२९
अतिकालं समालोक्य मिश्रो नोवाच किञ्चन ।
ततस्तेनाभ्यनुज्ञातः प्रत्यागच्छन्निजालयम् ॥३०
अन्येद्युः पृष्टवान् मिश्रमभ्युपेतमथ प्रभुः ।
कच्चित् कृष्णकथां रायमुखात्त्वं श्रुतवानिति ॥३१
ततो मिश्रेण वृत्तान्ते रामानन्दस्य वर्णिते ।
आकर्ण्यैव तमारेभे वक्तुमेवं महाप्रभुः ॥३२

मन्ये विरक्तमात्मानं सन्न्यासी तावदस्मि भोः।
दूरेऽस्तु दर्शनं नार्य्यास्तन्नामापि शृणोमि चेत् ॥३३
विकारं प्राप्नुतः सद्यस्तदा देहो मनोऽपि मे।
को जनः स्थैर्य्यमाप्नोति रमणीं परिलोकयन् ॥३४
श्रीरामानन्दरायस्य वृत्तं शृणुत सज्जनाः।
वाचा वक्तुमशक्यं तद् विस्मयावहभाषणम् ॥३५
एकतो देवदास्यौ द्वे सुन्दर्य्यौ युवती पुनः।
तयोरङ्गानि सर्वाणि स स्वयं सेवतेऽन्यतः ॥३६
स्नानादि कारयन् वासो-भूषणैश्च प्रसाधयन्।
तयोरङ्गानि गुह्यानि वीक्षते च स्पृशत्यसौ ॥३७
निर्विकारं तथाप्यस्य रामानन्दस्य मानसम्।
सोऽपि शिक्षयति स्पष्टं नानाभावोद्‌गमञ्च ते ॥३८
निर्विकारौ मनोदेहौ काष्ठपाषाणयोः समौ।
तरुणीं स्पृशतोऽप्यस्य निर्विकारमहो मनः ॥३९
एकस्यैवाधिकारोऽयं रामानन्दस्य केवलम्।
तस्यैवाप्राकृतं देहमतो जानामि सर्वथा ॥४०
तस्य स्वीयं मनोभावं सोऽवगच्छति केवलम्।
तस्यावगतये पात्रं द्वितीयं नास्ति चापरम् ॥४१
उच्यते शास्त्रदृष्ट्या तु यदेवानुमितं मया।
श्रीमद्भागवतं शास्त्रं प्रमाणं तत्र वर्त्तते ॥४२
गोपीभिः सह कृष्णस्य रासलीलादिकं जनाः।
ये ब्रुवन्त्यथ शृण्वन्ति श्रद्दधानेन चेतसा ॥४३
तत्क्षणादेव हृद्रोगः कामस्तेषां विलुम्पति।
त्रैगुण्यक्षोभनाशेन महाधीरा भवन्ति ते ॥४४
प्रेमभक्तिञ्च विन्दन्ति ते रसोज्ज्वलमाधुरीम्।
विहरन्ति मुदा कृष्णमाधुर्य्येण दिवानिशम् ॥४५

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशाध्याय
ऊनचत्वारिंशः श्लोकः—

विक्रीड़ितं व्रजवधूभिरिदञ्च विष्णोः
श्रद्धान्वितोऽनुश्रृणुयादथ वर्णयेद् यः ।
भक्तिं परां भगवति प्रतिलभ्य कामं
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥३॥"

फलमेतादृशं तेषां ये शृण्वन्ति पठन्ति वा ।
ये सेवन्ते दिवारात्रं भावाविष्टा भवन्ति ते ॥४६
किं ब्रवीमि फलं तेषां सर्वथा वागगोचरः ।
नित्यसिद्धा हि ते प्रायस्तथा सिद्धकलेवराः ॥४७
रायस्य भजनं रागानुगमार्गेण वेद्म्यहम् ।
तेनास्याप्राकृतं चित्तं सिद्धवच्च कलेवरम् ॥४८
मयापि श्रूयते कृष्णकथा रायमुखादतः ।
पुनस्तत्रैव गच्छ त्वं श्रोतुमिच्छास्ति ते यदि ॥४९
मन्नाम्ना ब्रूहि तं गत्वा तेनाहं प्रहितोऽस्मि ते ।
तवैव वदनात् कृष्णकथाश्रवणहेतवे ॥५०
गच्छ गच्छ द्रुतं तत्र सभायामस्ति सोऽधुना ।
इति प्रद्युम्नमिश्रोऽथ श्रुत्वैव प्रस्थितो द्रुतम् ॥५१
आत्मसन्निधिमायातं रायो नत्वा तमब्रवीत् ।
यत्कृतेऽत्र भवान् प्राप्त स्तन्मामाज्ञापयत्विति ॥५२
मिश्रः प्रत्यब्रवीत् कृष्णकथाश्रवणहेतवे ।
श्रीमहाप्रभुणाद्याहं समीपं प्रेषितोऽस्मि ते ॥५३
इत्याकर्ण्याभवद्रामानन्दः सन्तुष्टमानसः ।
किञ्चिद्भाषितु मारेभे हर्षोत्फुल्लेन चेतसा ॥५४
अत्र कृष्णकथां श्रोतुमागतोऽस्याज्ञया प्रभोः ।
इतोऽन्यत् सुमहद्भाग्यं क्व पुनर्लप्स्यते मया ॥५५

इत्युक्त्वा तं गृहीत्वा च निभृते स उपाविशत् ।
कथां कामिच्छसि श्रोतुमिति मिश्रञ्च पृष्टवान् ॥५६
सोऽथ प्रत्यवदद् विद्यानगरे भवता पुरा ।
कथिता या कथा सैव वक्तव्या क्रमश स्त्वया ॥५७
प्रभोरप्युपदेष्टासि परेषां का कथा पुनः ।
अहं भिक्षुकविप्रोऽस्मि भवान् मे परिपोषकः ॥५८
प्रष्टुं भद्रमभद्रं वा नाहं जानामि किञ्चन ।
कृपयालोक्य दीनं मां स्वयमेवोच्यतामिति ॥५९
रामानन्दे ततो वक्तुमुपक्रान्ते यथाक्रमम् ।
श्रीकृष्णरस-पीयूषसिन्धूरुद्वेलतां गतः ॥६०
प्रश्नं कृत्वा स्वयं पश्चात् सिद्धान्तं तस्य कुर्वतः ।
तृतीयः प्रहरः प्राप्तः प्राप्ता नान्तन्तु तत्कथा ॥६१
प्रेम्णाविष्टावुभौ श्रोता वक्ता चाकर्णयन् ब्रुवन् ।
दिवसस्यावसानेऽपि नात्मानमपि जज्ञतुः ॥६२
अवसानं दिनं यातमिति ब्रुवति सेवके ।
श्रीमत्कृष्णकथां रायो विराममनयत्ततः ॥६३
मिश्रः सबहुसम्मानं तेन प्रस्थापितो गृहम् ।
चरितार्थोऽस्मि संवृत्त इत्युक्त्वा प्रस्थितस्ततः ॥६४
मिश्रोऽथालयमागत्य कृत्वा च स्नानभोजने ।
ययौ सायं परिद्रष्टुं चरणौ श्रीमहाप्रभोः ॥६५
वन्दमानं प्रभोः पादौ मिश्रं संहृष्टमानसम् ।
प्रभुरूचे त्वया कच्चिच्छ्रुता कृष्णकथेति तम् ॥६६
मिश्रेणोक्तमहं देव कृतार्थोऽस्मि कृतस्त्वया ।
तेनाहं मज्जितः कृष्णकथापीयूषसागरे ॥६७
श्रीरामानन्दरायस्य चरितं वाक्पथातिगम् ।
न रायो मानवो मूर्त्तः कृष्णभक्तिरसो हि सः ॥६८

पुनरेकं वचो रायो मह्यमेवं व्यजिज्ञपत् ।
अस्याः कृष्णकथाया मां वक्तारं मा विदाङ्कुरु ॥६९
मन्मुखेन वचो वक्ति श्रीमान् गौरविधुः स्वयम् ।
यथा वाचयतेऽसौ मां तथा वीणेव वच्म्यहम् ॥७०
ममास्येन ब्रुवन्नेवं प्रचारं विदधात्यसौ ।
इयं लीला तदीयेति भुवि जानातु कोन्विति ॥७१
श्रुतास्तस्मान्मया सर्वे ये कृष्णरससागराः ।
नूनं ब्रह्मादिदेवानामपि ते नैव गोचराः ॥७२
रसमेतादृशं त्वं मां यतः पायितवानसि ।
प्रतिजन्मास्मि विक्रीतस्ततस्ते पादयोरिति ॥७३
प्रभुः प्रत्युक्तवान् रामानन्दो हि विनयाकरः ।
आत्मनोऽसौ गुणख्यातिं न्यस्यते परमूर्द्धनि ॥७४
इत्थं महानुभावानां स्वभावो भवति ध्रुवम् ।
कदाचिन्नहि भाषन्ते स्वयं ते स्वगुणानिति ॥७५
श्रीरामानन्दरायस्य गुणलेशोऽत्र कीर्त्तितः ।
यथा प्रद्युम्नमिश्राय स ददावुपदेशनम् ॥७६
रामानन्दो गृहस्थोऽपि न षड़्वर्गवशं गतः ।
उपादिशच्च सन्न्यासिगणं विषयवानपि ॥७७
एतां स्तस्य गुणान् सर्वान् प्रकाशयितुमिच्छता ।
प्रभुणा प्रेरितो मिश्रस्तस्माच्छ्रवणहेतवे ॥७८
प्रकाशनाय भक्तानां सुष्ठु विज्ञातवान् प्रभुः ।
मन्यते स्म निजं लाभं नानाभङ्ग्या प्रकाश्य तान् ॥७९

स्वभावः श्रूयतां भक्तै गौरस्यैकोऽपरः पुनः ।
स्व-स्वाभाविकमैश्वर्य्यं गूढ़ं प्राकटयच्च सः ॥८०
गर्वनाशाय सन्न्यासिपण्डितानां महाप्रभुः ।
नीचशूद्रेण धर्मस्य तत्त्वं प्राकाशयत् किल ॥८१

रायं विधाय वक्तारं भक्तिं प्रेम च सोऽवदत् ।
समं प्रद्युम्नमिश्रेण स्वयं श्रोता बभूव च ॥८२
प्रथयन् हरिदासेन नाममाहात्म्यमद्भुतम् ।
व्रजस्य भक्तिसिद्धान्तान् सनातन मचीकरत् ॥
तेने व्रजरसप्रेमलीलां रूपेण च प्रभुः ।
कश्चैतन्यस्य गम्भीरां खेलां विज्ञातु मर्हति ॥८४
श्रीचैतन्यस्य लीलेयममृताम्बुनिधिः खलु ।
विन्दुरेकोऽपि यस्यालं परिप्लावयितुं जगत् ॥८५
पीयतां नित्यमेवेदं चैतन्यचरितामृतम् ।
प्रेमानन्दं यतोलब्ध्वा भक्तितत्त्वञ्च बुध्यते ॥८६
एवमेव निजान् भक्तान् सहादाय महाप्रभुः ।
नीलाद्रौ विहरन्नासीन्निजभक्तिं प्रचारयन् ॥८७
बङ्गीयो ब्राह्मणः कोऽपि वलम्ब्य चरितं प्रभोः ।
नाटकं रचयंस्तत्रायातः श्रावयितुञ्च तत् ॥८८
आचार्य्यो भगवांस्तेन पुरा परिचितोऽभवत् ।
तेन सार्द्धं मिलित्वासौ तन्निकेतनमाश्रयत् ॥८९
तमेव प्रथमं विप्रः श्रावयामास नाटकम् ।
बहवो वैष्णवास्तत्र मिलितास्तेन शुश्रुवुः ॥९०
प्रशंसन्तश्च ते सर्वे नाटकं परमोत्तमम् ।
अभिलाषमतश्चक्रुस्तच्च श्रावयितुं प्रभुम् ॥९१
किन्तु गीतं कवित्वं वा श्लोकं ग्रन्थमथानयन् ।
जनः प्रथमतस्तावत् स्वरूपं श्रावयेदिह ॥९२
श्रूयमाणं स्वरूपेण गृह्णीयात्तन्मनोऽस्य चेत् ।
भवेच्छ्रावयितुं शक्तस्तदैवासौ महाप्रभुम् ॥९३
रसाभासोऽथ सिद्धान्तविराधो वा भवेत् यदि ।
तं विसोढुमशक्तस्य प्रभोः कुप्येन्मन स्तदा ॥९४

किञ्चनाप्यत एवादौ शृणुयात्र महाप्रभुः ।
इत्येष प्रश्नमर्य्यादानियमोऽत्र कृतोऽभवत् ॥९५

अथाचार्य्य उपागत्य स्वरूपाय न्यवेदयत् ।
रचितं कविनैतेन प्रभोर्नाटक मुत्तमम् ॥९६

त्वयैव श्रूयतामादौ यदि स्यात्ते मनोमतम् ।
तदैव श्रावयिष्यामि पश्चादेतन्महाप्रभुम् ॥९७

प्रत्युवाच स्वरूपस्तं गोपस्त्वं परमार्जवः ।
यस्य कस्यापि शास्त्रस्य शुश्रूषा तव जायते ॥९८

रसाभासो भवेद् वाक्ये कवितुर्यस्य कस्यचित् ।
शृण्वतोऽशुद्धसिद्धान्तं नैवोल्लसति मे मनः ॥९९

रसः किंवा रसाभास इति यो न विचारयेत् ।
स पारं प्राप्नुयान्नैव भक्तिसिद्धान्तवारिधेः ॥१००

नैव व्याकरणं वेत्ति नालङ्कारञ्च यो जनः ।
नाटकस्याप्यलङ्कारज्ञानं यस्य न विद्यते ॥१०१

नासौ वर्णयितुं कृष्णलीलां जाल्मोऽवगच्छति ।
विशेषेण तु चैतन्यविहारोऽतीव दुर्गमः ॥१०२

कृष्णलीलां तथा गौरलीलां स एव वर्णयेत् ।
श्रीमद्‌गौरपदाम्भोजं यस्य प्राणधनं भवेत् ॥१०३

दुःखमुत्पद्यते ग्राम्यकवेः काव्यं हि शृण्वतः ।
विदग्धात्मीय-वाक्यानि जनः शृण्वन् सुखायते ॥१०४

द्वे एव नाटके रूपो यथा प्रारब्धवानिह ।
आनन्दं वर्द्धयत्येव मुखबन्धः श्रुतो ययोः ॥१०५

आचार्य्यो भगवानूचे तावदाकर्ण्यतां सकृत् ।
श्रुत्वा भव्यमभव्यं वा विचार्य्य ज्ञास्यते त्वया ॥१०६

अथ द्वित्राण्यहान्येवमाचार्य्येणाग्रहे कृते ।
स्वरूपः श्रोतुमैच्छत्तत्तदाग्रहवशीकृतः ॥१०७

ततः स्वरूपगोस्वामी सर्वैः श्रोतुमुपाविशत् ।
तदैवं स कविस्तत्र नान्दीश्लोकमवाचयत् ॥१०८

"तथाहि वङ्गदेशीयविप्रस्य

विकच-कमल-नेत्रे श्रीजगन्नाथसंज्ञे
कनक-रुचिरिहात्मन्यात्मतां यः प्रपन्नः ।
प्रकृति-जड़मशेषं चेतयन्नाविरासीत्
स दिशतु तव भव्यं कृष्णचैतन्यदेवः ॥४॥"

इत्याकर्ण्यैव लोकेषु प्रशंसत्स्वखिलेषु तम् ।
कविमूचे स्वरूपोऽयं श्लोको व्याख्यायतामिति ॥१०६

कविनोक्तं जगन्नाथः शरीरं सुमनोहरम् ।
तत्र चैतन्यगोस्वामी शरीरी धैर्य्यवान् स्वयम् ॥११०
स्वभावेन जड़ं विश्वमेतत् कर्त्तुं सचेतनम् ।
आविर्भूतोऽभवन्नीलाचले श्रीमन्महाप्रभुः ॥१११
इति श्रुत्वा जनाः सर्वे बभूवु हृष्टमानसाः ।
स्वरूपोऽनुभवन्दुःखं रोषादेवं तमब्रवीत् ॥११२
अरे मूर्खात्मनः सर्वनाशं त्वं कृतवानसि ।
द्वौ तावदीश्वरावेतौ विश्वासो नास्ति तेऽनयोः ॥११३
चित्स्वरूपो जगन्नाथः पूर्णानन्दमयः स्वयम् ।
त्वया स प्राकृतो देहो विहितो नश्वरो जड़ः ॥११४
पूर्णानन्दः षड़ैश्वर्य्यश्चैतन्यो भगवान् स्वयम् ।
त्वया सोऽपि कृतः क्षुद्रो जीवो वह्निस्फुलिङ्गवत् ॥११५
द्वयोरत्रापराधेन दुर्गतिस्ते भविष्यति ।
अतस्त्वज्ञेन तत्त्वोक्तौ रीतिरेषैव जायते ॥११६
परमोऽयं प्रमादोऽन्यो विहितश्च त्वया पुनः ।
देह-देहि-भिदां कुर्वन् सापराधस्त्वमीश्वरे ॥११७

ईश्वरे जातु नास्त्येव देह-देहि-विभिन्नता ।
तत्त्वदेहौ चिदानन्दौ न भिद्येते मनागपि ॥११८

"तथाहि लघुभागवतामृते पूर्वखण्डे नवमाङ्कधृतं कूर्मपुराणवचनम्—

देह-देहि-विभागोऽयं नेश्वरे विद्यते क्वचित् ॥५॥

तथाहि श्रीमद्भागवते तृतीयस्कन्धे नवमाध्याये तृतीयः श्लोकः—

नातः परं परम यद्भवतः स्वरूप-
मानन्दमात्रमविकल्पमविद्धवर्च्चः ।
पश्यामि विश्वसृजमेकमविश्वमात्मन्
भूतेन्द्रियात्मकमदस्त उपाश्रितोऽस्मि ॥६॥

तथा तत्रैव चतुर्थः श्लोकः—

तद्वा इदं भुवनमङ्गल मङ्गलाय
ध्याने स्म नो दर्शितं त उपासकानाम् ।
तस्मै नमो भगवतेऽनुविधेम तुभ्यं
यो नादृतो नरकभाग्भिरसत्प्रसङ्गैः ॥७"

पूर्णानन्दोऽखिलैश्वर्य्यः कृष्णो मायेश्वरः क्वनु ।
क्व मायाकिङ्करो जीवः क्षुद्रो दुःखसमाकुलः ॥११९

"तथाहि श्रीभगवत्सन्दर्भे व्याख्याधृतं सर्वज्ञसूत्रम्—

ह्लादिन्या संविदाश्लिष्टः सच्चिदानन्द ईश्वरः ।
स्वाविद्या-संवृतो जीवः संक्लेशनिकराकरः ॥८॥"

इति श्रुत्वा चमत्कारं प्राप्य प्रोचुः सभासदः ।
द्वौ न्यक्कृतावनेनेति सत्यं गोस्वामिनोच्यते ॥१२०
इत्याकर्ण्य कविः सोऽभूद्भीतोह्रीणश्च विस्मितः ।
न किञ्चित् कथयामास हंसमध्ये वको यथा ॥१२१
वीक्ष्य दुःखायमानं तं स्वरूपोऽतिकृपावशः ।
तस्य कल्याणमाकाङ्क्षंस्तमेवेदमुपादिशत् ॥१२२

वैष्णवान्निकषा गच्छ ततो भागवतं शृणु ।
श्रीमच्चैतन्यपादाब्जमैकान्त्येन भजस्व च ॥१२३

श्रीचैतन्यस्य भक्तानां नित्यं सङ्गं समाचर ।
सिद्धान्ताम्भोधिकल्लोलांस्तत एवावगच्छसि ॥१२४

तदानीमेव पाण्डित्यं तव साफल्यमेष्यति ।
लीलां कृष्णस्वरूपस्य विशदं वर्णयिष्यसि ॥१२५

तुष्टान्तःकरणेनायं श्लोको विरचितस्तया ।
हार्देन तु तवार्थेन दुष्यत्येष तयोर्द्वयोः ॥१२६

अजानता त्वया रीतिं क्रियतेऽर्थो यथा तथा ।
सरस्वत्या तु तैरेव शब्दैः स्तोत्रं विधीयते ॥१२७

श्रीकृष्णं भर्त्सयामासुर्यैः शब्दै र्दानवादयः ।
शब्दैस्तैरेव तुष्टाव यथा कृष्णं सरस्वती ॥१२८

"तथाहि श्रीमद्भागवते दशमस्कन्धे पञ्चविंशाध्याये पञ्चमः श्लोकः—

वाचालं वालिशं स्तब्धमज्ञं पण्डितमानिनम् ।
कृष्णं मर्त्त्यमुपाश्रित्य गोपा मे चक्रुरप्रियम् ॥८॥"

ऐश्वर्य्यमदमत्तोऽभूत् सुरेन्द्रो मद्यमत्तवत् ।
नष्टा बुद्धि स्तदा तस्य प्रनष्टश्चापि संयमः ॥१२९

इन्द्रो मेनेऽस्मि कृष्णस्य निन्दनं कृतवानिति ।
तन्मुखेनैव तुष्टाव कृष्णं त्वेवं सरस्वती ॥१३०

वेदप्रवर्त्तको धन्यो वाचालोह्यभिधीयते ।
गर्वशून्यः शिशुप्रायो बुधै र्बालिश उच्यते ॥१३१

वन्द्याभावादनम्रो हि स्तब्धशब्देन कथ्यते ।
अज्ञोऽसावुच्यते यस्मादपरो ज्ञो न विद्यते ॥१३२

स स्यात् पण्डितमानीति मानो यस्यास्ति पण्डितैः ।
कृष्णस्य भक्तवात्सल्याद् युज्यते मर्त्त्यमानिता ॥१३३

जरासन्धोऽप्युवाचैवं कृष्णस्त्वं पुरुषाधमः ।
त्वया सार्द्धं न योत्स्येऽहं याहि त्वं बन्धुहन्निति ॥१३४
अपरे पुरुषा यस्मादधमा निखिला अमी ।
असावेव सरस्वत्याः सम्मतः पुरुषोत्तमः ॥१३५
बध्यन्तेऽविद्यया सर्वे सा बन्धुः कथ्यते ततः ।
बन्धुहेति पदेनैवाविद्यानाशक उच्यते ॥१३६
इत्थञ्च शिशुपालेन श्रीकृष्णो निन्दितः पुरा ।
तस्यापि वचसा कृष्णं पर्य्यष्टौषीत् सरस्वती ॥१३७
श्लोकार्थेन त्वदीयेन तथैवायाति निन्दनम् ।
सरस्वत्यास्तु शृण्वर्थं स्तुतिर्यत्र प्रकाशते ॥१३८
जगन्नाथो भवत्येव कृष्णस्यात्मस्वरूपकः ।
सोऽत्र दारुमयं ब्रह्म ततः स्थावररूपधृक् ॥१३९
सार्द्धमात्मतया तेन तयोरेवैकरूपता ।
एकतत्त्वस्वरूपो हि कृष्णो रूपद्वयं दधत् ॥१४०
इच्छाशक्तिरभूद्व्यक्ता संसारोत्तारणाय या ।
सङ्गतस्य तयैकस्य तथात्वमिति कथ्यते ॥१४१
सर्वान् संसारिणो लोकान् समुद्धर्त्तुमनाः स्वयम् ।
गौरो जङ्गमरूपेणावतारं कृतवानिह ॥१४२
वीक्षमाणो जगन्नाथं संसारान्मुच्यते जनः ।
नायातुं सर्वदेशीयाः पारयन्ति जनास्त्विह ॥१४३
प्रभुः श्रीकृष्णचैतन्यः प्रतिदेशं स्वयं गतः ।
जङ्गमब्रह्मरूपेण सर्वानुद्धृतवान् जनान् ॥१४४
सरस्वत्या कृतोऽर्थोऽयं साम्प्रतं विवृतो मया ।
एतत्तवापि सौभाग्यं यथा वर्णितवानसि ॥१४५
कृष्णं गर्हयता येन तन्नामोच्चार्य्यते यदि ।
तन्नामैव तदा तस्य मुक्तिहेतुर्भवेदिति ॥१४६

अथ पादेषु सर्वेषामसौ प्रणिपतन् कविः ।
दन्तैस्तृणानि गृह्णंश्च सर्वान् शरणमाययौ ॥१४७
तमङ्गीकृतवन्तस्ते सर्वे भक्ताः कविं ततः ।
प्रभुणा मेलयामासुः ख्यापयन्तश्च तद्‌गुणान् ॥१४८
कविश्च त्यक्तसर्वस्वस्तत्र नीलाचलेऽवसत् ।
करुणा गौरभक्तानां व्याख्यातुं केन शक्यते ॥१४९
एषा प्रद्युम्नमिश्रस्य विवृतिः कथिता मया ।
श्रीमत्कृष्णकथां योऽसौ श्रुतवानाज्ञया प्रभोः ॥१५०
अन्तरा वर्णितो रामानन्दस्य महिमा पुनः ।
यस्य वर्णितवान् सीमां श्रीमुखेन स्वयं प्रभुः ॥१५१
कवे र्नाटकवृत्तान्तो मया प्रोक्तः प्रसङ्गतः ।
अज्ञोऽपि श्रद्धया लेभे चरणौ श्रीमहाप्रभोः ॥१५२
कृष्णचैतन्यलीलेयं सुधासाररसा सरित् ।
वहन्ति शतशो धारास्तदेकस्रोतसो मुखात् ॥१५३
पठति श्रद्धया लीलामिमां यो वा शृणोत्यथ ।
गौरलीला-भक्ति-भक्त-रसतत्त्वानि वेत्ति सः ॥१५४
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१५५

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे प्रद्युम्नमिश्रोपाख्यानं नाम पञ्चमः परिच्छेदः ।

—०—

अन्त्यलीलायां षष्ठः परिच्छेदः

"कृपागुणैर्यं कुगृहान्धकूपादुद्धृत्य भङ्गया रघुनाथदासम् ।
न्यस्य स्वरूपे विदधेऽन्तरङ्गं श्रीकृष्णचैतन्यममुं प्रपद्ये ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
इत्थं नीलाचले गौरचन्द्रो भक्तगणैः सह ।
लीला वहुविधाः कुर्वन्नासीद्रङ्गेण भूयसा ॥२
कृष्ण-विच्छेद-दुःखाग्नौ वर्द्धमानेऽप्यसौ हृदि ।
न वहिर्व्यञ्जयामास भक्तानां दुःख-शङ्कया ॥३
तस्यातितीव्र-विच्छेद-दुःखे तूद्वेलतां गते ।
यदजायत वैक्लव्यं तद्व्याख्यातुं न शक्यते ॥४
श्रीकृष्णाख्यान-गीतिभ्यां रामानन्द-स्वरूपयोः ।
विच्छेद-यातना-काले प्राणान् रक्षितवान् प्रभुः ॥५
दिवा नानाविधै रङ्गैः सोऽयमन्यमना अभूत् ।
उपाचीयत रात्रौ तु तस्य विच्छेदयातना ॥६
तत्-सुखायैव तिष्ठन्तौ तावुभौ नित्यसङ्गिनौ ।
तमसान्त्वयतां कृष्णरसश्लोकानुगीतिभिः ॥७
पुरा बभूव कृष्णस्य सहायः सुवलो यथा ।
तथा सुखयितुं गौरं रामरायोऽभवत्तदा ॥८
यथासील्ललिता राधा-सहाय-प्रवरा पुरा ।
प्रभोः स्वरूपगोस्वामी तथासीत् प्राणरक्षकः ॥९
सौभाग्यमनयो र्वाचा व्यक्तं वक्तुं न शक्यते ।
अन्तरङ्गौ प्रभोस्तौ द्वाविति लोकैर्हि गीयते ॥१०
गौराङ्गो विजहारैवं तदा भक्तगणैः समम् ।
मिलनं रघुनाथस्य भक्ताः शृण्वन्तु साम्प्रतम् ॥११

रघुनाथो यदा पूर्वमासीच्छान्तिपुरं गतः ।
तदा तं शिक्षयामास कारुण्येन महाप्रभुः ॥१२
ततो गत्वा निजागारं स प्रभोः शिक्षया तया ।
त्यक्त्वा मार्कटवैराग्यं विषयीवाचरन् स्थितः ॥१३
सोऽन्तर्वैराग्यमाधाय व्यधात् कर्माखिलं वहिः ।
पितरौ तं तथा दृष्ट्वा जातौ सानन्दमानसौ ॥१४
मथुराया अथायातं प्रभुं विज्ञाय वार्त्तया ।
सन्निधिं तस्य सम्प्राप्तुमुद्योगं कृतवानसौ ॥१५
अस्मिन्नवसरे म्लेच्छः कोऽप्येको मण्डलेश्वरः ।
आसीच्चतुर्धुरीणोऽसौ सप्तग्रामीयमण्डले ॥१६
तस्मिन् हिरण्यदासेन राजस्वैः स्वीकृते स्थिरैः ।
सोऽभूल्लुप्ताधिकारोऽथाम्रियतेव निरीक्ष्य तम् ॥१७
राज्ञे द्वादशलक्षाणि दत्त्वाप्तं लक्षविंशतिम् ।
ततः किञ्चिदलब्ध्वासौ तौरुष्कः शत्रुतां गतः ॥१८
तं सम्राजेऽभियुञ्जानस्ततोऽमात्यं स आनयत् ।
पलायिते हिरण्येऽथ रघुनाथं बबन्ध च ॥१९
प्रत्यहं रघुनाथं स भर्त्सयन्नेवमुक्तवान् ।
पितरि ज्येष्ठताते वा नानीते लप्स्यसे व्यथाम् ॥२०
इत्युक्त्वानीतमाहन्तुं रघुनाथं विलोकयन् ।
न शशाक तमाहन्तुं विनिवृत्तमना अभूत् ॥२१
विशेषात्तञ्च कायस्थं मत्वाभूत् सोऽपि शङ्कितः ।
तर्जन् गर्जंश्च वक्त्रेण प्रहाराद्वयरमद्भयात् ॥२२
अथासौ कञ्चनोपायं रघुनाथो विचिन्तयन् ।
एवं तन्मेच्छपादाय विनयेन न्यवेदयत् ॥२३
पिता मे ज्येष्ठतातश्च तवैव भ्रातरावुभौ ।
भ्रातरः कलहायध्वे यूयं नित्यं परस्परम् ॥२४

कदाचित् कलहः प्रीतिः कदाचिद्वेत्यनिश्चयः ।
श्वो भविष्यथ ते यूयं यूगपद् भ्रातरस्त्रयः ॥२५
यथा बालोऽस्मि तातस्य तथा बालस्तवाप्यहम् ।
त्वयैव प्रतिपाल्योऽस्मि त्वं मम प्रतिपालकः ॥२६
पालकेन तु पाल्यस्य ताड़नं नैव युज्यते ।
सर्वशास्त्रेष्वभिज्ञोऽसि सिद्धपूरुषसन्निभः ॥२७
इत्याकर्ण्यैव स म्लेच्छो बभूवार्द्रमनास्तदा ।
अश्रुधाराप्लुतश्मश्रु रारेभे रोदितुं पुनः ॥२८
म्लेच्छस्तं प्रोक्तवानद्य प्रभृति त्वं सुतो मम
केनापि च्छद्मनाद्यैव मया त्वं मोचयिष्यसे ॥२९
अथामात्यं किमप्युक्त्वा रघुनाथं स मोचयन् ।
म्लेच्छः प्रीतमना एवमुपाक्रमत भाषितुम् ॥३०
निर्बोधो ज्येष्ठतातस्ते भुङ्क्ते लक्षाष्टकं स्वयम् ।
भागाधिकारिणे मह्यं स किञ्चिद्दातुमर्हति ॥३१
गच्छ ते ज्येष्ठपितव्यं मया सङ्गमय द्रुतम् ।
स करोतु यथाभद्रं भारस्तत्रार्पितो मया ॥३२
रघुनाथेन गत्वासौ ज्येष्ठतातेन मेलितः ।
वशं म्लेच्छोऽपि नीतश्च सर्वं शान्तमभूत्ततः ॥३३
रघुनाथश्चरन्नेवं वर्षमेकमयापयत् ।
द्वितीये वत्सरे प्राप्ते पलायितुमना अभूत् ॥३४
एकदोत्थाय रात्रौ स यदैकाकी पलायितः ।
दूरदानाययामास गृहीत्वा तं पिता तदा ॥३५
एवं पलायमानं तं धृत्वानीतं पुनः पुनः ।
विलोक्य जननी तस्य प्रोचे तत्पितरं प्रति ॥३६
पुत्रोऽयं वातुलो जातो बन्धने स्थाप्यतामिति ।
तदाकर्ण्य सनिर्वेदं तत्पिता तामवोचत ॥३७

ऐश्वर्य्यं तुल्यमिन्द्रस्य पत्नी चाप्सरसां समा ।
एतत् सर्वं मनो यस्य नालं बन्धुं मनागपि ॥३८
स्थाप्येतासौ कथङ्कारं बद्धा बन्धनरज्जुभिः ।
सूनोः प्रारब्धनाशाय न पिता जन्मदोऽप्यलम् ॥३६
नूनं चैतन्यचन्द्रस्य करुणास्मिन्नजायत ।
निरोद्धुं कोनु शक्नोति श्रीचैतन्यस्य वातुलम् ॥४०
रघुनाथस्ततोऽन्येद्यु र्विचार्य्य स्थिरचेतसा ।
श्रीनित्यानन्दगोस्वामि-सकाशमगमत्ततः ॥४१
स लेभे दर्शनं पानिहाटिग्रामं गतः प्रभोः ।
सार्द्धं सङ्कीर्त्तकैर्भृत्यै र्बहुभिश्चापरैर्जनैः ॥४२
भागीरथ्यास्तटे मूले पादपस्य च वेदिकाम् ।
अध्यासीनः प्रभुः सद्य उद्यन्निव रविर्बभौ ॥४३
बहुभक्तैः परीतस्याधस्ताद् वेद्यास्तथोपरि ।
प्रभोः प्रभावमालोक्य रघुनाथो बिसिस्मिये ॥४४
पतन्तं दण्डवद्दूरे तं दृष्ट्वा सेवकोऽब्रवीत् ।
दण्डबद्रघुनाथोऽसौ त्वां नमन् दृश्यतामिति ॥४५
श्रुत्वोवाच प्रभुश्चौर, दत्तवानसि दर्शनम् ।
आगच्छागच्छ दण्डं ते विधास्याम्यद्य निश्चितम् ॥४६
प्रभुणाहूयमानोऽपि नैवासौ तमुपागमत् ।
ततस्तं प्रभुराकृष्य तन्मूर्द्ध्नि न्यदधात् पदम् ॥४७
नित्यानन्दः स्वभावेन कृपालुः कौतुकप्रियः ।
सानुकम्पममुं किञ्चिद्रघुनाथमवोचत ॥४८
समीपं मम नायासि दूराच्चौर, पलायसे ।
मया लब्धोऽद्य सङ्गस्ते, सद्यस्त्वं दण्डयिष्यसे ॥४६
त्वया चिपिटकान्दध्ना भोज्यन्तां मे गणा इति ।
शृण्वतो रघुनाथस्यानन्दोऽजायत चेतसि ॥५०

प्रहितास्तत्क्षणात्तेन प्रतिग्रामं निजाजनाः ।
आनिन्युर्भक्षणीयानि ग्रामेभ्यो निखिलानि ते ।।५१
चिपिटान्दधि दुग्धञ्च रम्भामिक्षिक-शर्कराः ।
स्थापयामासुरानायमानायं ते पुरः प्रभोः ।।५२
श्रुत्वा महोत्सवख्यातिं ब्राह्मणा अथ सज्जनाः ।
आरेभिरे समायातुं तत्रासंख्या जनाः पुनः ।।५३
अथ ग्रामान्तरेभ्यश्चानीते द्रव्यसमुच्चये ।
मृत्पात्राणां शतानि द्विचतुराण्यानयंश्च ते ।।५४
मृत् कुण्डिका विशालाश्चानीतास्तैः पञ्चसप्त वा !
असिञ्चच्चिपिटांस्तासु विप्रः कोऽपि प्रभोः कृते ।।५५
एकत्रोष्णेन दुग्धेन चिपिटान् सिक्तवानसौ ।
शर्करादधिरम्भाभिरर्द्धमम्रक्षयत् पुनः ।।५६
घनावर्त्तितदुग्धेन शेषार्द्धं योजयन्नसौ ।
तत्र चिक्षेप कर्पूर-घृत-चाम्पेय-शर्कराः ।।५७
वसानेऽथ प्रभौ वस्त्रमध्यासीने च वेदिकाम् ।
निदधे पुरतस्तस्य विप्रास्ताः सप्तकुण्डिकाः ।।५८
महामहत्तरास्तावद् यावन्तः स्वगणाः प्रभोः ।
सर्वे मण्डलबन्धेन निषेदुर्वेदिकोपरि ।।५९
मुरारिः सुन्दरानन्दो रामदासः सदाशिवः ।
दासो गदाधरो गौरीदासश्च कमलाकरः ।।६०
परमेश्वरदासश्च जगदीश-धनञ्जयौ ।
होड़श्रीकृष्णदासश्च महेशश्च पुरन्दरः ।।६१
उद्धारणादयः सर्व आसीना वेदिकोपरि ।
संख्यातुं केन शक्यन्ते यावन्तोऽन्ये निजाजनाः ।।६२
श्रुत्वान्ये पण्डिता भट्टाचार्य्या विप्रा य आगताः ।
प्रभुस्तान्मानयन् सर्वानुपावेशयतोपरि ।।६३

द्विशोमृत् कुण्डिकास्तेषां सर्व्वेषां निहिताः पुरः ।
चिपिटाः पयसैकत्रान्यत्र दध्ना च मिश्रिताः ॥६४
यावन्तोऽन्ये जनाः सर्वे वेदिकायास्तले पुनः ।
न्यषीदन्मण्डलीबद्धाः कस्तान् गणयितुं क्षमः ॥६५
तेभ्यश्चैकैकशो द्वे द्वे मृत्पात्रे च प्रदापिते ।
द्विधा दुग्धेन दध्ना चाभ्यषिञ्चंश्चिपिटांश्च ते ॥६६
उपरि स्थानमप्राप्य गङ्गातीरं गता द्विजाः ।
चिपिटानार्द्रयन् केचिद् द्विशोमृत् कुण्डयोः पुनः ॥६७
तीरेऽपि स्थानमप्राप्य कतिचिच्चापरे जनाः ।
अवतीर्य्य जले दध्ना चिपिटांस्तेऽप्युभुञ्जत ॥६८
उपर्य्यधश्च येऽतिष्ठन् ये च गङ्गातटे स्थिताः ।
तेभ्यः स्थानत्रये पर्य्यवेशयन् विंशतिर्जनाः ॥६९
अस्मिन्काले समायातस्तत्र राघवपण्डितः ।
तथा दृष्ट्वा हसन्नासीद्विस्मयाकुलमानसः ॥७०
अरन्धितान् प्रसादान् स आनीय विविधान् बहून् ।
आदौ श्रीप्रभवे दत्त्वा भक्तेभ्यस्तानवण्टयत् ॥७१
प्रभुमूचे तवार्थेऽद्य मया भोगो निवेदितः ।
विधेह्युत्सवमत्र त्वं प्रसादोऽस्ति गृहे तव ॥७२
तमुवाच प्रभु र्द्रव्यमेतदश्नाम्यहं दिवा ।
प्रसादं भक्षयिष्यामि रात्रौ तव निकेतने ॥७३
गोपजातिरहं गोपसमूहैः परिवेष्टितः ।
प्राप्नोम्यत्र सुखं नद्याः पुलिने भोजनोत्सवे ॥७४
इत्युक्त्वा राघवं तत्रासयन् कुण्डीद्वयं ददौ ।
द्विविधांश्चिपिटांस्तत्र राघवः सिक्तवानथ ॥७५
चिपिटेष्वथ पर्य्याप्तं प्राप्तेषु निखिलैर्जनैः ।
प्रभुर्ध्यायंस्तदा तत्रानिनाय श्रीमहाप्रभुम् ॥७६

श्रीनित्यानन्द उत्तस्थौ दृष्ट्वायातं महाप्रभुम् ।
सर्वेषां चिपिटान्द्रष्टुं तमादाय प्रचक्रमे ॥७७
चिपिटग्रासमेकैकं गृहीत्वा प्रतिभाजनात् ।
प्रददे सपरीहासं श्रीमुखे श्रीमहाप्रभोः ॥७८
हसन्नेकैकमादाय पुनर्ग्रासं महाप्रभुः ।
तमप्यभोजयत्तस्य मुखे न्यस्य स्मिताकुलः ॥७६
इत्थं विचरतो नित्यानन्दस्याखिलमण्डले ।
उत्थिता वैष्णवाः सर्वे तद्रङ्गं ददृशुर्मुदा ॥८०
कथङ्कारं भ्रमत्येष इति ज्ञातं न केनचित् ।
लेभे सौभाग्यवान् कश्चिद्दर्शनं श्रीमहाप्रभोः ॥८१
अथागत्यासने नित्यानन्दप्रभुरुपाविशत् ।
चतुष्कुण्डीभृतान् शुद्धचिपिटान्नयस्य दक्षिणे ॥८२
उपवेशितवांस्तत्र श्रीमहाप्रभुमासने ।
ततो भक्तुमुपक्रान्तौ चिपिटान् भ्रातरावुभौ ॥८३
नित्यानन्दप्रभुर्दृष्ट्वाभवदानन्दित स्तदा ।
तत्क्षणात् कतिशो भावावेशास्तेन प्रकाशिताः ॥८४
यूयं भुङ्ग्ध्वं हरीत्युक्त्वेत्याज्ञप्ते प्रभुणा ततः ।
भुवनं पूरयामासोत्थितो हरि-हरि-ध्वनिः ॥८५
ततो हरि-हरीत्युक्त्वा भक्षयन्ति स्म वैष्णवाः ।
सर्वेषां स्मृतमेवाभूत्तेषां पुलीनभोजनम् ॥॥८६
कृपालू परमोदारौ नित्यानन्दमहाप्रभू ।
रघुनाथस्य सौभाग्यमीत्थं स्वीचक्रतुस्तदा ॥८७
इह को नु विजानातु नित्यानन्दप्रभोः कृपाम् ।
पुलीने भोजयामास योह्यानीय महाप्रभुम् ॥८८
रामदासादयो गोपाः प्रेमाविष्टेन चेतसा ।
मेनीरे जाह्नवीतीरं यमुनापुलीनं तदा ॥८६

श्रुत्वा महोत्सवं ग्रामाद्ग्रामाद् विक्रयिका जनाः ।
विक्रेतुं चिपिटान् रम्भादध्यामीक्षीकमानयन् ॥९०
वस्तु यद् यावदानीतं क्रीतं मूल्येन तत्ततः ।
क्रीत्वा मूल्येन तद्वस्तु तत्रासावेव भोजितः ॥९१
जना यावन्त आयातास्तत्र दर्शनकौतुकात् ।
भुक्तवन्तश्च तावन्तः कदली-चिपिटान्दधि ॥९२
नित्यानन्दप्रभुर्भुक्त्वा विहिताचमनस्तदा ।
कुण्डीचतुष्टयोद्वृत्तं रघुनाथाय दत्तवान् ॥९३
तिसृष्वन्यासु कुण्डीषु शेषो यावानवर्त्तत ।
प्रभुः कवलशः सर्वभक्तेभ्योऽप्यखिलं ददौ ॥९४
श्रीमदङ्गं प्रभो विप्रश्चन्दनेनाथ लिप्तवान् ।
कुसुमस्रजमानीय तस्य कण्ठतटे दधौ ॥९५
मुखवासाय ताम्बूलं सेवकेन समर्पितम् ।
प्रभुश्चर्वितुमारेभे हास्यश्रीमण्डिताननः ॥९६
माल्य-चन्दन-ताम्बूल-शेषो यावानविद्यत ।
तावन्तं श्रीकरेणासौ सर्वेभ्यो वण्टयन्ददौ ॥९७
भुक्तशेषं प्रभोर्लब्ध्वा रघुनाथोऽतिनन्दितः ।
सर्वमात्मजनैः सार्द्धं बुभुजे विभजन्नसौ ॥९८
नित्यानन्दप्रभोरेष विहारो वर्णितो मया ।
यस्तावत् ख्यातनामास्ति दधिचिपिटकोत्सवः ॥९९
प्रभौ गच्छति विश्राममवसानं गतं दिनम् ।
ततः सङ्कीर्त्तनारम्भोऽभवद्राघवमन्दिरे ॥१००
नित्यानन्दप्रभु र्भक्तान्नर्त्तयन् प्रथमं ततः ।
अन्ते नृत्यन् स्वयं प्रेम्णा सर्वमप्लावयज्जगत् ॥१०१
स्वयं महाप्रभु स्तस्य नर्त्तनं स्म निरीक्षते ।
नित्यानन्दं निरैक्षन्त सर्वे न त्वपरं जनम् ॥१०२

नित्यानन्दस्य नृत्यं हि तदीयमिव नर्त्तनम् ।
नासीत्तत्तुलनायोग्यं किञ्चिदत्र जगत्रये ॥१०३
माधुरीं तस्य नृत्यस्य को नु वर्णयितुं क्षमः ।
महाप्रभुरपि द्रष्टुमाययौ यस्य नर्त्तनम् ॥१०४
अथ नृत्यं प्रभुः कृत्वा यदा विश्राममग्रहीत् ।
भोजनस्य कृते तस्मै पण्डितोऽथ न्यवेदयत् ॥१०५
प्रभुः स्वगणमादाय भोजनार्थ मुपाविशत् ।
पातयन्नासनं स्वस्य दक्षिणाहि महाप्रभोः ॥१०६
श्रीमहाप्रभुमायातं निषण्णञ्च तदासने ।
पश्यतो राघवस्यान्तरानन्दो ववृधे भृशम् ॥१०७
प्रसादं स्थापयामास स भ्रात्रोरुभयोः पुरः ।
वैष्णवेभ्यश्च सर्वेभ्यस्तदन्ते पर्य्यवेशयत् ॥१०८
दिव्यः शाल्योदनो नानाविधाः पायसपिष्टकाः ।
व्यञ्जनानि विचित्राणि निन्द्यमानामृतानि च ॥१०९
राघवस्येष्टदेवस्य प्रसादोह्यमृताधिकः ।
यं महाप्रभुरप्यत्तुमाजगाम पुनः पुनः ॥११०
विधाय राघवः पाकं यदा भोगं न्यवेदयत् ।
तदा महाप्रभोरर्थे पृथग्भोगमयोजयत् ॥१११
प्रत्यहं भक्षयामास तत्रैव श्रीमहाप्रभुः ।
आत्मनो दर्शनं तस्मै प्रददे चान्तरान्तरा ॥११२
मुहुरानीय भोज्यानि परिवेश्य च राघवः ।
सयत्नं भोजयाभास निःशेषं भ्रातरावुभौ ॥११३
अज्ञेयान् कतिधा ताभ्यामुपहारांश्च दत्तवान् ।
राधादेवी स्वहस्तेनापचद् यांस्तस्य वेश्मनि ॥११४
दुर्वाससो वरेणैव प्राप्ता सा पाककौशलम् ।
पाकस्य माधुरी तस्याः स्वादीयस्यमृतादपि ॥११५

प्रसादं माधुरीसारं हृद्यं सौरभसम्भृतम् ।
भुञ्जानौ परमां तृप्तिं प्राप्तौ तौ भ्रातरौ तदा ॥११६

रघुनाथं यदा सर्वे भोजनायान्वरुन्धत ।
तदोक्तं पण्डितेनायं भोक्ष्यतेऽतःपरं त्विति ॥११७

आकण्ठं पूरयित्वा तैः सर्वैर्भक्तैरभुज्यत ।
हरिध्वनिश्च कुर्वद्भिरुत्थायाचमनं कृतम् ॥११८

भ्रातरौ भुक्तवन्तौ तौ विहिताचमनौ ततः ।
माल्यैश्चन्दनलेपैश्च भूषयामास राघवः ॥११९

वीटिकां भोजयित्वा तौ कृत्वा तत्पादवन्दनम् ।
दत्तवान् सर्वभक्तेभ्यो वीटिकाचन्दनस्रजः ॥१२०

महतो करुणा तस्य रघुनाथेऽभवत्ततः ।
तस्मै भ्रातृद्वयोच्छिष्ट-पात्रद्वयमसौ ददौ ॥१२१

तमुवाच च चैतन्यप्रभुर्भक्षितवानिह ।
तच्छेषं लभमानस्य खण्डितं तव बन्धनम् ॥१२२

प्रभुस्तिष्ठति भक्तानां गृहे चित्ते च सर्वदा ।
स्वतन्त्रो भगवान् जातु गुप्तो व्यक्तोऽथवा क्वचित् ॥१२३

सदा वसति सर्वत्र स सर्वव्यापकः प्रभुः ।
इत्यत्र कृतसन्देहोऽवश्यमेव विनश्यति ॥१२४

नित्यानन्दोऽथ गङ्गायां प्रभाते स्नानमाचरन् ।
मूले तस्यैव वृक्षस्य न्यषीदत् स्वगणैर्वृतः ॥१२५

रघुनाथस्तमभ्येत्य कुर्वंस्तत्पादवन्दनम् ।
राघवस्य मुखेनासौ किञ्चिदेवं न्यवेदयत् ॥१२६

अधमः पामरश्चास्मि हीनो जीवाधमोऽप्यहम् ।
चैतन्यचरण-प्राप्त्यै लालसा मम जायते ॥१२७

चन्द्रं ग्रहीतुकामेन वामनेनेव तन्मया ।
कृतो भूयान् प्रयत्नोऽपि सिद्धिं नैति कथञ्चन ॥१२८

अहं गेहादिकं त्यक्त्वा यतिकृत्वः पलायितः ।
पितरौ ततिकृत्वो मां बद्ध्वास्थापयतां गृहे ॥१२९
विना ते करुणां कोऽपि चैतन्यं लभते नहि ।
तवैवानुग्रहं लब्ध्वाधमेनापि स लभ्यते ॥१३०
सन्त्रस्तोऽहमयोग्योऽपि तुभ्यमित्थं निवेदयन् ।
गोस्वामिन् देहि चैतन्यं मह्यं त्वमनुकम्पया ॥१३१
मूर्द्ध्नि मे चरणौ धृत्वा प्रसीद ब्रूहि चाशिषम् ।
विघ्नलेशं विनैव श्रीचैतन्यो लभ्यता मिति ॥१३२
श्रुत्वा प्रभुर्हसन्नूचे तदा भक्तगणं प्रति ।
अस्य वैषयिकं सौख्यं भवतीन्द्रसुखोपमम् ॥१३३
चैतन्यकृपया नास्मै रोचते तन्मनागपि ।
चैतन्याङ्घ्रिं लभस्वेति ब्रूतैनं यूयमाशिषम् ॥१३४
लभते योहि कृष्णस्य चरणाम्बुजसौरभम् ।
तस्य भान्ति नहि ब्रह्मलोकादिकसुखान्यपि ॥१३५

"तथाहि श्रीमद्भागवते पञ्चमस्कन्धे चतुर्दशाध्याये
द्विचत्वारिंशः श्लोकः—

यो दुस्त्यजान्दारसुतान् सुहृद्राज्यं हृदिस्पृशः ।
जहौ युवैव मलवदुत्तमः-श्लोकलालसः ॥२॥"

स्वसमीपमुपस्थाप्य रघुनाथमथ प्रभुः ।
तन्मूर्द्ध्नि चरणौ न्यस्यन् वक्तुमेवं प्रचक्रमे ॥१३६
अनुष्ठितं त्वयैवेदमेवं पुलिनभोजनम् ।
त्वामेव दयमानोऽसौ गौरोऽप्यागतवानिह ॥१३७
त्वय्येव कृपया दुग्धचिपिटान् भुक्तवान् प्रभुः ।
भुक्तवांश्च प्रसादं स रात्रावालोक्य नर्त्तनम् ॥१३८
त्वामेवोद्धर्त्तुकामोऽसौ श्रीगौरः स्वयमागतः ।
सद्यश्छिन्ना हि यावन्तो बन्धा विघ्नादयस्तव ॥१३९

स्वरूपस्यैव हस्ते च प्रभु स्त्वामर्पयिष्यति ।
अन्तरङ्गतया भृत्यं पादयोस्त्वा नियोद्यते ॥१४०
स्वगेहाय प्रतिष्ठस्व निरुद्वेगेन चेतसा ।
निर्विघ्नं लप्स्यसे शीघ्रं चैतन्यचरणाविति ॥१४१
तेनाशीर्वचने तस्मै सर्वभक्तैः प्रयोजिते ।
रघुनाथोऽपि सर्वेषां ववन्दे चरणान्मुदा ॥१४२
प्रभोराज्ञां गृहीत्वाथ सोऽनुज्ञतश्च वैष्णवैः ।
राघवेण समं युक्तिं कृतवान् रहसि स्थितः ॥१४३
युक्तिं कृत्वा शतं मुद्राः स्वर्णञ्च सप्ततोलकम् ।
निभृतं न्यस्तवान् हस्ते प्रभोर्भाण्डाधिकारिणः ॥१४४
न्यषेधत्तञ्च नेदानीं प्रभवे कथ्यतां त्वया ।
प्राप्ताय स्वगृहं तस्मै सर्वं विज्ञाप्यतामिति ॥१४५
अथ तं नीतवान् स्वस्य गेहं राघवपण्डितः ।
देवं सन्दर्शयं स्तस्मै दत्तवान् माल्यचन्दने ॥१४६
भोजनस्य कृते मार्गे प्रसादान् स ददौ बहून् ।
रघुनाथेन दासेन ततः प्रोक्तश्च पण्डितः ॥१४७
यावन्तः प्रभवो भृत्याश्चाश्रिताः प्रभुणान्विताः ।
तावतामप्यहं पादानाकाङ्क्षामि समर्चितुम् ॥१४८
विंशतिं पञ्चदश च द्वादश दश पञ्च च ।
द्वे च मुद्रा ददाम्येता यथायोग्यं विचारय ॥१४९
लिखन्नामानि सर्वेषां राघवस्य पुरो दधौ ।
यान्नाम्ना यावती मुद्रा स्यात्तेन सोप्यलेखयत् ॥१५०
अथ मुद्राः शतं तोलद्वयमानञ्च काञ्चनम् ।
न्यस्तवान् विनयप्रह्वो रघुनाथस्तदग्रतः ॥१५१
ततस्तत्पादयोर्धूलिं गृहीत्वा स्वगृहं गतः ।
नित्यानन्दकृपां प्राप्य स मेने चरितार्थताम् ॥१५२

तदा प्रभृति जात्वन्तःपुरं न प्राविशत् पुनः
शयनं कृतवान् दुर्गामन्दिरेऽसौ वहिःस्थिते ॥१५३
तत्र स्थितेषु सर्वेषु रक्षणाधिकृतेष्वसौ ।
नियतं चिन्तयामास नानोपायान् पलायितुम् ॥१५४
तदानीं गौड़देशीयाः सर्वे भक्ता महाप्रभुम् ।
द्रष्टुं प्रतस्थिरे सङ्घबद्धा नीलाचलं प्रति ॥१५५
रघुनाथस्तु तैः सार्द्धं प्रस्थातुं नाशकत्तदा ।
जाग्रद्भिः सङ्गिभिः साक्षाजगृहे तत्क्षणादसौ ॥१५६
सोत्कण्ठं चिन्तयन्नेव सौभाग्येन पुनर्वहिः ॥
देवीमन्दिरमध्येऽसौ शयानोऽभवदेकदा ॥१५७
अवशिष्टचतुर्दण्डमानायां रजनौ तदा ।
यदुनन्दन आचार्य्यो मन्दिरं प्रविवेश तत् ॥१५८
स वासुदेवदत्तस्याभूदनुग्रहभाजनम् ।
गुरुश्च रघुनाथस्य तत् कुलस्य पुरोहितः ॥१५६
अद्वैतस्य प्रभोरन्तरङ्गः शिष्यो बभूव सः ।
आचार्यस्याज्ञया मेने चैतन्यं प्राणसम्पदम् ॥१६०
तस्मिंस्तत्र समागत्य चत्वरे समुपस्तिते ।
रघुनाथस्तमभ्येत्य दण्डवत् प्रणतोऽभवत् ॥१६१
शिष्यः कश्चन तस्यैवाभवत्तद्देव-पूजकः ।
देवसेवां जहौ सद्य स्तत्साधनकृतेऽधुना ॥१६२
आचार्यो रघुनाथं तत् प्रोचे स साध्यतां त्वया ।
नास्त्यन्यो ब्राह्मणः कोऽपि स देवं पूजयेद् यथा ॥१६३
इत्युक्त्वा राघुनाथं स गृहीत्वा प्रस्थितो यदा ।
रक्षिवर्गस्तदा रात्रिशेषे निद्रां गतोऽभवत् ॥१६४
आचार्य्यस्य गृहं तस्य गृहात् पूर्वदिशि स्थितम् ।
तौ वदन्तौ च शृण्वन्तौ पथा तेनैव जग्मतुः ॥१६५

गत्वाद्ध पथमाचार्य्यं रघुनाथो न्यवेदयत् ।
तमहं साधयन् विप्रं प्रेरयिष्यामि तेऽधुना ॥१६६
सुखेन स्वगृहं गच्छ त्वमाज्ञापय मामिति ।
छलेनानेन तस्याज्ञां याचित्वा निर्णिनाय सः ॥१६७
भृत्यानां रक्षकाणाञ्च कोऽपि नास्ति मया सह ।
अनेनैव प्रसङ्गेन सुष्ठु स्यान्मे पलायनम् ॥१६८
इत्येवं निर्णयन् पूर्वामुखः प्रस्थातु मुद्यतः ।
पश्चात् कश्चन नास्तीति पराचीनो निरैक्षत ॥१६९
श्रीनित्यानन्द-चैतन्य-चरण-ध्यानमाश्रयन् ।
त्यक्त्वा रथ्यां प्रतस्थेऽसौ धावन्नपपथेन तु ॥१७०
मार्गं हित्वा प्रतिग्रामं गच्छन्नासीद्वने वने ।
काय-वाङ्मनसै ध्यायंश्चैतन्यचरणद्वयम् ॥१७१
एकेनैव दिनेनासौ क्रोशान् पञ्चदशागमत् ।
सायमागत्य गोपस्य गोष्ठेऽतिष्ठच्च कस्यचित् ॥१७२
तमनश्नन्तमालोक्य गोपो दुग्धमथानयत् ।
ददौ तस्मै स पीत्वा तत्तत्राशेत पतन् भुवि ॥१७३
इतस्तद्रक्षका भृत्या न लब्ध्वा तस्य दर्शनम् ।
पृष्टवन्तो गुरुं तस्योदन्तं तत्सन्निधिं गताः ॥१७४
तेनोक्तं स गृहं यातो ममाज्ञां प्रार्थयन्निति ।
महान् कोलाहलो जातो रघुनाथे पलायिते ॥१७५
तत्पितोवाच गौड़ीयैर्भक्तैः सर्वैः समन्ततः ।
प्रस्थानं विहितं नीलाचलाय प्रभुसन्निधौ ॥१७६
रघुनाथोऽपि तैः सार्द्धमितो नूनं पलायत ।
दश लोकाः प्रतिष्ठन्तां तमादायानयन्त्विति ॥१७७
पत्रीं सविनयं दातुं शिवानन्दाय सोऽलिखत् ।
परावर्त्य त्वया पुत्रो ममात्र प्रेष्यतामिति ॥१७८

गतवन्तस्ततो लोका दश ते झाँकरावधि ।
वैष्णवानां गणं तत्र झाँकरायामथाप्नुवन् ॥१७९
वार्त्तां पृष्टः शिवानन्दो ददद्भिस्तैश्च पत्रिकाम् ।
प्रत्यवादीज्जनांस्तांश्च न सोऽत्रागतवानिति ॥१८०
परावृत्य गतास्तेऽथ निजगेहं जना दश ।
ततो बभूवतुस्तस्य पितरौ चिन्तयाकुलौ ॥१८२
इतश्च रघुनाथस्तु प्रातस्तत्र समुत्थितः ।
पूर्वास्यतां परित्यज्य प्रतस्थे दक्षिणामुखः ॥१८२
छत्रभोगमतिक्रम्य सरणिञ्च परित्यजन् ।
क्षुद्रग्रामपथेनैव प्रस्थानं कृतवानसौ ॥१८३
अभुञ्जानं दिनं सर्वं गच्छन्तञ्चाप्यनारतम् ।
क्षुधा नाबाधत प्रेप्सुं चैतन्यचरणावमुम् ॥१८४
कदाचिच्चर्वयन् जातु पचन् दुग्धञ्च वा पिवन् ।
अरक्षत् स निजप्राणान् यथाप्राप्तेन वस्तुना ॥१८५
दिनै र्द्वादशभिः प्राप्नोदसौ श्रीपुरुषोत्तमम् ।
भुक्तवांश्च पथा गच्छन् केवलं दिवसत्रयम् ॥१८६
स्वरूपादिभि रासीने तत्र गोस्वामिनि प्रभौ ।
रघुनाथः समायात स्तदानीं समगच्छत ॥१८७
दूरे प्रणम्य तिष्ठन्तमङ्गने तञ्च पश्यता ।
उक्तं मुकुन्ददत्तेन रघुनाथोऽयमागतः ॥१८८
अथेहीति ब्रुवाणस्य पादौ जग्राह स प्रभोः ।
तमालिङ्गितवान् गाढ़ं समुत्थाय महाप्रभुः ॥१८९
स्वरूप-प्रमुखा भक्ता रघुताथेन वन्दिताः ।
आशिश्लिषुरमुं सर्वे वीक्ष्य तस्मिन् प्रभोः कृपाम् ॥१९०
उक्तोऽसौ प्रभुणा कृष्णकरुणा वलवत्तमा ।
विषयामेध्यगर्त्तेभ्यस्त्वामाकृष्टवती वलात् ॥१९१

सोऽप्युक्तो रघुनाथेन कृष्णो न ज्ञायते मया ।
तवैव कृपयाकृष्टः प्रसह्यास्मीति मन्यते ॥१६२
प्रभुरूचे पिता ज्येष्ठतातश्च द्वाविमौ तव ।
अहं मातामहौ मन्ये सम्वन्धाच्चक्रवर्त्तिनः ॥१६३
तौ चक्रवर्त्तिनो भ्रातृकल्पौ दासौ च सम्मतौ ।
ताभ्यां सार्द्धं परीहासं प्रायोऽतः कृतवानहम् ॥१६४
कीटौ विषयविष्ठाया गर्त्तस्थौ तौ गुरू तव ।
दुःखाग्निमपि मन्येते विषयं सुखशीतलम् ॥१६५
कुर्वन्तावपि साहाय्यं भक्तिञ्च ब्राह्मणेषु तौ ।
वैष्णवाविव दृश्येते नतु तौ शुद्धवैष्णवौ ॥१६६
विषयो हि स्वभावेन महान्धं कुरुते जनम् ।
कारयत्येव तत्कर्म येन स्याद्भवबन्धनम् ॥१६७
त्वां समुद्धृतवान् कृष्णो विषयात्तादृशादपि ।
न वक्तुं शक्यते कृष्णकृपाया महिमा खलु ॥१६८
इत्युक्त्वा रघुनाथस्य दृष्ट्वाङ्गं मलिनं कृशम् ।
चेतसा करुणार्द्रेण स्वरूपं प्रोक्तवान् प्रभुः ॥१६९
अधुना रघुनाथोऽयं मया तुभ्यं समर्प्यते ।
पुत्रः सेवक इत्येवं त्वयाङ्गीक्रियतामयम् ॥२००
रघुनाथास्त्रयो नाम्ना वर्त्तन्ते मम सन्निधौ ।
अद्यावधि स्वरूपस्य रघुर्नाम्ना भवत्वयम् ॥२०१
इत्युक्त्वा रघुनाथस्य करौ गृह्णन् स्वयं प्रभुः ।
तमेवमर्पयामास स्वरूपस्यैव हस्तयोः ॥२०२
स्वरूपस्तु यथाज्ञाभून्महाप्रभोरिति ब्रुवन् ।
सस्नेहं रघुनाथाय पुनरालिङ्गनं ददौ ॥२०३
गदितुं भक्तवात्सल्यं चैतन्यस्य न शक्यते ।
रघुनाथे दयां कुर्वन् गोविन्दं प्रभुरब्रवीत् ॥२०४

कृतवान् रघुनाथोऽयं बहुशो लङ्घनं पथि ।
कतिचिद्दिवसानस्य सुष्ठु सन्तर्पणं कुरु ॥२०५
रघुनाथ मथावादीद् गत्वा त्वं स्नाहि सागरे ।
ततोदृष्ट्वा जगन्नाथमत्रागत्य च भक्षय ॥२०६
इत्युक्त्वा प्रभुरुत्तस्थौ कर्त्तुं माध्याह्निकीं क्रियाम् ।
रघुनाथेन दासेन भक्ताः सर्वेऽथ सङ्गताः ॥२०७
अनुकम्पां प्रभोस्तस्मिँल्लक्षयन्तोऽतिविस्मिताः ।
अकुर्वन् रघुनाथस्य ते सौभाग्यप्रशंसनम् ॥२०८
रघुनाथस्ततो गत्वा समुद्रमवगाह्य च ।
दृष्ट्वा च श्रीजगन्नाथं गोविन्दं निकषागमत् ॥२०६
गोविन्दः प्रददौ तस्मै प्रभोरुच्छिष्टभाजनम् ।
मनसानन्दितेनासौ प्रसादं भुक्तवांस्ततः ॥२१०
एवमासीत् स्वरूपस्य चरणावाश्रयन्नसौ ।
प्रसादं दत्तवांस्तस्मै गोविन्दः पञ्चवासरान् ॥२११
परेद्युः प्रभृति प्रेक्ष्य दैवं पुष्पाञ्जलिं निशि ।
तिष्ठन्नेवाभवत् सिंहद्वारे भिक्षाकृते च सः ॥२१२
सर्वे विषयिनस्तावज्जगन्नाथस्य सेवकाः ।
देवसेवां समापय्य रात्रौ यान्ति निजालयम् ॥२१३
ते सिंहद्वारि भिक्षान्नप्रार्थिनो वीक्ष्य वैष्णवान् ।
कृपया दापयन्त्यन्नं तेभ्यः क्रय्यप्रसारिभिः ॥२१४
तत्रैवं सर्वकालेषु व्यवहारः प्रवर्त्तते ।
सिंहद्वारं श्रयन्तस्तद्भक्तास्तिष्ठन्त्यकिञ्चनाः ॥२१५
नामसङ्कीर्त्तनं सर्वं दिनं कुर्वन्ति वैष्णवाः ।
ईक्षन्ते च जगन्नाथं स्वच्छन्देन यदा तदा ॥२१६
अन्नसत्रं गताः केचिद् यथालब्धञ्च भुञ्जते ।
सिंहद्वारेऽवतिष्ठन्ते केचिद् भिक्षाकृते निशि ॥२१७

वैराग्यमेव मुख्यं हि भक्तानां श्रीमहाप्रभोः।
यद्दृष्ट्वा भगवान् गौरो मनसा प्रीतिमावहत् ॥२१८
प्रभुमूचेऽथ गोविन्दः प्रसादं नेह भक्षयन्।
रघुनाथः स्थितः सिंहद्वारे भुङ्क्ते प्रयाचितम् ॥२१९
इति श्रुत्वा प्रभुस्तुष्टमना वक्तुं प्रचक्रमे।
कुरुते साधु वैराग्यधर्ममेषोऽनुतिष्ठति ॥२२०
एष वैरागिणां धर्मो यत् सदा नामकीर्त्तनम्।
भिक्षामात्राशनेनैव तथा जीवन-धारणम् ॥२२१
यस्तु भूत्वापि वैरागी परमेव प्रतीक्षते।
सोऽसिद्धार्थो भवत्येव तञ्च कृष्णोऽप्युपेक्षते ॥२२२
यस्य वैरागिणो जिह्वा रसास्वादनलालसा।
स रसाधीनतां याति परमार्थाच्च हीयते ॥२२३
इह कुर्वीत वैरागी नामसङ्कीर्त्तनं सदा।
तथा मूलैः फलैः शाकपत्रैश्चोदरपूरणम् ॥२२४
यो लालस्येन जिह्वाया इतश्चेतश्च धावति।
स कृष्णं लभते नैव शिश्नोदरपरायणः ॥२२५
अन्येद्यू रघुनाथोऽथ स्वरूपस्य पदान्तिकम्।
गत्वा निवेदयामास निजकृत्यविधेः कृते ॥२२६
न ते जानाम्यभिप्रायं मया त्याजयतो गृहम्।
किं मया साम्प्रतं कृत्यं तत् प्रभो शाधि मामिति ॥२२७
न बभाषे वचोमात्रं रघुनाथः प्रभोः पुरः।
ऊचे स्वरूप-गोविन्द-मुखेन जातु किञ्चन ॥२२८
अन्येद्यवि स्वरूपेण प्रभोरग्रे निवेदितम्।
प्रभवे रघुनाथोऽयं निवेदयति किञ्चन ॥२२९
प्रभो किं मम कर्त्तव्यं नाहं जाने प्रयोजनम्।
श्रीमुखेन स्वयं शिक्षा त्वया मे दीयतामिति ॥२३०

आकर्न्येदं हसन्नूचे रघुनाथं महाप्रभुः ।
पूर्वमेव स्वरूपोऽयं शिक्षकस्ते वृतो मया ॥२३१
साध्यसाधनयोस्तत्त्वं शिक्षस्वास्य समीपतः ।
अहं तावन्न जानामि यावज्जानात्ययं जनः ॥२३२
तथापि त्वं ममाज्ञायां श्रद्धावान् जायसे यदि ।
वचनानि ममैतानि करिष्यस्येव निश्चितम् ॥२३३
न श्रूयतां वचोग्राम्यं ग्राम्यवार्त्ता च नोच्यताम् ।
न रुच्यं भुज्यतां नैव सुचेलं परिधीयताम् ॥२३४
अमानिना मानदेन कृष्णेति जप्यतां सदा ।
मानसेनैव सेव्येतां राधाकृष्णौ व्रजे त्वया ॥२३५
संक्षेपेणोपदेशोऽयं मया तावत् कृतोऽधुना ।
प्राप्स्यसि त्वं स्वरूपात्तु सविशेषमिमं पुनः ॥२३६

"तथाहि पद्यावल्यां विंशाङ्कधृतं श्रीकृष्णचैतन्यचन्द्रेणोक्तं पद्यम्—

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥३॥"

इत्याकर्ण्य प्रभोः पादौ रघुनाथेन वन्दितौ ।
ततस्तं गाढ़माश्लिष्यत् कारुण्येन महाप्रभुः ॥२३७
पुनस्तेन स्वरूपाय रघुनाथः समर्पितः ।
स्वरूपेण समं सेवामन्तरङ्गां चकार सः ॥२३८
तदानीं तत्र गौड़ीया भक्ताः सर्वे समाययुः ।
ते महाप्रभुणा सार्द्धं समगच्छन्त पूर्ववत् ॥२३९
गुण्डिचां मार्जयामास तानादाय महाप्रभुः ।
तैश्च सर्वैः समं वन्यभोजनं कृतवानसौ ॥२४०
सर्वैस्तै रथयात्रायां नृत्यन्तञ्च महाप्रभुम् ।
पश्यतो रघुनाथस्य मनो जातं चमत्कृतम् ॥२४१

तत्र तैर्निखिलै र्भक्तै रघुनाथेऽथ सङ्गते ।
तस्मिन्नद्वैत आचार्य्यः कृतवान् भूयसीं कृपाम् ॥२४२
अथ सेनः शिवानन्दो विवृत्यैवं तमब्रवीत् ।
पित्रा ते प्रहिता लोका दश त्वां नेतुमालयम् ॥२४३
मह्यञ्च लिखिता पत्री प्रेरणस्य कृते तव ।
त्वामलब्ध्वा गृहं तेऽपि झाँकरातो गता इति ॥२४४
भक्तास्ते चतुरो मासान् स्थित्वा गौड़ं गताः पुनः ।
तच्छ्रुत्वा रघुनाथस्य पिता तेभ्योऽहिनोज्जनान् ॥२४५
तैरभ्येत्य शिवानन्दसेन एवमपृच्छयते ।
कच्चिद् दृष्टस्त्वया कोऽपि वैष्णवो निकषा प्रभुम् ॥२४६
गोवर्द्धनस्य पुत्रोऽसौ रघुनाथाभिधानकः ।
अपि नीलाचले त्वं किं तमभिज्ञातवानिति ॥२४७
तान् प्रत्यूचे शिवानन्दः सोऽस्त्येव निकषा प्रभुम् ।
असौ परमविख्यातो नाभिजानाति कोनु तम् ॥२४८
स्वरूपस्य समीपेऽसौ प्रभुणास्ति समर्पितः ।
स चास्ति प्राणतुल्योहि भक्तानां श्रीमहाप्रभोः ॥२४९
नामसङ्कीर्त्तनं कुर्वन् रात्रिन्दिवमनारतम् ।
स प्रभोश्चरणाम्भोजं क्षणमात्रं न मुञ्चति ॥२५०
परमं तस्य वैराग्यं न स्तो भक्ष्य-परिच्छदौ ।
प्राणान् रक्षति यत् किञ्चिद्भुञ्जानोऽसौ यथा तथा ॥२५१
दृष्ट्वा पुष्पाञ्जलिं रात्रिदण्डेऽथ दशमे गते ।
भोजनस्य कृते सिंहद्वारे तिष्ठति चान्वहम् ॥२५२
किञ्चिद्ददाति चेत् कोऽपि तदा तद्भक्षयत्यसौ ।
करोत्युपोषणं जातु चणकांश्चर्वयत्युत ॥२५३
इत्याकर्ण्य जनास्तेऽपि गत्वा गोवर्द्धनान्तिकम् ।
रघुनाथस्य वृत्तान्तं सर्वमूचु र्यथाश्रुतम् ॥२५४

Bhaja Nitai Gour Radhe Syam, Japa Hare Krishna Hare Ram.

तन्मुखात् पितरौ श्रुत्वा दुःखेनाक्रान्तमानसौ ।
पुत्रार्थं मानुष-द्रव्य-प्रेरणे चक्रतुर्मनः ॥२५५
द्वौ भृत्यौ ब्राह्मणश्चैको मुद्राणाञ्च चतुःशती ।
तत्क्षणात् प्रेरिता स्ताभ्यां शिवानन्दस्य सन्निधौ ॥२५६
तानुवाच शिवानन्दो यूयं गन्तुं न शक्नुथ ।
यदाहं तत्र यास्यामि मया सार्द्धं गमिष्यथ ॥२५७
स्वगृहं गच्छतेदानीं गमिष्यामो वयं यदा ।
सममादाय नेष्यामस्तदा वः सकलानिति ॥२५८
कविश्रीकर्णपूरेण लिखितोऽयं प्रसङ्गतः ।
महिमा रघुनाथस्य निजग्रन्थे महत्तरः ॥२५९

"तथाहि श्रीचैतन्यचन्द्रोदयनाटके दशमाङ्के तृतीयः श्लोकः—

आचार्य्यो यदुनन्दनः सुमधुरः श्रीवासुदेवप्रिय-
स्तच्छिष्यो रघुनाथ इत्यधिगुणः प्राणाधिको मादृशाम् ।
श्रीचैतन्यकृपातिरेक-सतत-स्निग्धः स्वरूप-प्रियो
वैराग्यैकनिधि र्न कस्य विदितो नीलाचले तिष्ठताम् ॥४॥

तथाहि तत्रैव चतुर्थः श्लोकः—

यः सर्वलोकैकमनोऽभिरुच्या
सौभाग्यभूः काचिदकृष्टपच्या ।
यस्यां समारोपणतुल्यकालं
तत्प्रेम-शाखी फलवानतुल्यम् ॥५॥"

शिवानन्दो यथोवाच प्रेरितांस्तान् जनान् प्रति ।
कविना कर्णपूरेण श्लोकाभ्यां वर्णितं तथा ॥२६०
शिवानन्देन वर्षान्ते नीलाद्रिं गच्छता सह ।
प्रस्थितौ रघुनाथस्य कृते द्वौ विप्र-सेवकौ ॥२६१
गृहीत्वा विप्रभृत्यौ तौ मुद्राशतचतुष्टयम् ।
मिलितौ रघनाथेन गत्वा नीलाचलं ततः ॥२६२

रघुनाथे तु तद्द्रव्यं नैवाङ्गीकृतवत्यपि ।
द्रव्यमादाय तत्रैवातिष्ठतां तावुभावपि ॥२६३
रघुनाथ स्ततस्ताभ्यामनुनीतोऽतियत्नतः ।
प्रभुं निमन्त्रयामास प्रतिमासं दिनद्वयम् ॥२६४
वराटाष्टपणानाञ्च व्ययोऽभूद्धि निमन्त्रणे ।
ब्राह्मणात् सेवकाच्चासौ तावन्मात्रं गृहीतवान् ॥२६५
एवं निमन्त्रणं वर्षद्वयं स कृतवान् प्रभोः ।
रघुनाथस्ततः पश्चाद्विरतोऽभून्निमन्त्रणात् ॥२६६
गते मासद्वयेऽप्येवं तावत्तेनानिमन्त्रितः ।
स्वरूपं परिपप्रच्छ श्रीशचीनन्दनः प्रभुः ॥२६७
भोजनामन्त्रणं कस्माद् रघुर्मे त्यक्तवानिति ।
स्वरूपोऽथावदत् सोऽन्तरेवं किञ्चिदतर्कयत् ॥२६८
मया विषयिणो द्रव्यैः प्रभुरेवं निमन्त्र्यते ।
न प्रसीदति चित्तं हि प्रभोस्तेनेति मन्यते ॥२६९
तद्द्रव्यं गृह्णतश्चित्तं न ममापि प्रसीदति ।
फलं निमन्त्रणस्यास्य मत्-प्रतिष्ठेति मन्यते ॥२७०
अनुरोधान्ममैवामन्त्रणं सम्मनुते प्रभुः ।
असम्मत्या तु मूर्खोऽयं जनो दुःखी भविष्यति ॥२७१
इत्येवं सुविचार्य्यैव तेन त्यक्तं निमन्त्रणम् ।
इत्याकर्ण्य स्वरूपोक्तं हसन्नूचे महाप्रभुः ॥२७२
अन्ने विषयिणां भुक्ते मालिन्यं मनसो भवेत् ।
कृष्णस्य स्मरणं न स्यान्मनसा मलिनेन तु ॥२७३
यत्तोषामन्नदानार्थं राजसं तन्निमन्त्रणम् ।
दातु र्भोक्तुश्च तेन स्यादुभयोर्मलिनं मनः ॥२७४
इयच्चिरं मया नीतं तस्य सङ्कोच-शङ्कया ।
साधु वृत्तं स्वयं ज्ञात्वा यदसौ त्यक्तवानिति २७५

रघुनाथो जहौ सिंहद्वारं कतिपयैर्दिनैः ।
अन्नसत्रं गतो भिक्षन् स भोक्तुञ्च प्रचक्रमे ॥२७६
तद् गोविन्द-मुखाच्छ्रुत्वा स्वरूपं पृष्टवान् प्रभुः ।
सिंहद्वारे रघु र्भिक्षाकृते तिष्ठन्न वर्त्तते ॥२७७
तेनोक्तं जायते दुःखं सिंहद्वारेऽस्य तिष्ठतः ।
अन्नसत्रं गतो भिक्षन्मध्याह्ने भक्षयत्यसौ ॥२७८
प्रभुरूचे कृतं साधु सिंहद्वारं विमुञ्चता ।
सिंहद्वारे कृतं भैक्ष्यं गणिकाचरणोपमम् ॥२७९

"तथाहि श्रीकृष्णचैतन्यदेवस्य—

अयमागच्छत्ययं दास्यति ।
अनेन न दत्तमयमपरः समेत्ययं दास्यति ।
अनेनापि न दत्तमन्यः समेष्यति स दास्यति ॥६॥"

अन्नसत्रे यथालब्धभोज्येनोदरपूरणम् ।
वचोऽन्यत्तत्र नास्त्येव कृष्णसङ्कीर्त्तनं सुखम् ॥२८०
इत्युक्त्वा रघवे भूयः प्रसादेन ददौ प्रभुः ।
शिलां गोवर्द्धनस्याद्रेर्गुञ्जामालाञ्च तत्क्षणात् ॥२८१
ते उभे शङ्करानन्दसरस्वत्यानयत् पुरा ।
शिलां वृन्दावनात्ताञ्च गुञ्जामालाञ्च तां पुनः ॥२८२
तां पार्श्वग्रथितां मालां शिलां गोवर्द्धनस्य च ।
असौ तद्द्वयमानीय ददावग्रे महाप्रभोः ॥२८३
अपूर्वं तद्द्वयं प्राप्य परितुष्टोऽभवत् प्रभुः ।
स्मरणावसरे कण्ठे गुञ्जामालां दधार च ॥२८४
हृदि चाक्ष्णोश्च पस्पर्श शिलां गोवर्द्धनस्य ताम् ।
जातु नासिकया जघ्रौ कदाचिच्छिरसाग्रहीत् ॥२८५
सा शिला चाभवत् सिक्ता नेत्राम्भोभिर्निरन्तरम् ।
शिलासौ प्रभुणा प्रोक्ता श्रीकृष्णस्य तनूरिति ॥२८६

एवं वर्षत्रयं धृत्वा शिलां मालाञ्च स प्रभुः ।
तद्द्वयं रघुनाथाय ददौ तुष्टमनास्तदा ॥२८७

रघुनाथं प्रभुः प्रोचे शिलेयं कृष्णविग्रहः ।
त्वयास्याः क्रियतां सेवा सदा साग्रहचेतसा ॥२८८

शिलायाः सात्त्विकी पूजा नित्यञ्चास्या विधीयताम् ।
अचिरात् प्राप्स्यतेऽवश्यं कृष्णप्रेमधनं त्वया ॥२८९

एककुम्भमितं वारि तुलसी-मञ्जरी तथा ।
इत्याभ्यां सात्त्विकी सेवा कर्त्तव्या शुद्धचेतसा ॥२९०

मञ्जर्य्यः कोमला अष्टावभितो द्विदलान्विताः ।
दातव्याश्च त्वयाह्यस्यै श्रद्धासम्भृतचेतसा ॥२९१

इत्याज्ञाप्य प्रभुस्तस्मै श्रीहस्तेन ददौ शिलाम् ।
ततः सानन्द मारेभे रघुनाथोऽपि सेवितुम् ॥२९२

द्वे वितस्तिमिते वस्त्रे तस्मा एकञ्च पीठकम् ।
जलाहरणकुम्भञ्च स्वरूपो दत्तवान् पुनः ॥२९३

रघुनाथो यथादेशं पूजयामास तां शिलाम् ।
पूजाकाले ददर्शासौ शिलां व्रजेन्द्रनन्दनम् ॥२९४

गोवर्द्धन-शिला दत्ता प्रभुणा निजपाणिना ।
इति ध्यात्वाभवत् प्रेम्णा प्लावितो रघुनाथकः ॥२९५

सुखं यावदभूत्तस्य सेवया तुलसीजलैः ।
नाभूत् षोड़शभिस्तावदुपचारैः कदाचन ॥२९६

एवमेवार्चयन्तं तं कियन्त्येव दिनान्यथ ।
स्वरूपः कथयामास रघुनाथमिदं वचः ॥२९७

देहि खाजाख्यमिष्टान्नं क्रीत्वाष्टाभिर्वराटकैः ।
श्रद्धया दीयमानं तत् सुधातुल्यं भवेदिति ॥२९८

स कपर्दाष्टक-क्रीतां खाजामर्पितवांस्ततः ।
स्वरूपस्याज्ञया सर्वं गोविन्द स्तत् समादधे ॥२९९

रघुनाथो यदा ते द्वे शिलामाले च लब्धवान् ।
अभिप्रायं तदा गोस्वामिनस्त्वेवमचिन्तयत् ॥३००
प्रभुणा मे शिलां दत्त्वा गोवर्द्धनधरोऽर्पितः ।
गुञ्जामालां समर्प्यैवं दत्तं राधापदाम्बुजम् ॥३०१
मुदैवं रघुनाथस्तु वाह्य-विस्मृतिमाप्नुवन् ।
कायेन मनसा चासौ श्रीगौराङ्गमसेवत ॥३०२
शक्नुयाद् रघुनाथस्य कोऽनन्ताँल्लेखितुं गुणान् ।
नियमो रघुनाथस्य रेखेव प्रस्तराङ्किता ॥३०३
प्रहरान् सार्द्ध सप्तासौ स्मरन्निष्टमयापयत् ।
निद्राहारैश्च यामार्द्धं नासीत्तच्चापि कर्हिचित् ॥३०४
अहो तदीयवैराग्यं विस्मयावहभाषणम् ।
जिह्वायां सुरसस्पर्शं ददावाजीवनं न सः ॥३०५
छिन्नचीरञ्च कन्थाञ्च विना वस्त्रं न पर्य्यधात् ।
सोऽपालयत् प्रभोराज्ञां सावधानेन चेतसा ॥३०६
कृते जीवनरक्षाया यत् किञ्चिद्भक्षयन्नपि ।
परं निर्वेदमापन्नः स्वात्मानं धिक् चकार सः ॥३०७

"तथाहि श्रीमद्भागवते सप्तमस्कन्धे पञ्चदशाध्याय एकत्रिंशः

श्लोकः—

आत्मानञ्चेद् विजानीयात् परं ज्ञानधूताशयः ।
किमिच्छन् कस्य वा हेतो र्देहं पुष्णाति लम्पटः ॥७॥"

अविक्रीतं प्रसादान्नं यावद्विक्रयिणामभूत् ।
द्वित्रेष्वहःसु यातेषु विकृतिं तदपद्यत ॥३०८
सिंहद्वारे विनिक्षिप्तं विकृतान्नं गवां पुरः ।
दौर्गन्ध्यान्नाशितुं शेकुस्तैलङ्गीयाश्च धेनवः ॥३०९
तदन्नं रघुनाथेन नक्तमानयता गृहम् ।
वारिभिर्बहुभिः क्षिप्तैः प्रक्षाल्य स्थापितं ततः ॥३१०

प्राप्तवान् मार्जयन् यावद्भक्तमन्तर्दृढं पुनः ।
रघुनाथस्तु तद्भक्तं लवणेनैव भुक्तवान् ॥३११
ईदृाग्छक्रे स्वरूपस्तं तथा कुर्वन्तमेकदा ।
हास्यं कुर्वंस्ततः किञ्चिद् याचित्वा भुक्तवांश्च तत् ॥३१२
स्वरूपोऽकथयद् भुङ्क्तेऽमृतमीदृक् त्वमन्वहम् ।
केयं ते प्रकृति र्नैव दातुमस्मभ्यमर्हसि ॥३१३
अथ शृण्वन्निमां वार्त्तां गोविन्दस्य मुखात् प्रभुः ।
अपरेद्यु स्तमभ्येत्य वक्तुमेवं प्रचक्रमे ॥३१४
किमिदं भुज्यते वस्तु त्वया किं मे न दीयते ।
इत्युक्त्वा ग्रासमेकं स गृह्णन् भक्षितवान् प्रभुः ॥३१५
गृह्णतोऽस्यापरं ग्रासं स्वरूपो हस्तमग्रहीत् ।
नेदं योग्यं तवेत्युक्त्वा बलादाच्छिद्य चाददे ॥३१६
प्रभुरूचेऽहमश्नामि प्रसादान् बहुधान्वहम् ।
प्रसादे क्वचिदन्यस्मिन्न लभे स्वादमीदृशम् ॥॥३१७
एवं बहुविधा लीलाश्चकार श्रीमहाप्रभुः ।
रघुनाथस्य वैराग्यं पश्यन्नन्तस्तुतोष च ॥३१८
आत्मोद्धारमिमं दासो रघुनाथः स्वपुस्तके ।
वर्णयामास चैतन्यस्तवकल्पतरौ स्वयम् ॥३१९

"तथाहि स्तवावल्यां चैतन्यस्तवकल्पवृक्ष एकादशः श्लोकः—

महासम्पद्दारादपि पतितमुद्धृत्य कृपया ।
स्वरूपे यः स्वीये कुजनमपि मां न्यस्य मुदितः ।
उरोगुञ्जाहारं प्रियमपि च गोवर्द्धनशिलां
ददौ मे गौराङ्गो हृदय उदयन्मां मदयति ॥८॥"

इदन्तु रघुनाथस्य मिलनं कथितं मया ।
श्रुत्वेदं लभते लोकश्चैतन्यचरणाम्बुजम् ॥३२०

आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥३२१

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे श्रीरघुनाथदासमिलनं नाम षष्ठः परिच्छेदः ।

—०—

अन्त्यलीलायां सप्तमः परिच्छेदः

"चैतन्यचरणाम्भोज-मकरन्द-लिहः सतः ।
भजे येषां प्रसादेन पामरोऽप्यमरो भवेत् ॥१॥"

भूयोजयतु चैतन्यो नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
अथ वर्षान्तरे प्राप्ते भक्तै गौड़निवासिभिः ।
अभ्युपेतैः समं सर्वै र्मिलितोऽभून्महाप्रभुः ॥२
तथा भक्तगणैः सार्द्धं विलासान् कुर्वति प्रभौ ।
भट्टो वल्लभ आगत्य प्रभुणा तत्र सङ्गतः ॥३
आगतेनैव भट्टेन वन्दितौ चरणौ प्रभोः ।
तं भागवतबोधेन समाश्लिष्यन्महाप्रभुः ॥४
प्रभुणासौ ससम्मानमन्तिकादुपवेशितः ।
आरेभे गदितुं भट्टो विनयानत-कन्धरः ॥५
वीक्षितुं त्वां चिरं यावन्मम जातो मनोरथः ।
अद्य त्वां पश्यतो मेऽसौ जगन्नाथेन पूरितः ॥६
लभते दर्शनं यस्ते सोऽयमेवात्र भाग्यवान् ।
मया त्वं दृश्यसे साक्षाद्भगवानिव सर्वथा ॥७
पवित्रो जायते नूनं त्वां स्मरन्नपि मानवः ।
दृष्ट्वा त्वां चरितार्थः स्यादिति कात्र विचित्रता ॥८

"तथाहि श्रीमद्भागवते प्रथमस्कन्ध ऊनविंशाध्याये त्रिंशः
श्लोकः—

येषां संस्मरणात् पुंसां सद्यः शुध्यन्ति वै गृहाः ।
किं पुनर्दर्शन-स्पर्श-पादशौचासनादिभिः ॥२॥"
कलिकालस्य धर्मः स्यात् कृष्णनाम्नो हि कीर्त्तनम् ।
कृष्णशक्तिं विना तस्य सम्भवेन्न प्रवर्त्तनम् ॥९
इदमेव प्रमाणं यत्त्वयैवैतत् प्रवर्त्तितम् ।
कृष्णशक्तिं दधासीति भवत्येवात्र नान्यथा ॥१०
कृष्णप्रेम जगत्यत्र त्वं प्रकाशितवानसि ।
अतस्त्वां यो निरीक्षेत कृष्णप्रेम्णा प्लवेत सः ॥११
कृष्णशक्तिं विना-प्रेमप्रकाशो नैव जायते ।
प्रेमदः कृष्ण एवैक इति शास्त्रप्रमाणतः ॥१२

"तथाहि लघुभागवतामृते पूर्वखण्डे द्वितीयाङ्कधृतः
विल्वमङ्गलकृतश्लोकः—

सन्त्ववतारा बहवः पङ्कजनाभस्य सर्वतोभद्राः ।
कृष्णादन्यः कोवा लतास्वपि प्रेमदो भवति ॥३॥"
महाप्रभुरवादीत्तं शृणु भट्ट महामते ।
मायावाद्यस्मि सन्न्यासी कृष्णभक्तिं न वेद्म्यहम् ॥१३
अद्वैताचार्य्यगोस्वामी स साक्षाद्भगवतीश्वरः ।
सङ्गलाभेन तस्यैव मनोऽभून्मम निर्मलम् ॥१४
म्लेच्छस्यापि भवेत् कृष्णभक्ति र्यस्यानुकम्पया ।
तस्य वैष्णवताशक्तिः शक्यते केन भाषितुम् ॥१५
नित्यानन्दोऽवधूतश्च भवति स्वयमीश्वरः ।
भावोन्मादेन मत्तोऽसौ कृष्णप्रेम-महाम्बुधिः ॥१६
भट्टाचार्य्यः सार्वभौमः षड् दर्शनविदां वरः ।
जगतां सर्वशास्त्रेषु गुरु र्भागवतोत्तमः ॥१७

मां भक्तियोगसीमानं स एव समदर्शयत् ।
तत्प्रसादेन जानामि कृष्णभक्तिं वरीयसीम् ॥१८
श्रीरामानन्दरायश्च कृष्णप्रेमरसाश्रयः ।
श्रीकृष्णो भगवान् साक्षादिति मां स व्यजिज्ञपत् ॥१९
प्रेमभक्तिं ततो वेद्मि पुरुषार्थशिरोमणिम् ।
रागमार्गगतां प्रेमभक्तिं सर्वातिशायिनीम् ॥२०
भावा दास्यञ्च सख्यञ्च वात्सल्यं माधुरीति ते ।
दासः सखा गुरुः कान्ता चेति येषां समाश्रयाः ॥२१
भावः केवल ऐश्वर्य्यज्ञानयुक् चेति हि द्विधा ।
ऐश्वर्य्यज्ञानयोगेन न लभ्यो नन्दनन्दनः ॥२२

"तथाहि श्रीमद्भागवते दशमस्कन्धे नवमाध्याये षोड़शः श्लोकः—

नायं सुखापो भगवान् देहिनां गोपिकासुतः ।
ज्ञानिनाञ्चात्मभूतानां यथा भक्तिमतामिह ॥४॥"

आत्मभूतेतिशब्देन वाच्या पार्षदसंहतिः ।
लक्ष्मीर्नन्दात्मजं नाप्नोदैश्वर्य्यज्ञानवत्तया ॥२३

"तथाहि तत्रैव सप्तचत्वारिंशाध्याये त्रिपञ्चाशत्तमः श्लोकः—

नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः
स्वर्योषितां नलिन-गन्धरुचां कुतोऽन्याः ।
रासोत्सवेऽस्य भुज-दण्ड-गृहीत-कण्ठ-
लब्धाशिषां य उदगाद्व्रज-सुन्दरीणाम् ॥५॥"

सखिभिः शुद्धभावेन तत्स्कन्धारोहणं कृतम् ।
केवलेनैव भावेन तं बबन्ध व्रजेश्वरी ॥२४
सखा मेऽयं सुतो मेऽयमित्येवं केवलं मनः ।
अतएव शुकव्यासौ तन्मनः प्रशशंसतुः ॥२५

"तथाहि तत्रैव द्वादशाध्याये दशमः श्लोकः—

इत्थं सतां ब्रह्मसुखानुभूत्या दास्यं गतानां परदैवतेन ।
मायाश्रितानां नरदारकेण सार्द्धं विजहुः कृत-पुण्य-पुञ्जाः ॥६॥

तथाहि तत्रैवाष्टमाध्याये षट्त्रिंशः श्लोकः—

नन्दः किमकरोद्ब्रह्मन् श्रेय एवं महोदयम् ।
यशोदा वा महाभागा पपौ यस्याः स्तनं हरिः ॥७॥"

ऐश्वर्य्यं वीक्षमाणोऽपि शुद्धचेता न बुध्यते ।
ऐश्वर्य्यज्ञानयोगात्तद्भावः श्रेयान् हि केवलः ॥२६

"तथाहि तत्रैव पञ्चत्रिंशः श्लोकः—

त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः ।
उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजम् ॥८॥"

श्रीरामानन्दरायो मां यद्यत् सर्वमशिक्षयत् ।
जायते परमानन्दस्तत् सर्वं शृण्वतां नृणाम् ॥२७

व्रजस्य शुद्धभावोऽयं ज्ञातो मे यत्प्रसादतः ।
रामानन्दस्य तस्यैवं प्रभावो वागगोचरः ॥२८

दामोदरस्वरूपोहि मूर्त्तः प्रेमरसः स्वयम् ।
यस्य सङ्गादहं वेद व्रजस्य मधुरं रसम् ॥२९

विशुद्धो व्रजदेवीनां प्रेमा कामविवर्जितः ।
कृष्णस्यैव सुखे तस्य तात्पर्य्यमिति लक्षणम् ॥३०

"तथाहि तत्रैव दशमस्कन्ध एकत्रिंशाध्याय ऊनविंशः श्लोकः—

यत्ते सुजात-चरणाम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ।
तेनाटवीमटसि तद् व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥९॥

गोपीनां केवलो भाव ऐश्वर्य्यज्ञानवर्जितः ।
ताः कृष्णं भर्त्सयामासुः प्रेम्णैवेत्यस्य लक्षणम् ॥३१

"तथाहि तत्रैव षोड़शः श्लोकः—

पतिसुतान्वय-भ्रातृवान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः ।
गतिविदस्तवोद्गीत-मोहिताः कितव योषितः कस्त्यजेन्निशि ॥१०॥

सर्वभक्तिजयी तासां प्रेमा सर्वोत्तमो भवेत् ।
तासां प्रेम्णाधमर्णोऽहमिति कृष्णोऽब्रवीदतः ॥३२

"तथाहि तत्रैव द्वात्रिंशाध्याय एकविंशः श्लोकः—

न पारयेऽहं निरवद्यसंयुजां
स्व-साधु-कृत्यं विबुधायुषापि वः ।
या माऽभजन् दुर्जय-गेह-श्रृङ्खलाः
संवृश्च्य तद्वः प्रतियातु साधुना ॥११॥"

ऐश्वर्य्यज्ञानयोगाद्धि केवलः परमोत्तमः ।
उद्धवेन समो नासीद् भक्तः कोऽपि धरातले ॥३३
तेनापि प्रार्थिता आसन् यासां श्रीपाद-रेणवः ।
एतत् सर्वं स्वरूपस्य सङ्गाच्छिक्षितवानहम् ॥३४
ठाकुरो हरिदासो हि महाभागवतोत्तमः ।
नामानि प्रत्यहं लक्षत्रयकृत्वो जपत्यसौ ॥३५
भगवन्नाममाहात्म्यं तस्मादेवास्मि शिक्षितः ।
विज्ञातो महिमा नाम्न स्तत्प्रसादान्मया पुनः ॥३६
आचार्य्यनिधि राचार्यरत्नो दामोदरस्तथा ।
शङ्करो जगदानन्द-वासुदेव-मुरारयः ॥३७
वक्रेश्वर मुकुन्दश्च पण्डितश्च गदाधरः ।
काशीश्वर स्तथान्येऽपि भक्ता गौड़ेऽवतीर्य ते ॥३८
अकुर्वन् भुवि कृष्णस्य नाम-प्रेमप्रचारणम् ।
एषां सङ्गेन सर्वेषां कृष्णभक्तिरियं मम ॥३९
ज्ञात्वा गाढ़महङ्कारं भट्टस्य हृदयस्थितम् ।
भङ्गयैवं कथयामास वचस्तावन्महाप्रभुः ॥४०

समग्रं भक्तिसिद्धान्तं जानेऽहं वैष्णवोऽस्मि च ।
श्रीमद्भागवतस्यार्थः साधु व्याख्यायते मया ॥४१
इत्ययं विपुलोगर्वो भट्टस्यासीद्धृदिस्थितः ।
सोऽपि खर्वोऽभवत्तस्य शृण्वतस्तद्वचः प्रभोः ॥४२
तेषां वैष्णवतां श्रुत्वा सर्वेषां श्रीमुखात् प्रभोः।
जाताकाङ्क्षोऽभवद्भट्ट स्तांश्च सर्वान्निरीक्षितुम् ॥४३
भट्टेनोक्तममी सर्वे निवसन्ति क्व वैष्णवाः ।
कथङ्कारमहं लप्स्ये सर्वेषामेव दर्शनम् ॥४४
प्रभुरूचे वसन्त्यत्र केचित् गङ्गातटेऽपरे ।
सर्वे त्वत्र समायाता रथयात्रां विलोकितुम् ॥४५
तिष्ठन्त्यत्रैव सर्वे ते वासास्तेषां पृथक् पृथक् ।
भवानत्रैव सर्वेषां दर्शनं परिलप्स्यते ॥४६
अथ प्रोवाच भट्टस्तं सबहुप्रशयं वचः ।
प्रभोरामन्त्रणं चक्रे ततो दैन्येन भूयसा ॥४७
अन्येद्यु वैंष्णवाः सर्वे प्रभोः स्थानमुपागताः ।
भट्टं सङ्गमयामास तैश्च सर्वैं र्महाप्रभुः ॥४८
तेजो दृष्ट्वाभवद् भट्टो वैष्णवानां सुविस्मितः ।
सर्वेषामग्रत स्तेषामसौ खद्योतसन्निभः ॥४९
ततो महाप्रसादान् स भट्ट आनाययन् बहून् ।
तत्रैव भोजयामास गणैः सार्द्धं महाप्रभुम् ॥५०
परमानन्दपुर्य्या च समं सन्न्यासिनां गणाः ।
भोजनस्य कृते दिश्यैकस्यां सर्व उपाविशन् ॥५१
आसीनौ पार्श्वयोर्नित्यानन्दाद्वैतावथान्तरा ।
प्रभुरास्त पुरः पश्चात्तस्य भक्ता उपाविशन् ॥५२
अशक्यगणना भक्ता यावन्तो गौड़वासिनः ।
ते पुनः पङ्क्तिशः सर्वे प्राङ्गणे समुपाविशन् ॥५३

अवलोक्य प्रभोर्भक्तान् भट्टो विस्मितमानसः ।
नेमुः प्रत्येकशः सर्वे सर्वेषां चरणेषु ते ॥५४
स्वरूपो जगदानन्दः काशीश्वरश्च शङ्करः ।
तत्र दामोदरः पर्य्यवेशयन् राघवस्तथा ॥५५
बहून् महाप्रसादांश्च भट्टो वल्लभ आनयन् ।
प्रभुं सन्न्यासिभिः सार्द्धं स स्वयं पर्य्यवेशयत् ॥५६
प्रसादानथ भुञ्जाना हरीत्यूचुश्च वैष्णवाः ।
सर्वं ब्रह्माण्डमापूर्य्य स हरिध्वनिरुत्थितः ॥५७
माल्य-चन्दन-ताम्बूल-गुवाकान्यानयं स्ततः ।
स सर्वान् पूजयामास भट्टः सानन्दचेतसा ॥५८
अथ कीर्त्तन मारेभे रथयात्रादिने प्रभुः ।
पूर्ववत् कृतवान् सप्त सम्प्रदायान् पृथक् पृथक् ॥५९
नित्यानन्द स्तथाद्वैतो हरिदासो गदाधरः ।
श्रीवासश्च तथा वक्रेश्वरो राघवपण्डितः ॥६०
कीर्त्तने क्रियमाने तैः सप्तभिः स्थानसप्तके ।
विचचार प्रभुस्तत्र हरिं ब्रूहीत्युदीरयन् ॥६१
उच्चैः सङ्कीर्त्तने नेदुर्मर्दलाश्च चतुर्दश ।
एकैकनर्त्तकप्रेम्णा बभूव प्लावितं जगत् ॥६२
दृष्ट्वैवं वल्लभो भट्टो विस्मयाकुलमानसः ।
आनन्द-विह्वलो जातो विस्मृतात्मा बभूव च ॥६३
ततो विरमयन् सर्वान्नर्त्तनात्तान्महाप्रभुः ।
पूर्ववत् स्वयमेकाकी नृत्यं कर्त्तुं प्रचक्रमे ॥६४
प्रभोरालोक्य सौन्दर्य्यं महाप्रेमोदयं तथा ।
साक्षात् कृष्णोऽयमेवेति तं भट्टो निरधारयत् ॥६५
इत्थं स रथयात्रायां सर्वं तत्तद् विलोकयन् ।
प्रभोश्चरित मालोच्य भट्टः प्राप चमत्कृतिम् ॥६६

रथयात्रावसानेऽथ भट्टः प्रभुमुपेयिवान् ।
एवं निवेदयामास किञ्चित्तच्चरणाम्बुजे ॥६७
श्रीमद्भागवतस्याहं टीकां काञ्चिदलेखिषम् ।
सा महाप्रभुणा तत्रभवता कर्ण्यतामिति ॥६८
प्रभुणोक्तं मया भागवतस्यार्थो न बुध्यते ।
श्रोतुं भागवतस्यार्थमधिकारोऽपि नास्ति मे ॥६९
उपविश्य मया कृष्णनामैव गृह्यते सदा ।
न संख्या पूर्य्यते नाम्नोऽहोरात्रं गृह्णतोऽपि मे ॥७०
भट्टेनोक्तमहं कृष्णनामार्थस्य सविस्तरम् ।
व्याख्यानं कृतवानस्मि तत्त्वया श्रूयतामिति ॥७१
प्रभुणोक्तं न मन्येऽर्थान् कृष्णनाम्नो बहूनहम् ।
यशोदानन्दनः श्यामसुन्दर इति वेद्म्यहम् ॥७२

"तथाहि श्रीकृष्णसन्दर्भेऽनर्थोपशम इत्यस्य व्याख्यायां धृतो नामकौमुद्यां श्लोकः—

तमालश्यामलत्विषि श्रीयशोदास्तनन्धये ।
कृष्णनाम्नोरूढ़िरिति सर्वशास्त्र-विनिर्णयः ॥१२॥"

विजानन्निममेवार्थं तथा निश्चितवानहम् ।
अन्येष्वर्थेषु सर्वेषु नाधिकारोऽस्ति मे पुनः ॥७३
भट्टस्य निखिला व्याख्या फल्गुप्रायेति जानता ।
सर्वज्ञेन तदा तत्र प्रभुणासावुपेक्षितः ॥७४
ततोऽसौ दुर्मना भट्टः प्रतियातो निजालयम् ।
तदा तस्य प्रभौ पूर्वभक्तिरीषदहीयत ॥७५
सोऽथ गोस्वामिनं तत्र पण्डितं निकषा गतः ।
प्रायशो विविधां प्रीतिं कुर्वंस्तस्मिन्नवर्त्तत ॥७६
प्रभोरुपेक्षया सर्वे जना नीलाचलस्थिताः ।
भट्टेन रचितां व्याख्यां न स्वल्पामपि शुश्रुवुः ॥७७

भट्टस्तेनापमानेन लज्जासङ्कुचितान्तरः ।
आक्रान्तश्चातिदुःखेन पण्डितं तमुपेयिवान् ॥७८
तमुवाच स दैन्येन शरणं त्वां व्रजाम्यहम् ।
अनुकम्पस्व दीनं मां रक्ष त्वं जीवनं मम ॥७९
आकर्णयसि चेत् कृष्णनामव्याख्याञ्च मत्कृताम् ।
तदा प्रक्षाल्यते लज्जापङ्को मे हृदयादिति ॥८०
ततः संशयमारूढः पण्डितः सङ्कटे पतन् ।
किं करोमीति निश्चेतुं न क्षमोऽस्मीत्यवोचत ॥८१
पण्डिते प्रार्थनां तस्मै न प्रतिश्रुतवत्यपि ।
भट्टस्तं सबलात्कारमभ्युपेत्यापतन्मुहुः ॥८२
आभिजात्यान्निषेद्धुं तमक्षमः पण्डितोऽवदत् ।
कृष्ण त्वां शरणं यामि रक्ष मां सङ्कटादितः ॥८३
अन्तर्यामी प्रभुर्वेत्ति मम सर्वं मनोगतम् ।
ततो मे न भयं किञ्चिद् विषमास्तद्गणास्त्विति ॥८४
न दोषो लेशतोऽप्यासीत् पण्डितस्यात्र यद्यपि ।
तथापि चुकुपुस्तस्मै भट्टार्थं ते प्रभोर्गणाः ॥८५
प्रत्यहं वल्लभो भट्टः प्रभोर्वासगृहं गतः ।
चकारोद्ग्राहवत्तर्कमाचार्य्यप्रमुखैः समम् ॥८६
भट्टेन स्थापितं तत्र सिद्धान्तं यञ्च कञ्चन ।
शृण्वन्नेव तमाचार्य्यः खण्डयामास तत्क्षणात् ॥८७
आचार्य्यप्रमुखानां स पुरोऽगच्छद् यदा यदा ।
तदासौ राजहंसानां मध्ये वक इव स्थितः ॥८८
अथैकस्मिन्दिने भट्ट आचार्य्यं परिपृष्टवान् ।
जीवो हि प्रकृतिः कृष्णं पतिरित्येव मन्यते ॥८९
पत्युर्नाम न गृह्णीयात् कचित् कापि पतिव्रता ।
गृहीतकृष्णनाम्नां वो धर्मः क इव जायते ॥९०

आचार्यस्तमुवाचैष मूर्त्तोधर्मोऽस्ति ते पुरः ।
एनं पृच्छ प्रमाणञ्च तस्यायं ते वदिष्यति ॥६१
तमुवाच प्रभुर्धर्ममर्म न ज्ञायते त्वया ।
धर्मः पतिव्रतानां हि पत्युरादेशपालनम् ॥६२
पत्युराज्ञा च तन्नामग्रहणायैव सन्ततम् ।
लङ्घितुं नैव शक्नोति पत्युराज्ञां पतिव्रता ॥६३
अतोऽसौ नाम गृह्णाति नाम्नश्च लभते फलम् ।
नाम्न एव फलात् कृष्णपदे प्रेमोपजायते ॥६४
इत्याकर्ण्याभवद्भट्टो वल्लभो वाग्-विवर्जितः ।
गृहं गत्वा स दुःखेन चेतसाचिन्तयत्तदा ॥६५
प्रत्यहं परिषद्यस्यां जायते मे पराजयः ।
वर्त्ततोपरि सर्वेषां कदाचिद् यदि मे वचः ॥६६
सुखं मे तर्हि जायेत लज्जा लुम्पेच्च सर्वथा ।
स्थापनार्थं स्ववाक्यस्य कमुपायं करोम्यहम् ॥६७
अथान्येद्युः समायातो निषन्नश्च प्रभुं नमन् ।
सभायामब्रवीत् किञ्चिन्मनसा गर्वमावहन् ॥६८
श्रीमद्भागवते व्याख्या स्वामिनः खण्डिता मया ।
व्याख्यानवचनं तस्य ग्रहीतुं न च शक्यते ॥६९
मन्येऽधीतं यथा यत्र तेन व्याख्या तथा कृता ।
नास्त्येकवाक्यता तस्मान्न स्वामी मन्यते मया ॥१००
हसता प्रभुणोक्तोऽसौ येन स्वामी न मन्यते ।
तं हि वाराङ्गनामध्ये निश्चितं गणयाम्यहम् ॥१०१
इत्युक्त्वा जोषमासीने तदानीं श्रीमहाप्रभौ ।
सर्वे श्रुत्वा प्रभोरुक्तिं तुतुषु र्मनसा परम् ॥१०२
जगद्धिताय गोराङ्गोऽवतीर्णोऽस्मिन्धरातले ।
अभिमानं ततस्तस्य ज्ञातवानन्तरस्थितम् ॥१०३

वहुधावज्ञया भट्टं भगवान् समशोधयत् ।
अभिमानं यथेन्द्रस्य कृष्णः खण्डितवान् पुरा ॥१०४
निजं श्रेयोऽपि मन्यन्ते जीवा अज्ञा निजाहितम् ।
अहङ्कारे विचूर्णेऽपि मुञ्चन्त्यश्रूण्यनन्तरम् ॥१०५
अथ रात्रौ गृहं यातो भट्ट एवमचिन्तयत् ।
प्रयागे प्रभुणा पूर्वं मयि कृत्वा महाकृपाम् ॥१०६
निजभक्तगणैः सार्द्धं स्वीकृतं मे निमन्त्रणम् ।
कथं नु साम्प्रतं मत्तः प्रत्यावृत्तं प्रभोर्मनः ॥१०७
अहं जीयासमित्येवं गर्वो मे प्रविलीयताम् ।
ईश्वरो हि स्वभावेन सर्वेभ्यो हितमाचरेत् ॥१०८
प्रख्यापयितुमात्मानमभिमानं करोम्यहम् ।
मम तद्गर्वनाशार्थं प्रभुर्मामवमन्यते ॥१०६
कुरुते स हितं मह्यं मन्ये दुःखमहं पुनः ।
इन्द्रो मूर्खो यथैवासीत् कृष्णस्योपरि दुर्मनाः ॥११०
इत्येवं चिन्तयित्वासौ प्रातरेत्य प्रभोः पदम् ।
बहु स्तुत्वा च दैन्येन प्रपेदे शरणं प्रभुम् ॥१११
अज्ञो जीवोऽस्मि कर्मापि कृतमज्ञोचितं मया ।
यतो मूर्खेण पाण्डित्यं पुरतस्ते प्रकाशितम् ॥११२
ईश्वरस्त्वं मयि स्वीयां करुणां कृतवानसि ।
खण्डयन्नखिलं गर्वमवमानेन मां प्रति ॥११३
अहमज्ञोऽस्मि तन्मन्ये हितमप्यवमानानाम् ।
निनिन्दाज्ञानसम्मूढः कृष्णमिन्द्रो यथा पुरा ॥११४
नाशितं मम गर्वान्ध्यमनुकम्पाञ्जनेन ते ।
सञ्जातमधुना ज्ञानमियत्या कृपया तव ॥११५
इत्थं कृतापराधं मां क्षमस्व शरणागतम् ।
कृपया मूर्द्धनि त्वं मे निधेहि चरणाविति ॥११६

प्रभुणोक्तं महाभागवतस्त्वं पण्डितोऽसि च ।
तत्र गर्वगिरिर्नास्ति यत्रास्ते तद्गुणद्वयम् ॥११७
निन्द्यते श्रीधरस्वामी स्वटीकां कुर्वता त्वया ।
एतावानुह्यते गर्वस्त्वया सोऽपि न मन्यते ॥११८
प्रसादात् स्वामिनस्तस्य ज्ञातं भागवतं मया ।
जगद्गुरुरसौ स्वामी श्रीधरो मे गुरुर्मतः ॥११९
यत् किञ्चिल्लिख्यते गर्वाच्छ्रीधरस्योपरि त्वया ।
लेखोऽसौ विपरीतार्थो जनै र्जातु न मंस्यते ॥१२०
श्रीधरस्यानुगत्येन येन किञ्चन लिख्यते ।
मन्यमानास्तमेवार्थं सर्वे गृह्णन्ति मानवाः ॥१२१
कुरु भागवतव्याख्यां श्रीधरानुगतां पुनः ।
अभिमानं त्यजन् कृष्णं भगवन्तं सदा भज ॥१२२
अपराधं परित्यज्य कृष्णसङ्कीर्त्तनं कुरु ।
अचिरादेव कृष्णस्य चरणौ लप्स्यसे ततः ॥१२३
भट्टः प्रोचे प्रसन्नोऽसि मयि चेत्त्वं महाप्रभो ।
गृहाण पुनरेकस्मिन्दिने मम निमन्त्रणम् ॥१२४
अवतीर्णो बभूवासौ जगत्तारयितुं प्रभुः ।
अतः स्वीकृतवांस्तस्य सुखार्थं तन्निमन्त्रणम् ॥१२५
जगतामस्तु कल्याणमित्येवासीत् प्रभोर्मनः ।
अतो दण्डं विधायापि तस्य चित्तमशोधयत् ॥१२६
ततो निमन्त्रयामास भट्टोऽसौ सगणं प्रभुम् ।
प्रसन्नमभवच्चित्तं तस्मिन्नथ महाप्रभोः ॥१२७
प्रभौ शुद्ध-घन-प्रेमा जगदानन्दपण्डितः ।
अभवत् सत्यभामेव स्वभावाद्वाम्यमाचरन् ॥१२८
चकार प्रभुणा प्रेमकलहं स पुनः पुनः ।
तयोः प्रववृतेऽन्योन्यं कार्कश्यमुभयोरपि ॥१२९

अथ गाढ़ामलप्रेमा श्रीगदाधरपण्डितः ।
रुक्मिण्या इव दाक्षिण्यमासीत्तस्य स्वभावतः ॥१३०
तस्य प्रणयकोपन्तु द्रष्टुमिच्छत्यपि प्रभौ ।
न कोपस्तस्य सञ्जात ऐश्वर्य्यज्ञानवत्तया ॥१३१
प्रभुणैवं तमालक्ष्य रोषाभासे कृतेऽप्यसौ ।
पण्डितः सर्वमाकर्ण्य बभूव त्रस्त-मानसः ॥१३२
पुरा कृष्णे परीहासवचो ब्रुवति रुक्मिणी ।
तदाकर्ण्य यथा जाता भीति-विह्वल-मानसा ॥१३३
उपासां वल्लभो भट्टश्चक्रे वात्सल्यभावतः ।
बालगोपालमन्त्रेण पुरा कृष्णमसेवत ॥१३४
पण्डितस्य तु सङ्गेन प्रत्यावृत्तमनाः पुनः ।
मनः किशोरगोपालं कृतवान् स उपासितुम् ॥१३५
पण्डिताच्छिक्षितुं मन्त्रादिकं याचितवानपि ।
उक्तोऽसौ पण्डितेनैवं कर्म्मैतन्मे न सम्भवेत् ॥१३६
यतोऽहं परतन्त्रोऽस्मि गौरचन्द्रः प्रभुर्मम ।
तस्याज्ञामन्तरेणाहं न स्वतन्त्रोऽस्मि कर्हिचित् ॥१३७
प्रत्यहं सन्निधानं मे यतस्त्वमुपतिष्ठसि ।
तेनैव प्रभुणा मह्यमुपालम्भः प्रदीयते ॥१३८
एवं वल्लभभट्टेन कियत्कालेऽतिवाहिते ।
परिशेषेऽभवत्तस्मिन् सुप्रसन्नतरः प्रभुः ॥१३९
निमन्त्रणदिने तस्याह्वयितुं पण्डितं प्रभुः ।
स्वरूप-जगदानन्द-गोविन्दान् प्रजिघाय च ॥१४०
पथि प्रोक्तः स्वरूपेण पण्डितोऽसौ गदाधरः ।
प्रभुणा ते परीक्षार्थं यदोपेक्षा प्रदर्शिता ॥१४१
तदागत्य त्वया कस्मान्नोपालब्धो महाप्रभुः ।
भीतभीतः कथं त्वं वा तत् सर्वं सोढ़वानिति ॥१४२

पण्डितोऽकथयत्तस्मै प्रभुः सर्वज्ञसत्तमः ।
तेन सार्द्धं हठाचारो न साधुर्मन्यते मया ॥१४३

तदुक्तिं सहमानेन स्वमूद्‌र्ध्ना गृह्यते मया ।
स्वयं विचार्य्य दोषादि करुणां स करिष्यति ॥१४४

इत्युक्त्वा पण्डितस्तत्र समुपेत्य महाप्रभुम् ।
न्यपतत् पादयोस्तस्य रोदनाकुललोचनः ॥१४५

स्मयमानमुखाम्भोजः प्रभुस्तं परिरब्धवान् ।
तत्रत्यान् श्रावयन् सर्वान् मधुरञ्चावदद्वचः ॥१४६

मया ते दर्शितावज्ञा त्वया मे नतु दर्शिता ।
क्रुधा किञ्चिदनुक्त्वैव त्वं सर्वं तद्विसोढ़वान् ॥१४७

मम भङ्ग्यनुसारेण चलितं न मनस्तव ।
द्रढ़ीयः-सरल-प्रेम्णा माञ्च त्वं क्रीतवानिति ॥१४८

भाषितुं भाववैचित्र्यं पण्डितस्य न शक्यते ।
यतो गदाधरप्राणनाथ इत्युच्यते प्रभुः ॥१४९

प्रसादोऽपि प्रभोर्वक्तुं न शक्यः पण्डितोपरि ।
गदाधरस्य गौराङ्ग इति लोकैः प्रगीयते ॥१५०

चैतन्यस्य प्रभोर्लीलाः को बोद्धुं क्षमते भुवि ।
वहन्त्येकत्र लीलायां गङ्गाधाराः शतं शतम् ॥१५१

पण्डितस्यैव सौजन्यं तथा ब्रह्मण्यतागुणः ।
सुदृढ़ं प्रेमवैचित्र्यं लोके प्रख्यापितं जनैः ॥१५२

अशोधयत् प्रभुर्भट्टं मृष्ट्वा तत्गर्वकर्दमम् ।
शिक्षयामास तद्द्वारा सर्वानन्यान् जनानपि ॥१५३

वहत्यन्तः कृपां वाह्योपेक्षावद्दर्शयन् प्रभुः ।
वाह्यार्थं यो हि गृह्णाति स विनश्यत्यसंशयम् ॥१५४

चैतन्यस्य निगूढ़ास्ता लीला बोद्धुं क्षमेत कः ।
गौरचन्द्रे दृढ़ाभक्तिर्यस्यासावेव बुध्यते ॥१५५

पण्डितेन दिनेऽप्यस्मिन् प्रभोरामन्त्रणे कृते ।
गृहीत्वासौ निजान् भक्तां स्तत्र भिक्षां गृहीतवान् ॥१५६
तत्रैव वल्लभो भट्ट आज्ञां लब्ध्वा महाप्रभोः ।
पण्डितादिष्टपूर्वं तत् प्राप्य सिद्धार्थतां गतः ॥१५७
एतद् वल्लभभट्टस्य मिलनं कथितं मया ।
गौर-प्रेम-धनं यस्य श्रवणादेव लभ्यते ॥१५८
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१५९

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे वल्लभभट्ट-मिलनं नाम सप्तमः परिच्छेदः ।

—०—

अन्त्यलीलायामष्टमः परिच्छेदः

"तं वन्दे कृष्ण-चैतन्यं रामचन्द्र-पुरीभयात् ।
लौकिकाहारतः स्वं यो भिक्षान्नं समकोचयत् ॥१॥"
जयतु श्रीलचैतन्यः करुणा-सरिताम्पतिः ।
भजन्ते चरणौ यस्य देवा ब्रह्मशिवादयः ॥१
जयतादवधूतेन्दु र्नित्यानन्दो मुहुर्मुहुः ।
प्रेमपाशेन योऽबध्नाज्जगदेतच्चराचरम् ॥२
ईश्वरस्यावतारोऽसावद्वैतो जयतान्मुहुः ।
अवतारयता कृष्णं येन निस्तारितं जगत् ॥३
श्रीवासप्रमुखा भक्ताः सर्व एव जयन्तु ते ।
प्रभुः श्रीकृष्णचैतन्यो येषां प्राणधनं खलु ॥४
एवं श्रीगौरचन्द्रेण निजभक्तजनैः सह ।
श्रीकृष्णप्रेमरङ्गेण क्रीड़ा नीलाचले कृता ॥५

रामचन्द्रपुरीस्वामी तदैवागत एकदा ।
प्रभुणा परमानन्दपुर्य्या च समगच्छत ॥६
पुरीश्रीपरमानन्दस्तस्य पादाववन्दत ।
तमप्याश्लिष्टवान् रामचन्द्रस्वामी ततो दृढ़म् ॥७
ततो महाप्रभौ तस्मै नमस्कुर्वति तत्क्षणात् ।
तं समालिङ्ग्य तेनापि पुनः कृष्णस्मृतिः कृता ॥८
इष्टगोष्ठीं ततश्चक्रुस्त्रयस्ते च कियच्चिरम् ।
पण्डितो जगदानन्दोऽभिक्षार्थं तं न्यमन्त्रयत् ॥९
भिक्षार्थं स जगन्नाथप्रसादानानिनाय च ।
निन्दिष्यंस्तं पुरीस्वामी भिक्षां पर्य्याप्तमग्रहीत् ॥१०
अथासौ भुक्तभिक्षान्नो जगदानन्दमब्रवीत् ।
अवशिष्टं प्रसादान्नं त्वया सम्प्रति भुज्यताम् ॥११
इत्युक्त्वाभोजयत्तं स आग्रहेणोपवेशयन् ।
स्वयं सादरसत्कारं कृतवान् परिवेषणम् ॥१२
भूयोभूयोऽनुरोधेन भोजयामास तं तदा ।
विहिताचमने तस्मिन्नारेभे निन्दितुं स तम् ॥१३
चैतन्यस्य गणाः सर्वे भुञ्जते बह्विति श्रुतम् ।
सत्यमेव हि तद्वाक्यं साक्षाद्दृष्टं मयाधुना ॥१४
सन्न्यासिनां करोष्येवं भोजयन् महतीं क्षतिम् ।
इयन्त्यश्नासि वैरागिन् वैराग्यान्नास्तिते भयम् ॥१५
एष तावत् स्वभावो हि तस्यासीत् स जनान् बहु ।
भोजयित्वा सनिर्बन्धं पश्चादेवं निनिन्द च ॥१६
माधवेन्द्रपुरीस्वामी यदान्तर्धातुमुद्यतः ।
तदा तं निकषागच्छद्रामचन्द्र-पुरी पुरा ॥१७
कीर्त्तयन् कृष्णनामासौ माधवेन्द्रपुरी-प्रभुः ।
मथुरा न मया प्राप्तेत्युक्त्वारोदीन्निरन्तरम् ॥१८

उपदेशं ददौ तस्मै रामचन्द्रपुरी तदा।
स्वयं शिष्योऽपि निशङ्को गुरुमेवमवोचत ॥१६
पूर्णानन्दपरब्रह्म त्वमेवासीति चिन्त्यताम्।
त्वया चिद्ब्रह्मणाप्येवं रोदनं क्रियते कथम् ॥२०
इत्याकर्ण्य रुषाविष्टो माधवेन्द्रोऽभवत्ततः।
पापिन् दूरमपेहीति ब्रुवन् भर्त्सितवानमुम् ॥२१
कृष्णं न प्राप्तवानस्मि नैवाप्तो मथुरामपि।
म्रियेऽहं निजदुःखेन त्वं पुनर्दग्धुमागतः ॥२२
यत्र तत्रापि गच्छ त्वं न मां दर्शय ते मुखम्।
पश्यतस्त्वां मृतस्यापि दुर्गतिर्मे भविष्यति ॥२३
नैव कृष्णमवाप्तोऽस्मीत्यात्मदुःखादहं म्रिये।
मां ब्रह्मोपदिशत्येष मूर्खस्तुच्छतमः पुनः ॥२४
इत्येवं माधवेन्द्रेण यतोऽभूत् स उपेक्षितः।
ततस्तेनापराधेन तस्याजायत वासना ॥२५
ब्रह्मज्ञानेन शुष्केण कृष्णसम्बन्धवर्जितः।
सर्वेषां निन्दको निन्दानिर्बन्धैकपरोऽभवत् ॥२६
तदेश्वरपुरी श्रीमन्माधवेन्द्रमसेवत।
कुर्वंस्तस्य स्वहस्तेन मलमूत्रादिमार्जनम् ॥२७
तमनुस्मारयामास कृष्णनाम निरन्तरम्।
लीलाश्लोकांश्च कृष्णस्य श्रावयंस्तमनुक्षणम् ॥२८
तमाश्लिष्यन् पुरीस्वामी परितुष्टमनास्ततः।
कृष्णे प्रेमधनं तेऽस्तादिति तस्मै वरं ददौ ॥२६
जातस्तदा प्रभृत्येव प्रेमसिन्धुः पुरीश्वरः।
रामचन्द्रपुरीस्वामी सर्वनिन्दाखनिस्त्वभूत् ॥३०
निग्रहेऽनुग्रहे च द्वौ महतामिह साक्षिणौ।
द्वारीकुर्वन्निमौ सर्वान् सोऽशिक्षयज्जगज्जनान् ॥३१

दत्त्वा प्रेमधनं तस्मै माधवेन्द्रो जगद्गुरुः ।
श्लोकमेवं पठन्नेव तत्क्षणाच्च तिरोदधे ॥३२

"तथाहि पद्यावल्यां चतुःशततमाङ्कधृतमाधवेन्द्रपुरीवाक्यम्—
अयि दीनदयार्द्रनाथ हे मथुरानाथ कदावलोक्यसे ।
हृदयं त्वदलोककातरं दयित भ्राम्यति किं करोम्यहम् ॥२॥"

इति श्लोकेन गोस्वामी कृष्णप्रेमोपदिष्टवान् ।
भक्तभाव-विशेषोऽयं कृष्णविच्छेदहेतुकः ॥३३
पृथिव्यां रोपयामास यं प्रेमाङ्कुरमेव सः ।
ततः प्रेमाङ्कुराज्जातः कृष्णचैतन्यपादपः ॥३४
पुरीगोस्वामिनोऽत्रोक्तं निर्याणं हि प्रसङ्गतः ।
आकर्णयति य एतत् सोऽयं भवति भाग्यवान् ॥३५
रामचन्द्रपुरी तस्थावेवं नीलाचले तदा ।
स्वभावेन विरक्तोऽसौ कदाचित् क्वाप्यवर्त्तत ॥३६
विना निमन्त्रणं भिक्षां कुर्वन्नकृतनिश्चयाम् ।
भिक्षावस्थितिवृत्तान्तमन्येषामन्वियेष सः ॥३७
प्रभोरामन्त्रणेऽपेक्षया कपर्दक-चतुष्पणी ।
काशीश्वरश्च गोविन्दः प्रभुश्चाभुञ्जत त्रयः ॥३८
इतस्ततश्च भिक्षाभूत् प्रायः प्रतिदिनं प्रभोः ।
यदि कोऽप्यानयन्मूल्यं निर्णीतासीच्चतुष्पणी ॥३९
तस्यापि स्थितिमाचारं भिक्षाञ्च शयनं गतिम् ।
रामचन्द्रपुरीस्वामी तत् सर्वं व्यचिनोत् सदा ॥४०
अशक्नुवन्नसौ स्प्रष्टुं गुणां स्तां स्तान्महाप्रभोः ।
नैव लेभे क्वचिच्छिद्रं तस्यान्विष्य भ्रमन्नपि ॥४१
अहो भूत्वापि सन्न्यासी मिष्टान्नं भक्षयत्यसौ ।
भोगेनानेन तस्य स्यादिन्द्रियोपरमः कथम् ॥४२

इत्येवं स प्रभुं निन्दन् सर्वत्र जनसंसदि ।
आजगाम प्रभुं द्रष्टुमवश्यं प्रत्यहं पुनः ॥४३

प्रभुस्तं मानयामास गुरुबुद्ध्या ससम्भ्रमम् ।
स त्वनिष्याभ्रमच्छिद्रमिति कर्मैव तस्य तत् ॥४४

तत्कृतां तावतीं निन्दां प्रभुः सर्वां विदन्नपि ।
महता सम्भ्रमेणैव चकारास्य समादरम् ॥४५

एकदा प्रातरागत्य निवासं श्रीमहाप्रभोः ।
पश्यन् पिपीलिकास्तत्र किञ्चिदेवं वचोऽब्रवीत् ॥४६

"तथाहि रामचन्द्रपुरी-वाक्यम्—

"रात्रावत्रैक्षवमासीत्तेन पिपीलिकाः सञ्चरन्ति । अहो विरक्तानां सन्न्यासिनामियमिन्द्रियलालसे"ति ब्रुवन्नुत्थाय गतः ॥३॥"

श्रुतवांस्तत्कृतां निन्दां पुरा लोकमुखात् प्रभुः ।
अशृणोत् साम्प्रतं साक्षात् कल्पितं तेन निन्दनम् ॥४७

पिपीलिकाः स्वभावेन सञ्चरन्ते समन्ततः ।
तथाप्युत्थाप्य तर्कं स दोषमारोपयत् प्रभुम् ॥४८

शृन्वन्नेव प्रभुस्तत्र सङ्कोच-त्रस्त-मानसः ।
तदा गोविन्दमाहूय किञ्चिदेवं तमादिशत् ॥४९

अद्य प्रभृति भिक्षाया नियमोऽयं स्थितो मम ।
पिण्डभोगस्य तुर्य्योऽंशो व्यञ्जनं पञ्चगण्डकम् ॥५०

द्वयमेतद्विना नान्यदतिरिक्तं त्वमानय ।
अधिके तु समानीते नात्र द्रक्ष्यसि मामिति ॥५१

गोविन्देन तथैवोक्ता निखिलास्तत्र वैष्णवाः ।
जाताः शृण्वन्त एवामी शीर्षे वज्राहता इव ॥५२

ततस्ते भर्त्सयामासू रामचन्द्रपुरीं प्रति ।
सर्वेषां हृतवान् प्राणान् पापिष्ठोऽयमिहागतः ॥५३

तस्मिन्नेव दिने विप्रः कोऽप्यामन्त्रयत प्रभुम् ।
अन्नं तावच्चतुर्थांशं व्यञ्जनं पञ्चगण्डकम् ॥५४
अङ्गीकुर्वति गोविन्दे तावन्मात्रञ्च सर्वथा ।
क्रोशन् हाहेति विप्रोऽसावाजघ्ने मस्तकं निजम् ॥५५
अन्नव्यञ्जनयोरर्द्धं तयोर्भक्षितवान् प्रभुः ।
किञ्चिद्भुक्तावशिष्टं यद् गोविन्द स्तदवाप च ॥५६
प्रभुरर्द्धाशनं चक्रे गोविन्दोऽप्यर्द्धमाश च ।
ततो भक्तजनाः सर्वे प्रायो भोजनमत्यजन् ॥५७
काशीश्वरञ्च गोविन्दं प्रभुराज्ञापयत्तदा ।
युवामन्यत्र याचित्वा कुरुतं क्षुन्निवारणम् ॥५८
एवमेवातिकृच्छ्रेण कतिचिद्दिवसा गताः ।
रामचन्द्रपुरीस्वामी श्रुत्वा तत् प्रभुमागमत् ॥५६
तं नत्वा तत् पदद्वन्द्वं वन्दमाने महाप्रभौ ।
स एवं कथयामास स्मयमानो वचः प्रभुम् ॥६०
नहि सन्न्यासिनां धर्मो भवेदिन्द्रियतर्पणम् ।
स्वोदरं पूरयेयुस्ते येन केनापि केवलम् ॥६१
त्वं कृशोदृश्यसे मन्ये क्रियतेऽर्द्धाशनं त्वया ।
एतद्धिशुष्कवैराग्यं धर्मः सन्न्यासिनां नहि ॥६२
यथार्हमुदरं पूर्त्वा विषयान् भुञ्जते न चेत् ।
तदा सन्न्यासिनो ज्ञानयोगे सिद्धिं व्रजन्ति ते ॥६३

"तथाहि श्रीमद्भगवद्गीतायां षष्ठाध्याये षोड़श-सप्तदशौ श्लोकौ :—

नात्यश्नतस्तु योगोऽस्ति नचैकान्तमनश्नतः ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ॥४॥
युक्ताहार-विहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥५॥"

उवाच प्रभुरज्ञोऽहं तव शिष्योऽस्मि बालकः।
यत्त्वं ददासि मे शिक्षामिदं सौभाग्यमेव मे ॥६४
इत्याकर्ण्य पुरीस्वामी ततः प्रस्थातुमुद्यतः।
कुर्वतोऽर्द्धाशनं भक्तान् श्रुतवान्निखिलानपि ॥६५
श्रीपुरीपरमानन्दोऽन्येद्यु भक्तगणान्वितः।
प्रभुं निवेदयामास दैन्येन प्रश्रयेण च ॥६६
रामचन्द्रपुरीस्वामी स्वभावेनैव निन्दकः।
तदुक्त्यान्ने परित्यक्ते कोनु लाभो भविष्यति ॥६७
अयं पुर्य्याः स्वभावस्तं भोजयित्वा यथेप्सितम्।
यदा भुङ्क्ते जनस्तञ्च सयत्नं भोजयत्यसौ ॥६८
भोजयित्वा सनिर्बन्धमसौ निन्दति तं पुनः।
एतावद्भक्षयस्यन्नं वर्त्तते ते कियद्धनम् ॥६९
धर्मं सन्न्यासिनां हंसि तानेतावच्च भोजयन्।
अतएव मया ज्ञातं नास्ति किञ्चिद्भयं तव ॥७०
कथमाचर्य्यते केन केन वा भुज्यते कथम्।
इत्येवान्वेषणं कुर्वन् पर्यटत्येष सर्वदा ॥७१
यत्तु कर्मद्वयं शास्त्रैः सर्वथैव निषिध्यते।
कर्मद्वयं तदेवासौ विदधाति निरन्तरम् ॥७२

"तथाहि श्रीमद्भागवत एकादशस्कन्धेऽष्टाविंशाध्याये प्रथमः श्लोकः—

परस्वभावकर्माणि न प्रशंसेन्न गर्हयेत्।
विश्वमेकात्मकं पश्यन् प्रकृत्या पुरुषेण च ॥१॥"

तयोर्मध्ये जहत् पूर्वविधिमेष प्रशंसनम्।
निन्दां परविधिं ज्ञात्वा विधत्ते बलवत्तरम् ॥७३

"तथाहि पाणिनि-सूत्रम्—

पूर्वापरयोर्मध्ये परविधिर्बलवान् ॥७॥"

शतं यत्र गुणाः सन्ति नादत्ते स मनागपि ।
गुणेषु च्छद्मना तस्य दोषानारोपयत्यसौ ॥७४
एतस्यैव स्वभावोऽयं युज्यते नैव भाषितुम् ।
तथापि कथयामीषद्दुःखं सम्प्राप्य मर्मणि ॥७५
कथमन्नं जहासि त्वमस्य वाक्यानुसारतः ।
पुरेवादत्स्व सर्वेषां वचो गृह्णन्निमन्त्रणम् ॥७६
प्रभुरूचे कथं सर्वैः कुप्यते स्वामिनं प्रति ।
स ब्रूते सहजं धर्मं को दोषस्तस्य विद्यते ॥७७
जिह्वालाम्पट्यमन्याय्यं भवेत् सन्न्यासिनां सताम् ।
भुञ्जते केवलं प्राणान् रक्षितुं यतिधर्म्मिणः ॥७८
ततः सम्मिलितैः सर्वैः प्रयत्ने विपुले कृते ।
सर्वेषामाग्रहादर्द्धं पूर्वस्य प्रभुरग्रहीत् ॥७९
प्रभोरामन्त्रणेऽपेक्ष्या कपर्दानां पणद्वयी ।
द्वौ जनौ जातु भोक्तारौ त्रयोवासन् कदादन ॥८०
अभोज्यान्नेन विप्रेण प्रभुरामन्त्रितो यदि ।
देयं प्रसादमूल्यञ्चासीत् कपर्दपणद्वयम् ॥८१
भोज्यान्नो ब्राह्मणः कोऽपि यद्यामन्त्रयत प्रभुम् ।
स्तोकं प्रसादमानीय गृहे किञ्चित् पपाच सः ॥८२
आचार्यो भगवान् सार्वभौमो गोस्वामिपण्डितः ।
यद्यामन्त्रितवन्तस्ते निमन्त्रणदिने प्रभुम् ॥८३
तेषामेवेच्छया सम्यक् तदा भक्षितवानसौ ।
अस्वातन्त्र्यात् प्रभुस्तत्र चक्रे तेषामभीप्सितम् ॥८४
भक्तेभ्यः सुखदानार्थमवतारः प्रभोरयम् ।
यथा-योगमभूद् यत्र तथा तत्र स आचरत् ॥८५
कदाचिल्लौकिकीं रीतिं जग्राह प्राकृतो यथा ।
जातु स्वतन्त्र ऐश्वर्यं दर्शयामास च प्रभुः ॥८६

प्रभोरैश्वर आचारो लोकबुद्धे रगोचरः ।
यदासावाचरद् यच्च तदेवासीन्मनोहरम् ॥८८
रामचन्द्रपुरीस्वामी वसन्नेवं कियच्चिरम् ।
नीलाद्रौ प्रययौ तस्मात्तीर्थभ्रमणमानसः ॥८९
तस्मिन् याते प्रभोर्भक्तगणा हर्षमुपागताः ।
पाषाणः शिरसस्तेषां भूमौ न्यस्त इवाभवत् ॥९०
भिक्षा-कीर्त्तन-नृत्यानि सच्छन्दान्यभवन् प्रभोः ।
प्रसादभोजनं सर्वे चक्रुः सच्छन्दमानसाः ॥९१
गुरूपेक्षापराधेन फलमित्थं प्रजायते ।
सोऽपराधः क्रमेणैवेश्वरमप्यतिवर्त्तते ॥९२
अपि चेत्तं गुरुं मत्वा तद्दोषं नाग्रहीत् प्रभुः ।
तथापि तत्फलेनासौ शिक्षयामास मानवान् ॥९३
एतच्चैतन्यचारित्रं भाति पीयूष-पूरवत् ।
माधुर्य्येणैव पूर्य्यन्ते कर्णौ चित्तञ्च शृण्वताम् ॥९४
चैतन्यचरितं ह्येतच्छृणुतैकाग्रमानसाः ।
यूयं सुखेन लप्स्यध्वे प्रेम कृष्णपदाम्बुजे ॥९५
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥९६

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे भिक्षासङ्कोचनं नामाष्टमः परिच्छेदः ।

—०—

अन्त्यलीलायां नवमः परिच्छेदः

"अगण्यधन्य-चैतन्यगणानां प्रेमवन्यया ।
निन्येऽधन्य-जन-स्वान्त-मरुः शश्वदनूपताम् ॥१॥"

श्रीश्रीमत्कृष्णचैतन्यो दयालु र्जयतान्मुहुः ।
जयताज्जयतान्नित्यानन्दः कारुण्यवारिधिः ॥१
करुणामय आचार्य्योऽद्वैतो जीयात् पुनः पुनः ।
जयन्तु रसिकाः सर्वे गौरभक्तगणा भुवि ॥२
इत्थं महाप्रभुः सर्वैं र्निजभक्तजनैः सह ।
श्रीकृष्णप्रेमरङ्गेण न्यवसन्नीलपर्वते ॥३
वहिरन्तश्च कृष्णस्य विरहाम्बुधिवीचिभिः ।
आसीन्नानाविधैर्भावै र्विह्वलाङ्गमनाः प्रभुः ॥४
दिवा पश्यन् जगन्नाथं कुर्वन्नृत्यञ्च कीर्त्तनम् ।
रात्रौ राय-स्वरूपाभ्यां रसमास्वादयत् पुनः ॥५
ददृशुस्तं जना एत्य भुवनत्रयवासिनः ।
कृष्णप्रेमधनं लेभे यो ददर्श प्रभुं तदा ॥६
मानुषं वेशमाधाय देव-गन्धर्व-किन्नराः ।
सप्तपातालवास्तव्या दैत्या विषधराश्च ये ॥७
सप्तद्वीपाधिवासाश्च नवखण्ड-निवासिनः ।
गृह्णन्तो विविधान् वेशानायाता ददृशुः प्रभुम् ॥८
प्रह्लादश्च वलिर्व्यासो मुनयश्च शुकादयः ।
प्रभुमभ्येत्य दृष्ट्वा च प्रेम्णाभूवन्नचेतनाः ॥९
प्रभो र्दर्शनमप्राप्य वहिश्चित्कुर्वतो जनान् ।
प्रभुस्तानावदत् कृष्णं ब्रूतेति वहिरागतः ॥१०
अवलोक्य प्रभुं प्रेम्णा प्लवन्ते स्माखिला जनाः ।
इत्थमेव प्रभोर्जग्मु र्विभावर्य्यो दिनानि च ॥११

एकदा प्रभुमागत्य जनः कश्चिन्यवेदयत् ।
ज्येष्ठो राजसुतो मञ्चं गोपीनाथमरोपयत् ॥१२
अधःपातित-खड्गस्योपरि तं पातयिष्यति ।
रक्षिष्यति प्रभुश्चेत्तं तदासौ निस्तरिष्यति ॥१३
असौ रायो भवानन्दः सवंश्यस्तव सेवकः ।
दासस्तेऽमुष्य पुत्रोऽयं रक्षितुं युज्यते त्वया ॥१४
इत्याकर्ण्य प्रभुः प्रोचे राजा तं ताड़येत् कथम् ।
जनः प्रत्यवदत् सर्वं वृत्तान्तं प्रभवे तदा ॥१५
रामानन्दानुजो गोपीनाथोऽयं पट्टनायकः ।
विषयेषु सदा राज्ञः कर्म सम्पादयत्यसौ ॥१६
मालजाठ्याख्यभूखण्डेऽधिकार स्तस्य वर्त्तते ।
राजद्वारमुपानीतं द्रव्यं तेनाहृतं ततः ॥१७
शिष्टं तस्याभवत् कार्षापणलक्षद्वयं पुनः ।
राजार्थयत तत्कार्षापणलक्षद्वयं ततः ॥१८
तेनोक्तं नास्ति मे स्थूलद्रव्यं यत्तूर्पयामि ते ।
द्रव्यं ते पूरयिष्यामि क्रमशो विक्रयादिना ॥१९
ये दशद्वादशा मेऽश्वास्तान् मूल्येन गृहाण मत् ।
इत्युक्त्वासौ गृहीत्वाश्वान् राजद्वारमुपानयत् ॥२०
अश्वमूल्यं विजानाति साधु कोऽपि नृपात्मजः ।
तमेव प्रैरयद्राजा पात्रमित्रजनैः सह ॥२१
राजपुत्र स्त्वसौ मूल्यं लघयन्निरधारयत् ।
मूल्यमाकर्णयन् गोपीनाथो रोषमुपागमत् ॥२२
स्वभावाद्राजपुत्रोऽसौ ग्रीवामान्दोलयन्मुहुः ।
उन्नमय्य मुखं भूय इतश्चेतश्च वीक्षते ॥२३
राजानुग्रहलाभेन सदा निर्भीकमानसः ।
गोपीनाथो विनिन्दंस्तं गर्वेणैवमवोचत ॥२४

उच्चग्रीवो ममाश्वोऽयमूर्द्ध्वं नापि निरीक्षते ।
सत्यं मूल्यमतस्तस्य लघूकर्त्तुं न युज्यते ॥२५

इति श्रुत्वा क्रुधाक्रान्तमानसोऽसौ नृपात्मजः ।
नृपमभ्येत्य तद्दोषानब्रवीत् कल्पितान् बहून् ॥२६

कृत्वाश्वविक्रयच्छद्म नासौ द्रव्यं प्रदास्यति ।
मामाज्ञापय मञ्चं तमारोप्य द्रव्यमाददे ॥२७

राज्ञोक्तं यद्भवेत् साधु गत्वा तत् क्रियतां त्वया ।
येनोपायेन लभ्येत द्रव्यं स क्रियतामिति ॥२८

अथ राजसुतो गत्वा मञ्चमारोपयन्नमुम् ।
अधःस्थापितवान् खड्गं निक्षेप्तुं तत्र तं ततः ॥२९

इत्याकर्ण्य प्रभुः प्रेमरुषा किञ्चिदभाषत ।
नासौ ददाति राज्ञोऽर्थं किन्तु राज्ञोऽत्र दूषणम् ॥३०

राज्ञः प्राप्यधनं भुङ्क्ते न ततोऽपि बिभेत्यसौ ।
नर्त्तकीभ्यो नटेभ्यश्च दत्त्वा व्ययति भूरिशः ॥३१

य एव चतुरो राज्ञो विषयानुपसेवते ।
राज्ञोऽशं शोधयन् शेषं लब्धं स व्ययति स्वयम् ॥३२

तदैव द्रुतमागत्य जनः कोऽप्येवमब्रवीत् ।
वाणीनाथादयो बद्धा नीता वंश्यजनैः सह ॥३३

इत्याकर्ण्य प्रभुः प्रोचे राजा स्वं स्वं ग्रहीष्यति ।
किं क्रियेत विरक्तेन तत्र सन्न्यासिना मया ॥३४

अथ गोस्वामिनो भक्ताः स्वरूप-प्रमुखास्तदा ।
सर्वे निवेदयामासुरेवं श्रीपादयोः प्रभोः ॥३५

दासास्तवाखिला रामानन्दरायस्य वंशजाः ।
औदासीन्यं त्वया तेषु साम्प्रतं नावलम्बितुम् ॥३७

इत्याकर्ण्यैव सक्रोधं वच ऊचे महाप्रभुः ।
आदिशन्तु भवन्तोमामुपतिष्ठे नृपान्तिकम् ॥३८

सर्वेषां मतमेतद्धो यद्राजानमुपागतः ।
अञ्चलं पातयंस्तत्र याचिष्येऽहं कपर्दकान् ॥३९
विप्र-सन्न्यासिने पञ्चगण्डकानातुमर्हते ।
याचतेऽपि कथं देयं लक्षकार्षापणद्वयम् ॥४०
अस्मिन्नवसरे धावन् कोऽप्यागत्यापरोऽब्रवीत् ।
साम्प्रतं खड्गधारायां गोपीनाथो निपात्यते ॥४१
इति श्रुत्वा पुनर्भक्तैरनुनीतोऽवदत् प्रभुः ।
भिक्षुकोऽस्मि मया तावत् कार्यं नैतद्भविष्यति ॥४२
युष्माकं यदि सर्वेषामस्ति तं रक्षितुं मनः ।
यात यूयं मिलित्वा तज्जगन्नाथपदान्तिकम् ॥४३
ईश्वरो हि जगन्नाथः शक्तिः सर्वास्ति तत्करे ।
तेन कर्त्तुमकर्त्तुं वान्यथाकर्त्तुञ्च शक्यते ॥४४
इत्येवं प्रोक्तवत्येव तांश्च सर्वान् महाप्रभौ ।
नृपं गत्वां महापात्रः प्रोक्तवान् हरिचन्दनः ॥४५
गोपीनाथस्त्वसौ पट्टनायकस्तव सेवकः ।
न प्राणान् दण्डयेत् स्वामी सेवकानां कदाचन ॥४६
विशेषेण ततः प्राप्याः सन्ति शेषाः कपर्दकाः ।
प्राणादानेन को लाभः परं स्वस्य धनक्षयः ॥४७
योग्यमूल्यैर्गृहाणाश्वान् यावानर्थोऽवशिष्यते ।
क्रमशो दास्यते तेन प्राणान् गृह्णासि किं वृथा ॥४८
अथावोचत राजा तं वृत्तमेतन्न वेद्म्यहम् ।
गृह्णाम्यस्य कथं प्राणान् द्रव्यमस्याहमर्थये ॥४९
त्वं तत्र त्वरितं गत्वा समाधत्स्वाखिलं तथा ।
यथा द्रव्याणि लभ्येरं स्तस्य रक्ष्येत जीवनम् ॥५०
राजपुत्रमुपेत्योचे तत् सर्व्वं हरिचन्दनः ।
मञ्चाद्राजसुतेनाथ गोपीनाथोऽवरोपितः ॥५१

द्रव्यं देह्यर्थ्यते राज्ञेत्युपायं पृष्ट एव सः ।
उक्तवान् न्याय्यमूल्येन गृह्यन्तां घोटका मम ॥५२
दास्याम्यहं क्रमेणैव यावच्छक्ष्यामि किञ्चन ।
अविचारेण गृह्णासि प्राणान्मे किं वदाम्यहम् ॥५३
अथासौ नाय्यमूल्येन गृहीत्वा तस्य घोटकान् ।
शेषं मुद्रापयन् पत्रे गृहाय प्रैरयच्च तम् ॥५४
बद्धस्तत्र समानीतो वाणीनाथः करोति किम् ।
इत्यसौ प्रभुणा पृष्टो जनः प्रत्युक्तवानिह ॥५५
निर्भयं कृष्णनामैव वाणीनाथेन गृह्यते ।
हरे कृष्ण हरे कृष्णेत्युच्यतेऽनारतं पुनः ॥५६
क्रियतेऽङ्गुलिरेखासु संख्यानं हस्तयोर्द्वयोः ।
पूर्णे सहस्रसंख्याने रेखा चाङ्गेषु लिख्यते ॥५७
इति शृण्वन् महानन्दं लब्धवान् श्रीमहाप्रभुः ।
श्रीगौरस्य कृपालीलाभङ्गीं को बोद्धुमर्हति ॥५८
अत्रैवावसरे काशीमिश्रे प्रभुमुपागते ।
तं सोद्वेगवचः किञ्चित् प्रभुरेवमवोचत ॥५९
आलालनाथमेष्यामि स्थातुमस्मिन्नशक्नुवन् ।
अत्राहं न लभे स्वास्थ्यं नानाविघ्नैरुपद्रुतः ॥६०
भवानन्दस्य गोष्ठीयं राजार्थानुपसेवते ।
करोति बहुधा राजद्रव्याणाञ्च वृथाव्ययम् ॥६१
को दोषोऽत्र भवेद्राज्ञः स निजद्रव्यमीप्सति ।
विज्ञापयत्यसौ मह्यं तद्द्रव्यं दातुमक्षमा ॥६२
मञ्चमारोपयत्येव गोपीनाथं महीपतौ ।
मामेत्य चतुरोवारान् जनास्तस्य व्यजिज्ञपन् ॥६३
सन्न्यासी भिक्षुकश्चास्मि निवसामि च निर्जने ।
मामभ्येत्य निजं दुःखमुक्त्वा दुःखं करोति मे ॥६४

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

अद्यासौ कृपया नूनं जगन्नाथेन रक्षितः ।
स श्वो रक्षिष्यते केन राज्ञो द्रव्यमनर्पयन् ॥६५
श्रुत्वा विषयिणां वार्त्तां भवामि क्षुब्धमानसः ।
अवस्थानेन तेनात्र मम नास्ति प्रयोजनम् ॥६६
इति श्रुत्वाब्रवीत् काशीमिश्रो गृह्णन् पदं प्रभोः ।
कथं त्वं वचसानेन क्षोभमाप्नोषि चेतसा ॥६७
त्वं सन्न्यासी विरक्तोऽसि सम्बन्धः केन वास्ति ते ।
सोऽज्ञानान्धो भजेद् यस्त्वां लोकयात्रां समुद्दिशन् ॥६८
फलं त्वद्भजनस्यैव शुद्धप्रेमधनं त्वयि ।
विषयस्य कृते यस्त्वां भजते स विमूढधीः ॥६९
रामानन्देन सन्त्यक्तं राज्यं तव कृते प्रभो ।
त्यक्ताः सनातनेनापि विषया भवतः कृते ॥७०
त्वत्कृते रघुनाथोऽसौ त्यक्त्वा सर्वमिहागतः ।
विषयान् जनकस्तस्य प्राहिणोदिह तत्कृते ॥७१
किन्तु पादानुकम्पा ते यतस्तस्मिन्नजायत ।
तद्भिक्षन्नत्ति सत्रेऽसौ विषयान्न स्पृशत्यपि ॥७२
रामानन्दस्य सोदर्य्यो गोपीनाथो महाशयः ।
नैव त्वत्तः कदाचित् स विषयानभिवाञ्छति ॥७३
विपदं तस्य पश्यन्तः सर्वे तत्-सेवकादयः ।
अनन्यशरणा एव तदैवं त्वां न्यवेदयन् ॥७४
यो भजेत्त्वां तवैवार्थे शुद्धभक्तो भवेदसौ ।
भुङ्क्ते स्व-सुखदुःखानि स्वकर्मफलभोगभाक् ॥७५
तत्रैव करुणां याचन् भजते यः प्रतिक्षणम् ।
लभते सोऽचिरादेव तव श्रीचरणाम्बुजम् ॥७६

"तथाहि श्रीमद्भागवते दशमस्कन्धे चतुर्दशाध्यायेऽष्टमः श्लोकः—

तत्तेऽनुकम्पां सुसमीक्षमाणो
भुञ्जान एवात्मकृतं विपाकम्।
हृद्-वाग्-वपुर्भिर्विदधन्नमस्ते
जीवेत यो मुक्तिपदे स दायभाक् ॥२॥"

यास्यस्यालालनार्थं किं त्वं तिष्ठोपविशन्निह।
वार्त्तां विषयिणां कोऽपि नैव त्वां श्रावयिष्यति ॥७७
अथवा तस्य रक्षार्थं यदि ते जायते मनः।
अद्य रक्षितवान् यस्तं रक्षिष्यति स एव तम् ॥७८
इत्युक्त्वा च गते काशीमिश्रे निजनिकेतनम्।
राजा प्रतापरुद्रोऽसौ मध्याह्ने प्राप तद्गृहम् ॥७९
आसीत् प्रतापरुद्रस्य नियमः कोऽपि सुस्थिरः।
यावन्त्येवावतस्थेऽसौ दिनानि पुरुषोत्तमे ॥८०
पादौ संवाहयामास मिश्रस्यान्वहमागतः।
शुश्राव श्रीजगन्नाथसेवनञ्चानुपूर्विकम् ॥८१
संवाहयितुमारब्धे पादौ मिश्रस्य राजनि।
सेङ्गितं कथयामास मिश्रः किञ्चन तं वचः ॥८२
अपरं श्रूयतां राजन् वचनं विस्मयावहम्।
गच्छत्यालालनार्थं श्रीक्षेत्रं त्यक्त्वा महाप्रभुः ॥८३
इत्याकर्ण्यातिदुःखेन राजा पप्रच्छ कारणम्।
एवं मिश्रेण वृत्तान्तो निखिलो विवृतस्तदा ॥८४
मञ्चमारोपिते गोपीनाथेऽस्मिन् पट्टनायके।
तदस्य सेवकाः सर्वे प्रभुमेत्य व्यजिज्ञपन् ॥८५
तदाकर्ण्य यतः क्षुब्धं मन आसीन्महाप्रभोः।
बहु भर्त्सितवान् गोपीनाथमेवं क्रुधा प्रभुः ॥८६
अनिर्जितेन्द्रियो राजविषयान् सेवते जनः।
असद्भिः पथिभी राजद्रव्याणां कुरुते व्ययम् ॥८७

एतद्राजधनं नूनं ब्रह्मस्वादधिकं भवेत् ।
तदप्यपहरन् भुङ्क्ते महापापरतो जनः ॥८८
योराज्ञो वर्त्तनं भुङ्क्ते तद्धनं चोरयत्यपि ।
सोऽयं शास्त्रविचारेण राजदण्डमिहार्हति ॥८६
तमप्यदण्डयन् राजा स्वीयमेवार्थमीप्सति ।
एष धर्मपरोराजा पापी भण्डस्त्वसौ जनः ॥६०
अदत्त्वा नृपतेरर्थं मामाक्रन्दति कातरम् ।
इदमेवं महद्दुःखं कः सोढ़ुं शक्तिमान् भवेत् ॥६१
गच्छाम्यालालनाथं तत्तत्र स्थास्यामि निर्वृतः ।
वार्त्तां विषयिणां साध्वीं न वासाध्वीं शृणोम्यहम् ॥६२
इत्याकर्ण्यावदद्राजा व्यथाक्रान्तेन चेतसा ।
सर्वं द्रव्यं विमुञ्चामि प्रभुस्तिष्ठति चेदिह ॥६३
लभेय क्षणमेकं चेद् दर्शनं श्रीमहाप्रभोः ।
कोटिचिन्तामणिप्राप्ति र्नहि तत्सदृशी भवेत् ॥६४
किमिदं तुच्छकं वस्तु लक्षकार्षापणद्वयम् ।
मया समर्पिताः प्राणा राज्यञ्च प्रभुपादयोः ॥६५
मिश्रेणोक्तं त्यज द्रव्यमित्येवं न प्रभो र्मनः ।
दुःखं ते प्राप्नुवन्तीति विसोढ़ुं नैव शक्यते ॥६६
राजोवाच कदाचिन्न दुःखं तस्मै ददाम्यहम् ।
मञ्चाधिरोपणं खड्गे पातनञ्च न वेद्म्यपि ॥६७
तेनोपहसितो राजनन्दनः पुरुषोत्तमः ।
सोऽयमेव ततस्तस्मै मिथ्या भीतिमदर्शयत् ॥६८
गच्छ त्वं यत्नमाधाय वासयात्र महाप्रभुम् ।
अहम्रेष विमुञ्चामि तस्यार्थानखिलानिति ॥६६
मिश्रः प्रत्यवदद् द्रव्यमुक्तिर्न सम्मता प्रभोः ।
विमुक्तेऽर्थे त्वया दुःखं कदाचिन्मन्यते प्रभुः ॥१००

राज्ञोक्तं तत्कृते द्रव्वं मुञ्चामीति न तं वद ।
निवेदय प्रकृत्यैव ते सर्वे मे प्रिया इति ॥१०१
पूजनीयो भवानन्दरायो मानास्पदञ्चमे ।
मम स्वाभाविकी प्रीतिस्तस्य पुत्रेषु वर्त्तते ॥१०२
इत्युक्त्वा नृपतौ मिश्रं प्रणम्य च गृहं गते ।
ज्येष्ठो राजसुतो गोपीनाथमानयदाह्वयन् ॥१०३
राज्ञोक्तोऽसौ मया त्यक्ता स्तव शेषाः कपर्दकाः ।
तुभ्यं पट्टः पुनर्मालज्येठाया एव दीयते ॥१०४
भूय एवं न भोक्तव्यं जातु राजधनं त्वया ।
अद्य प्रभृति दास्यामि द्विगुणं तव वेतनम् ॥१०५
अथोष्णीषेण तं राजा मण्डयन्नेवमब्रवीत् ।
मया प्रस्थापितो गच्छ गृहीत्वाज्ञां प्रभोरिति ॥१०६
का कथा परमार्थाय कृपायाः श्रीमहाप्रभोः ।
तस्याः फलान्यनन्तानि कोऽभिधातुं क्षमोभवेत् ॥१०७
तत्कृपाभासमात्रस्य फलं राज्यादिसम्पदः ।
तस्यैवं विवृतिः कस्य समुदेति न मानसे ॥१०८
क्वोद्यतो मञ्चमारोप्य हर्त्तुं प्राणान् धनानि च ।
क्व वा त्यक्त्वा धनं शेषं दत्तवान् राज्यमेव तत् ॥१०९
क्वादेयं धनमादत्ते विक्रीयाखिलसम्पदम् ।
क्व भृतिं द्विगुणां दत्त्वोष्णोषेणाभूषयत्यपि ॥११०
ततस्तत्प्राप्यवित्तानां त्यागे नासीत् प्रभोर्मनः ।
नापि द्विगुणया भृत्या भूयो राज्यनियोजने ॥१११
तथाप्यागत्य तद्भृत्या यदा व्यज्ञापयन् प्रभुम् ।
क्षुब्धान्तःकरणोजातस्तदा तेनैव च प्रभुः ॥११२
सुखं वैषयिकं दातुं प्रभो र्नासीन्मनोबलम् ।
निवेदनप्रभावात्तु फलितं फलमीदृशम् ॥११३

वक्तुं स्वभावमाश्चर्य्यं गौराङ्गस्य क्षमेत कः ।
शिवब्रह्मादयो यस्य न विदुर्भावममान्तरम् ॥११४
अथात्रोपेयिवान् काशीमिश्रः पादयुगं प्रभोः ।
राज्ञश्चरितवृत्तान्तमशेषेण न्यवेदयत् ॥११५
तमुवाच प्रभुः काशीनाथ किं कृतवानसि ।
मया कारितवान् यत्त्वमिमं राजप्रतिग्रहम् ॥११६
मिश्रेणोक्तं प्रभो राज्ञो वचनं श्रूयतामिदम् ।
यदकैतवचित्तेन राज्ञा मह्यं निवेदितम् ॥११७
प्रभुर्यथा न जानाति यन्ममैव कृते पुनः ।
शेषं सन्त्यक्तवान् कार्षापणलक्षद्वयं नृपः ॥११८
भवानन्दस्य पुत्रास्ते सर्वे प्रियतमा मम ।
तान् सर्वानेव पश्यामि सर्वदात्मसमानहम् ॥११९
यत्र तत्र ततस्तेभ्योऽधिकारो दीयते मया ।
तेषां पानाशनत्यागलुण्ठनं न विचार्य्यते ॥१२०
रामरायः कृतो राजमहीन्द्रस्य नृपो मया ।
यावद्भुक्तं प्रदत्तं वा तेनेत्यस्ति न लेखनम् ॥१२१
विषयान् सेवमानोऽयं गोपीनाथोऽपि तादृशम् ।
द्वित्रिचतुरलक्षाणि कार्षिकानस्ति भुक्तवान् ॥१२२
किञ्चिद्दत्तो न दत्तो वा स मया न विचार्य्यते ।
अप्रीत्या राजपुत्रेण सोऽधुना दुःखमासवान् ॥१२३
एतावद्राजपुत्रेण कृतं नाहमवेदिषम् ।
भवानन्दस्य पुत्रा मे सर्वे ह्यात्मसमा मताः ॥१२४
तस्यैवार्थे निजद्रव्यं त्यजामीति मतिर्मम ।
मम प्रेमा स्वभावेन तत्रैवास्ति महानिति ॥१२५
श्रुत्वा तं विनयं राज्ञः प्रभुरानन्दितोऽभवत् ।
अस्मिन्नवसरे तत्र भवानन्दः समागतः ॥१२६

समेत्य पञ्चभिः पुत्रैः पतितं पादयोः प्रभोः ।
स तमुत्थाप्य वाहुभ्यामालिलिङ्ग च तत्क्षणात् ॥१२७
रामानन्दादिकान् सर्वान् मिलितान् परिदर्शयन् ।
प्रभुमेवं भवानन्दरायो वक्तुं प्रचक्रमे ॥१२८
तवैव किङ्करा एते मम वंशधराः प्रभो ।
पुनरद्य त्वया क्रीता रक्षता सङ्कटादतः ॥१२९
अधुना भक्तवात्सल्यं सुप्रकाशितवानसि ।
यथा रक्षितवान् पूर्वं विपत्तेः पञ्चपाण्डवान् ॥१३०
सोष्णीषशीर्षको गोपीनाथः पादे प्रभोः पतन् ।
राजानुग्रहवृत्तान्तं सर्वमेव न्यवेदयत् ॥१३१
तेन शेषं धनं त्यक्तं द्विगुणा मे भृतिः कृता ।
दत्त्वोष्णीषञ्च तत्रैव राज्ये भूयोऽस्मि योजितः ॥१३२
क्वासौ मञ्चोपरिस्थस्य मम मृत्युबिभीषिका ।
क्व वोष्णीषादयो राजप्रसादाश्च पुनर्मयि ॥१३३
मया मञ्चाधिरूढेन ध्यातौ श्रीचरणौ तव ।
फलान्येतानि लब्धाणि तव पादस्मृतेर्बलात् ॥१३४
ममैतत् सर्वमालोक्य जनः सर्वे चमत्कृताः ।
कृपाया महिमानं ते गायन्तः स्तुवते भृशम् ॥१३५
तव स्मरणपुण्यस्य किन्तु नैतत् फलं भवेत् ।
एष एव फलाभासो विषयाश्चञ्चला यतः ॥१३६
रामराय-वाणीनाथौ त्वया निर्विषयौ कृतौ ।
मयि ते सा कृपा नास्ति भवेयं तादृशो यया ॥१३७
कृपां शुद्धां कुरु स्वामिन् विषयान्मां विमोचय ।
विषया नैव तिष्ठन्ति मयि निर्वेदमागते ॥१३८
प्रभुणोचे स युष्मासु सन्न्यासिषु च पञ्चसु ।
कः प्रभूततमान् युष्मत् कुटुम्बान् पोषयिष्यति ॥१३९

विषयान् सेवमाना वा विरक्ता वानपेक्षकाः ।
यूयं पञ्चैव मे स्वीया दासा जन्मनि जन्मनि ॥१४०
एकः किन्तु समादेशः युष्माभिः परिपाल्यताम् ।
राज्ञो मूलधनं जातु कथञ्चिन्नापचीयताम् ॥१४१
राज्ञो मूलधनं दत्त्वा यत् किञ्चिल्लप्स्यते धनम् ।
धर्म्म्यकर्मसु तस्यैव क्रियतां सर्वथा व्ययः ॥१४२
व्ययोऽसाधुर्न कर्त्तव्यो द्वौ लोकौ येन नश्यतः ।
इत्युक्त्वा प्रभुणा सर्वे जनाः प्रस्थापिता गृहम् ॥१४३
प्रभोः कृपाविलासोऽयं रायवंशेऽद्य वर्णितः ।
तस्य व्यक्तोऽभवद् येन भक्तवत्सलतागुणः ॥१४४
प्रभौ सर्वानथाश्लिष्य गमनायानुजानति ।
समुत्थाय गताः सर्वे ते कुर्वन्तो हरिध्वनिम् ॥१४५
प्रभोः कारुण्यमालक्ष्य सर्वे जाताश्चमत्कृताः ।
व्यवहारं प्रभोः कोऽपि नावगन्तुं क्षमोऽभवत् ॥१४६
करुणार्थं यदा सर्वे प्रभुं ते समसाधयन् ।
न किञ्चिद् भविता मत्त इति तान् प्रभुरब्रवीत् ॥१४७
गोपीनाथस्य निन्दाञ्च निर्वेदञ्च तथात्मनः ।
कृतवानेवमेवासौ कस्तद्भावमबुध्यत ॥१४८
न चासौ साधयामास काशीमिश्रं न वा नृपम् ।
फलितं फलमेतावदुद्योगेन विनापि तु ॥१४९
चैतन्यचरितस्यैतद् गाम्भीर्य्यं परमं ध्रुवम् ।
स एव बुध्यते यस्य मनस्तस्य पदे स्थिरम् ॥१५०
यः शृणोति प्रभोर्भक्तवात्सल्यं सुप्रकाशितम् ।
लभते प्रेमभक्तिं स विपत्तस्य च नश्यति ॥१५१
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
कृष्णदासः स आह श्रीचैतन्यचरितामृतम् ॥१५२

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे गोपीनाथपट्टनायकोद्धारो नाम नवमः परिच्छेदः

अन्त्यलीलायां दशमः परिच्छेदः

"तं वन्दे कृष्णचैतन्यं भक्तानुग्रहकातरम् ।
येन केनापि सन्तुष्टं भक्तदत्तेन श्रद्धया ॥१॥"

गौरचन्द्रो मुहुर्जीयान्नित्यानन्दो जयत्वथ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्ति च ॥१

अथ वर्षान्तरे सर्वे भक्ता द्रष्टुं महाप्रभुम् ।
प्रस्थिताः परमानन्दहृदये नीलाचलं प्रति ॥२

अद्वैताचार्य्यगोस्वामी सर्वेषामग्रणीरभूत् ।
श्रीवासादिभिराचार्यरत्नाचार्य्यनिधी गतौ ॥३

यद्यपि प्रभुणाज्ञप्तो गौड़ेऽवस्थितये पुरा ।
तथापि प्रस्थितो नित्यानन्दः प्रेम्णा तमीक्षितुम् ॥४

प्रेम्णोलक्षणमेतद्धि विधिर्यत्र न मन्यते ।
सङ्गलाभाय तस्यैव तदाज्ञामपि लङ्घयेत् ॥५

आज्ञप्ता अपि गेहाय रासे कृष्णेन गोपिकाः ।
लङ्घयित्वापि तस्याज्ञां सार्द्धं तेनावतस्थिरे ॥६

यावान् कृष्णस्य सन्तोषस्तदाज्ञापालनादभूत् ।
तस्याज्ञालङ्घनादेव प्रेम्णा कोटिगुणोऽभवत् ॥७

वासुदेवाख्यदत्तश्च नृसिंहानन्द-सञ्ज्ञयौ ।
भगवान् पण्डितः श्रीमान् पण्डितः पुरुषोत्तमः ॥८

गङ्गादासो मुरारिश्च पण्डितो बुद्धिमन्तखान् ।
गरुड़पण्डितः शुक्लाम्बरो गुप्तमुरारिकः ॥६

अकिञ्चनः कृष्णदासो यावन्तोऽप्यपरे जनाः ।
असंख्येयाभिधानास्ते सर्व एव प्रतस्थिरे ॥१०

कुलीनग्रामिणः खण्डवासिनश्चेत्य सङ्गताः ।
गृह्णन् सर्वान् शिवानन्दसेनस्तान् गन्तुमुद्यतः ॥११

सज्जामादाय मञ्जूषां ययौ राघवपण्डितः ।
तावद्भि र्विविधैर्द्रव्यैर्दमयन्त्या सुसम्भृताम् ॥१२
भक्ष्यवस्तून्यपूर्वाणि भोगार्हाणि महाप्रभोः ।
उपायुङ्क्त प्रभुर्यानि पूर्णमेकञ्च वत्सरम् ॥१३
कासमर्द स्त्रिधाम्राख्य आर्द्रकाख्यः कटुस्तथा ।
वालाम्राणि विशुष्काणि निम्बूकान्यार्द्रकाणि च ॥१४
आम्रसत्त्वाम्रखण्डानि तैलाम्राण्याम्रपेषिकाः ।
शुष्कनालीकपत्राणि सयत्नं चूर्णितानि च ॥१५
शुकुतेति प्रसिद्धानि नावज्ञेयानि चेतसा ।
प्रभोस्तत्र यथा प्रीति र्नाभूत् पञ्चामृते तथा ॥१६
भावग्राही प्रभुस्तेषु केवलं स्नेहमाददे ।
शुकुताकासमर्देषु स तत् प्राप महासुखम् ॥१७
दमयन्ती सिषेवे तं नरबुद्ध्या महाप्रभुम् ।
उदरे चेत् प्रभोरामो जायते गुरुभोजनात् ॥१८
शुकुताभक्षणादामो नश्यत्येवेति सा ददौ ।
इति तस्याः स्मरन् स्नेहमुल्ललास महाप्रभुः ॥१९

"तथाहि भारवावष्टमसर्गे विंशः श्लोकः—

प्रियेण संग्रथ्य विपक्षसन्निधा
वुपाहितां वक्षसि पीवरस्तनी ।
स्रजं न काचिद्विजहौ जलाविलां
वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥२॥"

धन्या-मधुरिका-धानाचूर्णानां सितया सह ।
कृतपाकेन बद्धाश्च लड्डुका वहवस्तया ॥२०
आमपित्तहराः शुण्ठीखण्डै र्बद्धाश्च लड्डुकाः ।
क्षुद्रक्षुद्रासु गोणीषु पूरितास्ते पृथक् पृथक् ॥२१

कोलिशुण्ठी-कोलिचूर्ण-कोलिखण्डादयः कृताः ।
कतिधाम्लावलेहास्ते कियत्तन्नाम गृह्यते ॥२२
नारिकेलीयखण्डानि गङ्गाजलाख्यलड्डुकाः ।
सुचिरस्थायिनः खण्डविकाराश्च कृता स्तया ॥२३
मण्डाख्याः क्षीरसाराश्च सुचिरेणाप्यविक्रियाः ।
कृताश्चामृत-कर्पूर-प्रमुखा विविधाः पुनः ॥२४
अखिन्न-शूकि-धान्यावघातेन चिपिटैः कृतैः ।
नववस्त्रमयी गोणी महती सम्भृता तया ॥२५
कियतः पृथुकानाज्यैर्भृष्ट्वा कृत्वा हुड़ुम्बकान् ।
सितापाकेन कर्पूरादिभिस्ते लड्डुकाः कृताः ॥२६
चूर्णयित्वा च सम्भृष्टशालिधान्यज-तण्डुलान् ।
तच्चूर्णान्याज्यसिक्तानि पक्त्वा च सितया सह ॥२७
एला-मरीच-कर्पूर-लवङ्गै रसवासिताः ।
लड्डुकाः प्रचुरा बद्धास्तया परम-सौरभाः ॥२८
शालिधान्यजलाजाश्च सर्पिषा कृतभर्जनाः ।
शर्करारसपाकेन कृताः कर्पूरवासिताः ॥२९
स्फुटं कलाय-चूर्णानि भृष्ट्वा गव्येन सर्पिषा ।
सितापाकेन कर्पूर-वासिता लड्डुकाः कृताः ॥३०
नामानि वदितुं येषां न जानामीह जन्मनि ।
इत्थं भूरीणि भक्ष्याणि वस्तून्यासन् सहस्रधा ॥३१
राघवस्याज्ञयाप्यन्यद् दमयन्त्यकरोद्बहु ।
दम्पत्योरुभयोरासीत् प्रभौ स्नेहो महावलः ॥३२
गङ्गाया मृदमानीय गालयित्वा च वाससा ।
गन्धद्रव्यञ्च संयोज्य वटका रचितास्तथा ॥३३
तैः पूर्णं कृतसौगन्ध्यं लघु-मृन्मय-भाजनम् ।
सर्वैर्वस्तुभिरन्यैस्तु वस्त्रगोण्यो भृतास्तया ॥३४

सामान्यमञ्जुषातोऽसौ मञ्जुषा द्विगुणा कृता ।
सा पुनः पारिपाट्येन समग्रा सज्जिता ततः ॥३५
तां पिनह्य च मुद्राङ्कः प्रदत्तस्तत्र साग्रहम् ।
तां परम्परया भारवाहका अवहंस्त्रयः ॥३६
मञ्जुषायाः प्रकारोऽयमुक्तः संक्षेपतो मया ।
मञ्जुषा राघवस्येति ख्यातिर्यस्या धरातले ॥३७
तत्पर्य्यवेक्षकश्चासीत् करः श्रीमकरध्वजः ।
स्वप्राणानिव मञ्जुषामरक्षत्तत्परायणः ॥३८
एवं नीलाचलं सर्वे वैष्णवा आगता यदा ।
दैवादासीज्जलक्रीड़ा जगन्नाथस्य तद्दिने ॥३९
नावमारुह्य गोविन्द स्तन्नरेन्द्रसरोवरे ।
कुर्वन्नासीज्जलक्रीड़ां सर्वैर्भक्तजनैः सह ॥४०
तस्मिन्नवसरे द्रष्टुं जलकेलिं महाप्रभुः ।
निजभक्तजनैः सार्द्धं नरेन्द्रसर आगतः ॥४१
तदानीमेव गौड़ीयाः प्रभोर्भक्ताः समागताः ।
प्रभुणा समगच्छन्त ते नरेन्द्रसरोवरे ॥४२
तत्रागत्यैव ते भक्ताः पतिताः प्रभुपादयोः ।
प्रभुणोत्थापिताः सर्वे गाढ़मालिङ्गिताः पुनः ॥४३
गौड़ीयैः सम्प्रदायैस्तैः सर्वैः सङ्कीर्त्तने कृते ।
प्रभुसम्मेलनादेव प्रेमक्रन्दनमुत्थितम् ॥४४
जलकेलीयवाद्यैश्च गीतकीर्त्तननर्त्तनैः ।
महाकोलाहलस्तीरे खेलनञ्च जले पुनः ॥४५
गौड़ीयानान्तु सर्वेषां कीर्त्तनक्रन्दनध्वनिः ।
मिलितो विश्वमापूर्य्य जातः कोलाहलो महान् ॥४६
सर्वान् भक्तानथादायावतीर्णः सलिले प्रभुः ।
सहितस्तै र्जलक्रीड़ां कृतवान् सकुतूहलम् ॥४७

दासवृन्दावनेनेयं जलक्रीड़ा महाप्रभोः ।
चैतन्यमङ्गलग्रन्थे विवृतोऽस्ति सविस्तरम् ॥४८
वर्णितायां पुनस्तस्यां जायते पुनरुक्तता ।
व्यर्थं स्याल्लिखनं ग्रन्थवपुर्वृद्धिश्च सम्भवेत् ॥४९
जललीलां विधायाथ गोविन्दे याति मन्दिरम् ।
स्वगणान् प्रभुरादाय गतो देवालयं ततः ॥५०
तत्र दृष्ट्वा जगन्नाथं पुनः स्वावासमागतः ।
महाप्रसादमानाय्य निजभक्तानभोजयत् ॥५१
इष्टगोष्ठीं ततः कृत्वा समं सर्वैः कियच्चिरम् ।
स्वान् स्वान् परुत्तनान् वासान् भक्तान् प्रास्थापयत् प्रभुः ॥५२
राघवेनाथ मञ्जूषा गोविन्दस्य करेऽर्पिता ।
स्थापिता भोजनागार-कोणे तेनापि सा ततः ॥५३
अन्यैः पूरयितुं द्रव्यै र्मञ्जुषां स परुत्तनीम् ।
रिक्तीकृत्य गृहेऽन्यस्मिन् गोविन्दोऽस्थापयच्च ताम् ॥५४
अपरेद्यु र्निजान् भक्तान् गृहीत्वाथ महाप्रभुः ।
शय्यायाः श्रीजगन्नाथमुत्तिष्ठन्तं निरैक्षत ॥५५
ततस्तत्र समारब्धमभूद् वेष्टनकीर्तनम् ।
गातुमारेभिरे सप्तसम्प्रदायाः पृथक् पृथक् ॥५६
ननृतुश्च जनाः सप्त सम्प्रदायेषु सप्तसु ।
प्रभुरद्वैत आचार्यो नित्यानन्दप्रभु स्तथा ॥५७
वक्रेश्वरोऽच्युतानन्द स्तथा श्रीवासपण्डितः ।
खानश्रीसत्यराजश्च दासो नरहरिस्तथा ॥५८
भ्रामत्येव प्रभौ तेषु सम्प्रदायेषु सप्तसु ।
प्रभुर्मे सम्प्रदायेऽस्मिन्निति सर्वेऽभिमेनिरे ॥५९
व्याप्याकाशमतिक्रान्ते कीर्त्तनस्य कलध्वनौ ।
द्रष्टुं सर्वे जगन्नाथपुरीवासिन आययुः ॥६०

राजापि स्वगणैः सार्द्धमागत्यैक्षत दूरतः ।
चतुर्दोलामथारुह्य राज्ञ्य ऐक्षन्त सस्पृहम् ॥६१

पृथिवी कीर्त्तनाटोपादजायत परिप्लवा ।
कृते हरिध्वनौ लोकै र्महान् कोलाहलोऽभवत् ॥६२

कीर्त्तनं कारयित्वैवं कियत्कालं महाप्रभुः ।
नर्त्तितुं स्वयमेवासौ तदानीं कृतवान् मनः ॥६३

वादयन्तो जगुः सप्त सम्प्रदायाः समन्ततः ।
गौरोऽनृत्यन्महाप्रेमावेशाविष्टस्तदन्तरे ॥६४

स्मरन्नोड्रीयसङ्गीतपदमेकं महाप्रभुः ।
आज्ञापयत् स्वरूपं तत् पदं गापयितुं तदा ॥६५

"तथाहि पदम्—

अयि मोहन ते चरणे निपतामि" ॥६६

इति गीतिपदालम्वात् सावेशं नृत्यति प्रभौ ।
तत्प्रेम्णा प्लाविताः सर्वे जनास्तत्र समन्ततः ॥६७

प्रभुणोद्वाहुना ब्रूहि ब्रूहीति व्याहृते मुहुः ।
आनन्दाप्लावितात्मानो जनाश्चक्रु र्हरिध्वनिम् ॥६८

प्रभुर्मूर्च्छां गतो भूमौ पपात श्वासवर्जितः ।
तत्क्षणादेव हुङ्कारं कुर्वन् भूयः समुत्थितः ॥६९

घन-रोमाञ्च-सर्वाङ्गः शाल्मलिद्रुमवत् प्रभुः ।
क्षणात् स्फीत-तनु र्जातः पुनः सूक्ष्मकलेवरः ॥७०

सर्वेभ्यो रोमकूपेभ्यो रक्तस्वेदोद्गमोऽभवत् ।
मुखाज्जजगगेत्येवमुद्गतो गद्गदध्वनिः ॥७१

नूनमेकैकशो दन्ताः प्रचेलुश्च पृथक् पृथक् ।
जनैर्दृष्टाः स्खलन्तस्ते भुवि पातोद्यता इव ॥७२

हर्षावेशे प्रभोस्तत्र वर्द्धमाने प्रतिक्षणम् ।
प्राप्ते यामे तृतीयेऽपि न नृत्योपरमोऽभवत् ॥७३

याते चोद्वेलतां सर्वे जना आनन्दसागरे ।
आत्मनोदेहगेहानि सर्वाण्येव विसस्मरुः ॥७४
नित्यानन्दप्रभुस्तावदेकमुद्भाव्य कौशलम् ।
क्रमाद्विरमयामास सर्वान् कीर्त्तनगायकान् ॥७५
तेषामेकतमस्तत्र सम्प्रदायो हि केवलम् ।
एकेनैव स्वरूपेण मन्दमन्दस्वरं जगौ ॥७६
अथ कोलाहलाभावादीषद्बाह्यधियं प्रभुम् ।
नित्यानन्दः प्रभुः सर्वान् भक्तान् श्रान्तान् व्यजिज्ञपत् ॥७७
श्रमं विज्ञाय भक्तानां कीर्त्तनादुपरम्य च ।
प्रभुरादाय तान् सर्वान् समुद्रस्नानमाचरत् ॥७८
प्रसादभोजनं सर्वैः समं कृत्वा महाप्रभुः ।
शयनाय च तान् भक्तान् प्रैरयत् स्वं स्वमालयम् ॥७९
गम्भीराद्वारमाश्रित्य शयानेऽथ स्वयं प्रभौ ।
गोविन्दस्तत्र तत्पादौ संवाहयितुमागतः ॥८०
सुदृढो नियमस्तावत्तत्रासीत् सार्वकालिकः ।
प्रसादभोजनं कृत्वा शयानस्य महाप्रभोः ॥८१
पादौ संवाहयामास गोविन्दस्तमुपागतः ।
प्रभुभुक्तावशेषान्नं भुक्तवांस्तदनन्तरम् ॥८२
समग्रं व्याप्य तद्द्वारं गृहीतशयने प्रभौ ।
गोविन्दोऽभ्यन्तरं गन्तुमसमर्थो न्यवेदयत् ॥८३
पार्श्वतो भव देह्यन्तःप्रवेशावसरञ्च मे ।
प्रभुरूचे न मे शक्तिरङ्गं चालयितुं पुनः ॥८४
गोविन्दोऽवददिच्छामि पादसंवाहनं तव ।
कुरु वा न कुरु त्वं ते यथेच्छेत्यब्रवीत् प्रभुः ॥८५
गोविन्दोऽथ वहिर्वासो न्यस्य गात्रोपरि प्रभोः ।
तमप्युल्लङ्घयन् गेहाभ्यन्तरं प्राविशत्तदा ॥८६

पादौ संवाहयामास कटिपृष्ठं स पीड़यन् ।
ततो मर्दनमाधुर्य्यात् प्रभुरासीद् गतश्रमः ॥८७
प्रभोरङ्गावमर्दैन सुखनिद्राभवत्ततः ।
दण्डद्वये व्यतिक्रान्ते निद्राभङ्गोऽभवत् पुनः ॥८८
प्रभुरालोक्य गोविन्दं रोषादेवमभाषत ।
आसीनः कथमेतावत्कालमद्यात्र वर्त्तसे ॥८९
मयि निद्रां गते भोक्तुं प्रसादं न गतोऽसि किम् ।
स ऊचे द्वारि शेषे त्वं न पन्था निर्गमाय मे ॥९०
प्रभुः प्रत्युक्तवांस्तर्हि कथमन्तस्त्वमागतः ।
प्रसादग्रहणायापि न यातोऽसि कथं तथा ॥९१
गोविन्दः स्वगतं प्रोच इदं सेवाव्रतं मम ।
सन्त्वनेनापराधा मे गति र्वा नरकेऽस्तु मे ॥९२
कोटिमप्यपराधानां सेवार्थं गणयामि नो ।
आत्मनोऽर्थेऽपराधस्याभासादेव बिभेम्यहम् ॥९३
इत्येवं मनसा ध्यायन् गोविन्दः समवस्थितः ।
प्रभुणा पृच्छ्यमानोऽपि न किञ्चित् प्रत्यवोचत ॥९४
प्रसादग्रहणायायात् सोऽन्वहं निद्रिते प्रभौ ।
तदानीन्तनमालक्ष्य श्रमं सोऽमर्दयत्तु तम् ॥९५
स निर्यातु कथं पन्था नासीन्निष्क्रमितुं ततः ।
अपराधो महांस्तस्य भवेल्लङ्घयतस्तु तम् ॥९६
इत्येते भक्तिशास्त्रीया धर्माः सूक्ष्मतमाः किल ।
चैतन्य-कृपयैवैषां मर्म विज्ञायतेऽखिलम् ॥९७
प्रभुरासीत् स्वभक्तेभ्यस्तत्प्रकाशनकौतुकी ।
तत् प्रकाशयितुं भङ्गीमियतीं कृतवानतः ॥९८
संक्षेपेण मयोक्तं तत् परिमुण्डाख्यनर्त्तनम् ।
इदानीमपि गायन्ति यच्चैतन्यस्य किङ्कराः ॥९९

एवमेव प्रभुः सर्वान् निज़ानादाय तान् गणान् ।
प्रक्षाल्यामार्जयत् सर्वं गुण्डिचामन्दिरं ततः ॥१००
पूर्ववत् कीर्त्तनं गायन् नर्त्तनं कृतवान् प्रभुः ।
उद्याने कृतवान् पूर्ववदेवारण्यभोजनम् ॥१०१
रथस्याग्रे तथैवासौ विदधे नर्त्तनं प्रभुः ।
होराख्यपञ्चमीयात्रादर्शनं कृतवांश्च तैः ॥१०२
वर्षाणां चतुरो मासान् भक्ताः सर्वेऽवतस्थिरे ।
जन्माष्टम्यादियात्राणां दर्शनं विदधुश्च ते ॥१०३
पूर्वमेव यदा गौड़ात् सर्वे भक्ताः समागताः ।
प्रभुं भोजयितुं किञ्चिद् बभूवुः स्पृहयालवः ॥१०४
कश्चित् प्रसादमानीय गोविन्दस्य करे ददत् ।
कश्चिदूचे यथावश्यं गोस्वामी भक्षयेदिति ॥१०५
क्षीरपिण्डान् ददुः केचित् पूपादीन् केऽपि लड्डुकान् ।
प्रसादानुत्तमान् केचिन्महार्घान् विविधान् पुनः ॥१०६
इदं दत्तमनेनेति गोविन्देन निवेदितः ।
तदनश्नन् प्रभुः प्रोचे सम्भृत्य स्थाप्यतामिति ॥१०७
एवं संस्थाप्यमानैस्तै गृहकोणे च सम्भृते ।
जनानां शतकेनापि भोज्यानां सञ्चयोऽभवत् ॥१०८
अथ सर्वेऽपि गोविन्दं पप्रच्छुः ससमादरम् ।
प्रसादं किमु मद्दत्तं प्रभुं भोजितवानसि ॥१०९
स कस्मैचित् किमप्युक्त्वा गोविन्दस्तानवञ्चयत् ।
प्रभुमेवं सनिर्वेदमुक्तवान् स परेद्यवि ॥११०
आचार्य्यप्रमुखैरार्य्यैर्नानावस्तूनि यत्नतः ।
भवतो भोजनायैव दत्तानि सन्ति मत्करे ॥१११
न तु तानि भवान् भुङ्क्ते ते च पृच्छन्त्यभीक्ष्णशः ।
तान् कियद्वञ्चयिष्यामि निस्तारोऽस्तु कथं नु मे ॥११२

प्रभुणावाचि दुर्जात कथं दुःखायसे हृदा ।
किं किं ते दत्तवान् कस्कस्तत्तदानय मामिह ॥११३
इत्युदीर्य्य समासीने भोजनाय महाप्रभौ ।
नामान्युल्लिख्य गोविन्द स्तस्मै तत्तन्न्यवेदयत् ॥११४
आचार्य्येणार्पिताः क्षीरपिण्डाश्च रसपूपकाः ।
अमृतगुटिकाश्चैता इमाः कर्पूरपूपिकाः ॥११५
श्रीवासपण्डितोऽप्येतान् पूपांश्चेदं प्रपाणकम् ।
बहुधामृतमण्डाश्च दत्तवान् पद्मशर्कराः ॥११६
एतान्याचार्य्यरत्नेन सर्वान्युपहृतानि ते ।
आचार्य्यनिधिनाप्येतद्दत्तं नानाविधं पुनः ॥११७
श्रीवासुदेवदत्तेन गुप्तेन च मुरारिणा ।
श्रीबुद्धिमन्तखाना च दत्तानीमान्यनेकधा ॥११८
आचार्योनन्दनः श्रीमान् सेनः श्रीमांश्च पण्डितः ।
इति तैश्च प्रदत्तानि त्वमेतान्यपि भक्षय ॥११९
पुरोदृश्यानि यावन्ति कुलीनग्रामवासिनाम् ।
तावन्त्येवेह दृश्यन्ते जनानां खण्डवासिनाम् ॥१२०
ब्रुवता नाम सर्वेषां तेनैवं पुरतः प्रभोः ।
निहितानि च सर्वाणि सन्तुष्टो भुक्तवान् प्रभुः ॥१२१
छिद्रितनारिकेलानि मासपर्य्युषितान्यपि ।
अमृतगुटिकादीनि पानकान्यखिलानि च ॥१२२
प्रायेणाभिनवास्वाद-युक्तानि तेन मेनिरे ।
प्रसादो न प्रभोः स्वादहीनः पर्य्युषितोऽथवा ॥१२३
जनैः शतेन भक्ष्याणि दण्डेनैकेन भक्षयन् ।
अप्यन्यत् किञ्चिदस्तीति गोविन्दं पृष्टवान् प्रभुः ॥१२४
गोविन्दोऽवददस्त्येका राघवस्यैव मञ्जूषा ।
प्रत्यूचे प्रभु रद्यास्तां पश्चाद्द्रक्ष्यामि तामहम् ॥१२५

अन्येद्यु र्निभृते भोक्तुमुपविष्टो महाप्रभुः ।
सर्वाण्यपश्यदुन्मोच्य मञ्जूषां राघवस्य ताम् ॥१२६
स्तोकशः सर्ववस्तूनामास्वादं तेन गृह्णता ।
स्वादुतां सौरभञ्चैषां लब्ध्वा भूयः प्रशंसितम् ॥१२७
तानि वत्सरभोज्यानि निबध्य स्थापितानि च ।
भोजनावसरे भुञ्जन् स्वरूपः पर्य्यवेषयत् ॥१२८
कदाचिद्भोजयामास किञ्चिद्रात्रावपि प्रभुम् ।
भक्तैः श्रद्धार्पितं द्रव्यमवश्यं बुभुजे प्रभुः ॥१२९
एवं भक्तजनैः सार्द्धं मिलितोऽथ महाप्रभुः ।
कृष्णवार्त्ताप्रसङ्गेन चातुर्मास्यमयापयत् ॥१३०
प्रभुमामन्त्रयन्ते स्माचार्य्याद्या अन्तरान्तरा ।
ओदनं स्वगृहे पेचु र्बहुधा व्यञ्जनानि च ॥१३१
मरीचानां कटुस्वादमम्लं सुमधुरं तथा ।
लवणार्द्रकनिम्बूनि खण्डसारः पयोदधि ॥१३२
सुख-तिक्ताख्ययूषञ्च शाका द्वित्र-विधाः पुनः ।
निम्ब-वार्त्ताकु-भाजी च सुभृष्टञ्च पटोलकम् ॥१३३
फुल्लवट्यश्च सम्भृष्टाः सूपो मुद्गादिसंस्कृतः ।
इति ते विविधं पेचु र्व्यञ्जनं प्रभुरोचकम् ॥१३४
तद्‌योगार्थं जगन्नाथप्रसादस्तैरथाहृतः ।
जगाम प्रभुरेकाकी क्वापि क्वापि गणैः सह ॥१३५
आचार्य्यनिधिराचार्यरत्न-नन्दन-राघवाः ।
श्रीवास-प्रमुखा भक्ता यावन्तो निखिला द्विजाः ॥१३६
इत्थं निमन्त्रयामासुः प्रभुं यत्नादरान्विताः ।
वासुदेवस्तथा गुप्तमुरारिश्च गदाधरः ॥१३७
कुलीनग्राम-वास्तव्यास्तथान्ये खण्डवासिनः ।
तं निमन्त्र्य जगन्नाथप्रसादं ते समानयन् ॥१३८

शृण्वाख्यानं शिवानन्दसेनस्याथ निमन्त्रणे ।
तस्य चैतन्यदासाख्यो बभूव ज्येष्ठ आत्मजः ॥१३६
प्रभुणा मेलनायासौ तं यदानीतवान् सह ।
तदा महाप्रभुर्बालं तं नाम परिपृष्टवान् ॥१४०
चैतन्यदास इत्याख्यां श्रुत्वा गौरोऽवदद्धसन् ।
गृहीतं शिशुनानेन किं नामेति न बुध्यते ॥१४१
ऊचे सेनो धृतं तस्य नामाबुध्यत यस्त्विति ।
उक्त्वा निमन्त्रयामास तदासौ श्रीमहाप्रभुम् ॥१४२
महामूल्ये जगन्नाथप्रसादे तेन चाहृते ।
प्रभुर्भक्तजनैः सार्द्धं भोजनार्थमुपाविशत् ॥१४३
शिवानन्दं प्रति श्रद्धागौरवादेव भुक्तवान् ।
अप्रसन्नमनास्त्वासीदतिगुर्वशनात् प्रभुः ॥१४४
अपरेद्यवि चैतन्यदासेनामन्त्रितः प्रभुः ।
जानता तदभीष्टानि व्यञ्जनान्याहृतानि च ॥१४५
आर्द्रकं लवणं निम्बु दधि फुल्लवटीस्तथा ।
दृष्ट्वा महाप्रभुः सर्वं सुप्रसन्नमना अभूत् ॥१४६
प्रभुणोक्तमयं बालो नूनं जानाति मे मनः ।
इत्थं निमन्त्रणेनास्य तुष्टचित्तोऽस्मि सर्वथा ॥१४७
इत्येवं कथयन् दध्योदनं भक्षितवान् प्रभुः ।
ददौ चैतन्यदासाय स्वस्यैवोच्छिष्टभाजनम् ॥१४८
अथ गच्छत्सु मासेषु चतुर्ष्वेवं निमन्त्रनैः ।
लेभिरे नावकाशन्तु कतिचिद्वैष्णवास्तदा ॥१४६
सार्वभौमभट्टाचार्यः पण्डितश्च गदाधरः ।
इत्येतयोरभूद्विद्वा-दिनानां नियमः प्रभोः ॥१५०
आचार्य्यो रामभद्रश्च गोपीनाथश्च शङ्करः ।
भगवान् जगदानन्दः काशीवक्रेश्वरौ च तौ ॥१५१

एते निमन्त्रयामासु गृहान्नेनान्तरान्तरा ।
प्रसादामन्त्रणेऽन्येषां कपर्दकपणद्वयम् ॥१५२
पूरा बभूव निर्दिष्टा कपर्दानां चतुष्पणी ।
रामचन्द्रपुरीभीत्या भिक्षामात्रा लघूकृता ॥१५३
चतुर्मासस्थितान् गौड़भक्तान् प्रास्थापयन् प्रभुः ।
भक्ता नीलाद्रिवास्तव्याः समं तेनावतस्थिरे ॥१५४
मयैतत् कथितं तावत् प्रभोर्भिक्षानिमन्त्रणम् ।
भक्तैर्दत्तानि वस्तूनि यत्रास्वादितवान् प्रभुः ॥१५५
राघवस्य च मञ्जूषा तत्रैव विवृता मया ।
उक्तं तदन्तरा तावत् परिमुण्डाख्यनर्त्तनम् ॥१५६
शृणोति श्रद्धया यस्तु चैतन्यस्य कथामिमाम् ।
सर्वथा लभते प्रेम स चैतन्यपदाम्बुजे ॥१५७
श्रोतुः कर्णमनस्तृप्तिं जनयन्तीं सुधामिव ।
य एवास्वादयत्येनां स हि सौभाग्यवानिह ॥१५८
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१५९

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे भक्तदत्तास्वादनं नाम
दशमः परिच्छेदः ।

—०—

अन्त्यलीलायामेकादशः परिच्छेदः

"नमामि हरिदासं तं चैतन्यं तञ्च तत्प्रभुम् ।
संस्थितामपि यन्मूर्त्तिं स्वाङ्के कृत्वा ननर्त्त यः ॥१॥"

जय श्रीकृष्णचैतन्य करुणाम्बुनिधे जय ।
जयाद्वैतप्रभुप्रेष्ठ नित्यानन्दप्रभुप्रिय ॥१
जय त्वं श्रीनिवासेश हरिदासेश्वर प्रभो ।
प्राणनाथ स्वरूपस्त जीया गदाधरप्रिय ॥२
जगदानन्दजीवेश जय काशीश्वरेश्वर ।
श्रीसनातनरूपेश रघुनाथपते जय ॥३
जय गौरतनो कृष्ण स्वयं श्रीभगवन् जय ।
निजपादयुगं देहि कृपया मे महाप्रभो ॥४
नित्यानन्दविधो जीयाः श्रीचैतन्यस्य जीवन ।
भक्तिमर्पय मे देव तवपादसरोरुहे ॥५
चैतन्यस्य त्वमाचार्य जयाद्वैतविधो जय ।
तव पादाम्बुजे भक्तिमद्वैताचार्य देहि मे ॥६
यूयं जयत गौराङ्गभक्ता गौराङ्गजीवनाः ।
सर्वे सम्मिलिता भक्तिरत्नं मह्यं प्रयच्छत ॥७
रघुनाथावुभौ जीवः श्रीरूपः श्रीसनातनः ।
गोपालश्चेति षट् प्राणनाथा मम जयन्त्विमे ॥८
लिखाम्येषां प्रसादेन प्रभोर्लीलागुणानहम् ।
पवित्रयितुमात्मानं लिखाम्यत्र यथा तथा ॥९
एवमेवाभवन्नीलाचले वासो महाप्रभोः ।
सङ्कीर्त्तनविलासाश्च सर्वभक्तजनैः सह ॥१०
दिवा सङ्कीर्त्तनं नृत्यं कृत्वा चेश्वरदर्शनम् ।
नक्तं रायस्वरूपाभ्यां रसमास्वादयत् प्रभुः ॥११

एवं यापयतः कालं सुखेनैव महाप्रभोः ।
अङ्गेषु कृष्णविच्छेदविकारा बहवोऽभवन् ॥१२
प्रत्यहं वर्द्धमानास्ते विकाराः शास्त्रसम्मताः ।
चिन्तोद्वेगप्रलापाद्याः प्रादुरासन् प्रभोर्निशि ॥१३
श्रीमत्स्वरूपगोस्वामी रामानन्दश्च रायकः ।
उभौ साहायकं रात्रिन्दिवं विदधतुः प्रभोः ॥१४
महाप्रसादमादाय गोविन्दोऽथैकदा गतः ।
प्रदातुं हरिदासाय प्रफुल्लेनैव चेतसा ॥१५
ठाकुरं श्रीहरिदासं शयानं दृष्टवानसौ ।
मन्दं मन्दञ्च कुर्वन्तं संख्येयं नामकीर्त्तनम् ॥१६
गोविन्दोऽवददुत्थाय प्रसादो भुज्यतामिति ।
उक्तोऽसौ हरिदासेन करिष्याम्यद्य लङ्घनम् ॥१७
अधुना कथमश्नामि नामसंख्यामपूरयन् ।
महाप्रसादमानीतं त्वयोपेक्षे कथन्त्विति ॥१८
उक्त्वा महाप्रसादं स वन्दमानः कृताञ्जलिः ।
गृहीत्वा च कणामेकां ततो भक्षितवान् पुनः ॥१९
अपरेद्यु रथोपेत्य तत्समीपं महाप्रभुः ।
सुस्थोऽसि हरिदासेति परिपप्रच्छ सादरम् ॥२०
प्रणिपत्य प्रभुं सोऽपि चकारैवं निवेदनम् ।
सुस्थमेतच्छरीरं मे न बुद्धिमनसी इति ॥२१
प्रभुः पप्रच्छ को व्याधि र्निर्णीतः कथ्यतामिति ।
स ऊचे नामसंख्यायाः पूर्त्तिर्नैव भवेदिति ॥२२
प्रभुणोच्यत वृद्धोऽसि संख्यामल्पीयसीं कुरु ।
सिद्धदेहोऽसि निर्बन्धं साधने कुरुषे कथम् ॥२३
अवतारस्त्वदीयोऽयं लोकनिस्तारहेतवे ।
महिमा च त्वया नाम्नः सर्वथैव प्रचारितः ॥२४

अल्पीकृत्याधुना संख्यां कीर्त्तनं क्रियतामिति ।
उक्तोऽसौ हरिदासेन श्रूयतां मे निवेदनम् ॥२५
हीनजातावहं जातो निन्दनीयकलेवरः ।
रतः कर्मसु हीनेषु सर्वदा पामराधमः ॥२६
अस्पृश्योऽपीक्षणानर्होऽप्यहमङ्गीकृतस्त्वया ।
आरोपितोऽस्मि वैकुण्ठं त्वयैवोद्धृत्य रौरवात् ॥२७
ईश्वरस्त्वं स्वतन्त्रोऽसि सत्यसङ्कल्पवानसि ।
जगन्ति नर्त्तयस्येवं यथाकाङ्क्षति ते मनः ॥२८
त्वया प्रसन्नचित्तेन नर्त्तितोऽहमनेकशः ।
म्लेच्छेनापि मया विप्रश्राद्धपात्रञ्च भक्षितम् ॥२९
चिरात् प्रभृति जागर्त्ति ममैकं वाञ्छितं हृदि ।
मन्येऽहं न चिराल्लीलामिमां त्वं संवरिष्यसि ॥३०
सान्त्यलीला प्रभो जातु नैव दर्श्येत मे त्वया ।
पातनीयं शरीरं मे त्वयैवेदं पुरस्तव ॥३१
हृदि मे निदधानस्ते श्रीमत्पादाम्बुजद्वयम् ।
विलोकयंश्च नेत्राभ्यां मुखचन्द्रमसं तव ॥३२
जिह्वया कृष्णचैतन्य इत्याख्यां व्याहरंस्तव ।
अहं प्राणांस्त्यजामीति कामनैवं मम प्रभो ॥३३
एवमेवास्ति मे वाञ्छा प्रसादस्ते भवेद् यदि ।
तन्निवेदनमेतन्मे सम्पादय कृपामय ॥३४
इदं नीचं शरीरं मे निपतत्वग्रतस्तव ।
इति वाञ्छितसिद्धिर्मे त्वामेवाश्रयतामिति ॥३५
एवमुक्तः प्रभुः प्रोचे हरिदास तवेप्सितम् ।
कृपालु भगवान् कृष्णोऽवश्यमेव विधास्यति ॥३६
त्वामेवादाय यत्किञ्चित् सुखं किन्तु ममाखिलम् ।
न युज्यते त्वया गन्तुं तत् परित्यज्य मामिति ॥३७

स तत्पादौ गृहीत्वोचे न मां छलय मायया ।
अवश्यं करुणामेवं कुरु मामधमं प्रति ॥३८
मम मूर्द्धमणीभूताः कतिशश्च महाशयाः ।
कोटि भक्ता विराजन्ते तवलीलासहायकाः ॥३६
एकस्मिन्मादृशे कीटे मृते किं हीयते तव ।
पिपीलिकायामेकस्यां मृतायां का क्षतिर्भुवः ॥४०
त्वं भक्तवत्सलो देव भक्ताभासोऽहमस्मि ते ।
तथाप्यवश्यमेवाशामेतां मे पूरयिष्यसि ॥४१
प्रभो मध्याह्नकृत्याय साम्प्रतं त्वं प्रतिष्ठसे ।
विलोक्य श्री जगन्नाथं मह्यं दास्यसि दर्शनम् ॥४२
इत्येवं प्रोक्तवन्तं तं समाश्लिष्य महाप्रभुः ।
समुद्रं गतवानासीत् स माध्याह्निककर्मणे ॥४३
प्रातर्दृष्ट्वा जगन्नाथं सर्वैर्भक्तैरथ प्रभुः ।
अति सत्वरमायातो हरिदासं विलोकितुम् ॥४४
पुरतो हरिदासस्य दर्शनं गच्छति प्रभौ ।
ववन्दे स प्रभोः पादौ वैष्णवानाञ्च तत्परम् ॥४५
अथोवाच प्रभु र्ब्रूहि हरिदास तवेप्सितम् ।
स ऊचे हरिदासेन यथाज्ञापयति प्रभुः ॥४६
अङ्गनेऽथ समारेभे महासङ्कीर्त्तनं प्रभुः ।
नर्त्तनं कृतवांस्तत्र श्रीवक्रेश्वरपण्डितः ॥४७
ततः स्वरूपगोस्वामि-प्रमुखा ये प्रभोर्गणाः ।
हरिदासं समावेष्ट्य चक्रुस्ते नामकीर्त्तनम् ॥४८
अग्रतः सार्वभौमस्य रामानन्दस्य च प्रभुः ।
सद्गुणान् हरिदासस्य तत्र वक्तुं प्रचक्रमे ॥४६
ब्रुवाणो हरिदासस्य गुणान् शतमुखोऽभवत् ।
भूयोभूयो ब्रुवाणस्य ववृधेऽस्य महासुखम् ॥५०

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

तान् गुणान् हरिदासस्य श्रुत्वा विस्मितमानसाः ।
चरणौ हरिदासस्य सर्वे भक्ता ववन्दिरे ॥५१
हरिदासो निजाग्रेऽथ प्रभुं तत्रोपवेशयन् ।
निदधे निजनेत्रालियुग्मं तस्य मुखाम्बुजे ॥५२
गृहीत्वा चरणौ तस्य धृत्वा च हृदये निजे ।
भूषयन् स्वशिरः सर्वभक्तानां पदरेणुभिः ॥५३
प्रभुः श्रीकृष्णचैतन्य इत्युवाच पुनः पुनः ।
मुमोचाश्रूणि नेत्राभ्यां पिवंस्तन्मुखमाधुरीम् ॥५४
अथ श्रीकृष्णचैतन्य इति शब्द उदीरिते ।
तन्नाम्नैव समं तस्य प्राणा उत्क्रमणं गताः ॥५५
महायोगेश्वरस्येव स्वच्छन्दमरणं तथा ।
दृष्ट्वा सर्वेऽस्मरन् भीष्मं स्वेच्छया प्रलयं गतम् ॥५६
हरे कृष्ण हरे कृष्णेत्युक्त्वा सर्वेऽथ चक्रुशुः ।
अभवद्विह्वलः प्रेमानन्देन श्रीमहाप्रभुः ॥५७
हरिदासतनुं स्वाङ्के निधाय श्रीमहाप्रभुः ।
प्रेमाविष्टमना नृत्यं कृतवानङ्गने तदा ॥५८
एवमेव कियत्कालं नृत्यति श्रीमहाप्रभौ
गोस्वामिना स्वरूपेण तस्मै कृत्यं निवेदितम् ॥५९
ततो विमानमारोप्य हरिदासञ्च ठाकुरम् ।
गायन्तः कीर्त्तनं सर्वे समुद्रं प्रापयंस्तदा ॥६०
प्रचचाल पुरोभागे नृत्यं कुर्बन् महाप्रभुः ।
पश्चाद् वक्रेश्वरो भक्तगणैः सार्द्धं ननर्त्त च ॥६१
स्नापितो हरिदासोऽथ प्रभुणा सागराम्बुना ।
उक्तञ्चाद्य समुद्रोऽयं महातीर्थमभूदिति ॥६२
भक्तास्ते हरिदासस्य सर्वे पादोदकं पपुः ।
लिलिपुश्च तदङ्गानि प्रसादीकृतचन्दनैः ॥६३

प्रसाद-डोर-काड़ारवासोभ्यामावृताङ्गकम् ।
उत्खाते सैकते गर्त्ते हरिदासमशाययन् ॥६४
जगुरुत्कीर्त्तनं सर्वे भक्तास्तस्य समन्ततः ।
सानन्दं कृतवान्नृत्यं श्रीवक्रेश्वरपण्डितः ॥६५
गौररायो हरिं ब्रूहि हरिं ब्रूहीत्युदीरयन् ।
न्यदधान्निजहस्तेन तद्गात्रे वालुकाः स्वयम् ॥६६
वालुकास्तत्र विन्यस्य वेदिबन्धं स कारयन् ।
समन्ताद्रचयामास तद्वेद्या महतीं वृतिम् ॥३७
कीर्त्तनं नर्त्तनञ्चाथ विदधाने महाप्रभौ ।
हरिध्वनिकृतैः कोलाहलैः पूर्णमभूज्जगत् ॥६८
ततो महाप्रभुः सर्वै र्निजभक्तजनैः सह ।
समुद्रे विदधे स्नानं सरङ्गं जलकेलिभिः ॥६९
वेदिं प्रदक्षिणीकृत्य तैः सिंहद्वारमागतः ।
हरिकीर्त्तनसंरावैः पूरयन्निखिलं पूरम् ॥७०
सिंहद्वारमथागत्य प्रभुरापणिकान् जनान् ।
प्रययाचे प्रसादान्नं पातयन् वसनाञ्चलम् ॥७१
ठाकुरहरिदासस्य महोत्सवकृतेऽधुना ।
प्रसादं प्रार्थये भिक्षा युष्माभि र्दीयतामिति ॥७२
क्रय्य-प्रसारिणः सर्वे श्रुत्वा सानन्दचेतसा ।
पूर्णं डल्लकमुत्थाप्य प्रसादं दातुमुद्यताः ॥७३
गोस्वामिना स्वरूपेण तथालोक्य निवारिताः ।
स्वापणेषु निषण्णास्ते स्वं स्वमादाय डल्लकम् ॥७४
अथ स्वरूपगोस्वामी गृहाय प्राहिणोत् प्रभुम् ।
चतुर्भि र्वैष्णवैः सार्द्धं चतुष्पात्रकरैः स्थितः ॥७५
ऊचे स्वरूपगोस्वामी ततो विक्रयिकान् प्रति ।
पाद-प्रमाणमेकैकं वस्तु मे दीयतामिति ॥७६

एवं नानाप्रसादानां कारयन् भारबन्धनम् ।
चतुर्णां मूर्द्ध्नि आरोप्य जनानामानिनाय सः ॥७७
वाणीनाथ स्तदानैषीत् प्रसादान् पट्टनायकः ।
प्रसादांश्च बहून् काशीमिश्रोऽपि प्राहिणोत्ततः ॥७८
प्रभुस्तान् पङ्क्तिशः सर्वान् वैष्णवानुपवेशयन् ।
स्वयमेव जनैः सार्द्धं चतुर्भिः पर्य्यवेषयत् ॥७९
नाशक्नोत् स्वल्पमादातुं श्रीहस्तेन महाप्रभुः ।
ददौ पञ्चजनैर्भोज्यान्येकैकत्रापि भाजने ॥८०
अथोवाच स्वरूपस्तमासीनोऽत्रेक्ष्यतां भवान् ।
अहमेवोपनेष्यामि गृहीत्वैतान् जनानिति ॥८१
स्वरूपो जगदानन्दः काशीश्वरश्च शङ्करः ।
इति चत्वार एवैते सततं पर्य्यवेषयन् ॥८२
अभुञ्जाने प्रभौ कश्चिदशक्नोन्नैव भक्षितुम् ।
तस्मिंस्त्वह्नि प्रभुः काशीमिश्रेणासीन्निमन्त्रितः ॥८३
प्रसादं स्वयमानीय काशीमिश्र उपेत्य च ।
प्रभुं कारितवान् भिक्षामाग्रहातिशयान्वितः ॥८४
भिक्षामश्नति पूर्य्यां च भारत्या च समं प्रभौ ।
भोजनं कर्त्तुमारब्धा निखिलास्तत्र वैष्णवाः ॥८५
आकण्ठं पूरयित्वैव भोज्यमानेषु तेष्वपि ।
वचनं देहि देहीति प्रोच्चैरूचे महाप्रभुः ॥८६
अथ सर्वे कृताहारा विहिताचमनाश्च ते ।
तदानीं प्रभुणा माल्यैश्चन्दनैश्च प्रसाधिताः ॥८७
प्रेमावेश-वशादित्थं प्रयच्छन्तं वरान् प्रभुम् ।
श्रुत्वा भक्ता बभूवुस्ते तृप्तश्रवणमानसाः ॥८८
येनायं हरिदासस्य वीक्षितो विजयोत्सवः ।
येन तत्र कृतं नृत्यं गीतं येन च कीर्त्तनम् ॥८९

तद्गात्रे वालुका दातुमुपास्थीयत येन च ।
अस्मिन् महोत्सवे तस्य कृतं येन च भोजनम् ॥६०
श्रीकृष्णप्रेम ते सर्वे प्राप्नुवन्त्यचिराद् ध्रुवम् ।
दर्शने हरिदासस्य शक्तिरित्थं व्यराजत ॥६१
तस्य सङ्गः प्रदत्तो मे श्रीकृष्णेनानुकम्पया ।
स्वातन्त्र्येण तदिच्छायाः सङ्गभङ्गः कृतोऽधुना ॥६२
आकाङ्क्षा हरिदासस्य प्रस्थानाय यदाभवत् ।
तं निरोद्धुं समर्थाभून्न मे शक्तिः कथञ्चन ॥६३
इच्छामात्रोदयात्तेन प्राणनिष्क्रमणं कृतम् ।
आकर्णितं पुरावृत्तं भीष्मस्य मरणं यथा ॥६४
अभवद्धरिदासोऽसौ वसुधायाः शिरोमणिः ।
अभूदद्य विना तेन रत्नशून्या वसुन्धरा ॥६५
हरिदास जयेत्युक्त्वा क्रियतां भो हरिध्वनिः ।
इत्यादिश्य स्वयं नृत्यं कृतवान् श्रीमहाप्रभुः ॥६६
जगुः सर्वे मुहुर्जीयाद्धरिदासो जयत्विति ।
येन प्रकाशितो नाम्नोमहिमा भवता भुवि ॥६७
भक्तानामथ सर्वेषां गमनानुमतिं ददत् ।
प्रभुर्हर्षविषादाभ्यां तदा विश्राममग्रहीत् ॥६८
इत्येवं हरिदासस्य विजयो वर्णितो मया ।
यस्य श्रवणमात्रेण कृष्णे भक्ति र्दृढ़ा भवेत् ॥६९
अनेन भक्तवात्सल्यं चैतन्यस्यावगम्यते ।
भक्तेच्छां पूरयामास स सन्न्यासि-शिरोमणिः ॥१००
अन्तकाले ददौ तस्मै निजस्पर्शनदर्शने ।
तं निजोत्सङ्गमारोप्य स्वयं तत्र ननर्त्त च ॥१०१
श्रीहस्तेन स्वयं तस्मिन् कृपया वालुका ददौ ।
स्वयं भिक्षन् प्रसादञ्च कृतवांस्तन्महोत्सवम् ॥१०२

महाभागवतश्रेष्ठो हरिदासो विदांवरः ।
इत्थं सौभाग्यलाभाय प्रस्थितः सोऽयमग्रतः ॥१०३

श्रीचैतन्यस्य चारित्रं साक्षात् पीयूषसागरः ।
मनः कर्णौ च तृप्यन्ति यस्यैकेनापि विन्दुना ॥१०४

भवसागरमुत्तर्त्तुं यस्याकाङ्क्षास्ति चेतसि ।
आकर्णयतु चैतन्यचरित्रं श्रद्धयैव सः ॥१०५

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१०६

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे श्रीहरिदासनिर्य्याणं नामैकादशः परिच्छेदः ।

—०—

अन्त्यलीलायां द्वादशः परिच्छेदः

"श्रूयतां श्रूयतां नित्यं गीयतां गीयतां मुदा ।
चिन्त्यतां चिन्त्यतां भक्ताश्चैतन्यचरितामृतम् ॥१॥"

श्रीचैतन्यो मुहुर्जीयाज्जयतात् करुणामयः ।
नित्यानन्दः कृपासिन्धुर्जयताज्जयतादसौ ॥१

जयत्वद्वैतचन्द्रश्च जयतात् करुणाम्बुधिः ।
गौरभक्तगणो जीयात् करुणापूर्णमानसः ॥२

अतःपरं विषादेन विह्वलस्य महाप्रभोः ।
श्रीकृष्णविरहावस्था स्फुरति स्म निरन्तरम् ॥३

हा हा प्राणेश्वर श्रीमन् कृष्ण व्रजेन्द्रनन्दन ।
क यायां क लभेय त्वां मुरलीशोभिताननम् ॥४

इत्येवं दशया सोऽहर्निशमस्वस्थमानसः ।
रामानन्दस्वरूपाभ्यां कृच्छ्राद्रात्रिमयापयत् ॥५

इतो भक्ताश्च यावन्तः प्रभोर्गौड़निवासिनः ।
सर्वं एव प्रभुं द्रष्टुं गमनार्थं समुद्यताः ॥६
अद्वैताचार्य्यगोस्वामी शिवानन्दादयस्तथा ।
सर्वंभक्ता नवद्वीपमागत्यैकत्र सङ्गताः ॥७
कुलीनग्रामवास्तव्या ये च खण्डनिवासिनः ।
एकत्र मिलिताः सर्वे नवद्वीपमुपागताः ॥८
नित्यानन्दप्रभुस्तत्र निषिद्धगमनोऽपि सन् ।
द्रष्टुं गोस्वामिचैतन्यमभूत् प्रस्थातुमुद्यतः ॥६
चत्वारः श्रीनिवासाद्या मालिन्या सह सोदराः ।
गृहिण्या सममाचार्य्यरत्नश्चापि प्रतस्थिरे ॥१०
शिवानन्दस्य पत्नी च प्रतस्थे तनयैस्त्रिभिः ।
सज्जयित्वा च मञ्जूषां ययौ राघवपण्डितः ॥११
दत्तो गुप्त स्तथा विद्यानिधिश्चान्येऽखिला जनाः ।
भक्ताः प्रतस्थिरे तत्र ते द्वित्र-शतसंख्यकाः ॥१२
शचीमातरमालोक्य तस्या लब्ध्वा च सम्मतिम्
सानन्दं प्रस्थिताः सर्वे कुर्वन्तः कृष्णकीर्त्तनम् ॥१३
कृत्वा सेनशिवानन्दः शुल्कगुल्मव्यवस्थितिम् ।
पालयन् पथि तान् सर्वान् सुखेनैव निनाय सः ॥१४
सर्वेषां साधयन्नर्थान् वासस्थानं समादधे ।
ओड्रदेशीयमार्गेषु स एवासीद् विचक्षणः ॥१५
एकदाथ निरुद्धांस्तान् सर्वान् गुल्माधिकारिणा ।
मोचयित्वा शिवानन्द स्तत्रैकाकी स्वयं स्थितः ॥१६
ग्रामाभ्यन्तरमागत्य सर्वे वृक्षतले स्थिताः ।
अन्तरेण शिवानन्दं वासस्थानं न लेभिरे ॥१७
क्षुधया कातरीभूय नित्यानन्दप्रभुस्तदा ।
निवासस्थानमप्राप्य शिवानन्दं शशाप सः ॥१८

नाप्तोऽद्यापि शिवानन्दो म्रियतां तत् सुतत्रयम् ।
मृतोऽस्मि क्षुधया वासस्तेन मे नैव दापितः ॥१६
इत्याकर्ण्य शिवानन्दभार्य्यारभत रोदितुम् ।
तदैवासौ शिवानन्दोगुल्मस्थानादुपाययौ ॥२०
शिवानन्दस्य भार्य्याथ रुदती तमवोचत ।
गोस्वामी वासमप्राप्य शपत्यस्मत् सुतानिति ॥२१
स तामब्रूत वातूले रुदती म्रियसे कथम् ।
तस्यामङ्गलमादाय म्रियन्तां मे त्रयः सुताः ॥२२
इत्युक्त्वैव शिवानन्दे प्रभोः पार्श्वमुपागते ।
नित्यानन्दः समुत्थाय पद्भ्यामेवाजघान तम् ॥२३
तस्य पादप्रहारं स लब्ध्वा सानन्दमानसः ।
शीघ्रं न्यरूपयद्वासस्थानं गौड़गृहं गतः ॥२४
स प्रभुं पादयो र्नत्वा वासगेहं निनाय तम् ।
तस्य वासं व्यवस्थाप्य हृष्टो वक्तुं प्रचक्रमे ॥२५
अहमङ्गीकृतोऽद्यैव किङ्करो भवता परम् ।
प्रदत्तञ्च फलं योग्यं किङ्करायापराधिने ॥२६
इयं ते करुणा दण्डच्छद्मना दयसे जनम् ।
चरितं तव को बोद्धुं शक्नुयाद् भुवनत्रये ॥२७
ययोस्ते पादयो रेणु र्ब्रह्मणापि सुदुर्लभः ।
प्राप्ता तत्पादयोः स्पर्शमधमापि तनुर्मम ॥२८
सफलान्यद्य जातानि जन्मकर्मकुलानि मे ।
कृष्णभक्तिमहं धर्मकामार्थांश्चाद्य लब्धवान् ॥२६
इति श्रुत्वा प्रभु र्नित्यानन्दः सानन्दचेतसा ।
अभ्युत्थाय शिवानन्दं प्रेम्णालिङ्गितवानसौ ॥३०
आनन्देन शिवानन्दः सर्वकर्माणि साधयन् ।
वासायाचार्य्यमुख्यानां वैष्णवानां गृहं ददौ ॥३१

विपरीतं चरित्रं श्रीनित्यानन्दप्रभो र्यतः ।
पदाहत्यापि रोषेण कल्याणं प्रापयत् स तम् ॥३२
शिवानन्दस्वसुः पुत्रः सेनश्रीकान्तनामकः ।
मातुलस्य परोच्चे स एवमूचेऽभिमानतः ॥३३
मातुलो मम विख्यातः श्रीचैतन्यस्य पार्षदः ।
तमप्याहत्य पादाभ्यां गोस्वाम्येष प्रभूयते ॥३४
इत्युक्त्वा वालकः सोऽयं श्रीकान्तः प्रस्थितोऽग्रतः ।
सङ्गं विहाय सर्वेषां महाप्रभुमुपस्थितः ॥३५
कञ्चुकावृतगात्रं तं नमन्तं दण्डवत् प्रभुम् ।
गोविन्दः प्रोक्तवानादौ मुञ्च श्रीकान्न कञ्चुकम् ॥३६
प्रभुरूचे मनोदुःखादयं श्रीकान्त आगतः ।
नैनं किञ्चिदपि ब्रूहि करोत्वेष यथासुखम् ॥३७
वैष्णवानामथोदन्तं पृष्टो गोस्वामिना तदा ।
सेनश्रीकान्त एकैकं नाम तेषां न्यवेदयत् ॥३८
आगतोऽयं मनोदुःखादिति श्रुत्वा प्रभोर्वचः ।
सर्वज्ञः प्रभुरित्येतदनुमानेन स विदन् ॥३९
नैवोवाच शिवानन्दं पद्भ्यामाहतवानिति ।
अथ सर्वे समागत्य मिलिता स्तत्र वैष्णवाः ॥४०
पूर्ववन्निखिलै र्भक्तैर्मेलनं कृतवान् प्रभुः ।
दूरादेव स्त्रियः सर्वास्तमपश्यन्महाप्रभुम् ॥४१
सर्वेभ्यो दापयं स्तत्र वासगेहानि पूर्ववत् ।
प्रसादभोजनार्थं तान् सर्वानाहूतवान् प्रभुः ॥४२
शिवानन्दोऽथ पुत्रांस्त्रीन् गोस्वामिनमुपानयत् ।
प्रभुस्तस्यैव सम्पर्कात् सर्वेषु कृतवान् कृपाम् ॥४३
कनिष्ठं तत् सुतं दृष्ट्वा प्रभवे नाम पृच्छते ।
तन्नाम परमानन्ददास इत्यब्रवीदसौ ॥४४

इतः पूर्वं शिवानन्दः समायातः प्रभुं यदा ।
तदा महाप्रभुस्तस्मै वक्तुमेवं प्रचक्रमे ॥४५
अतःपरं कुमारो यस्तव जन्म ग्रहीष्यति ।
तस्य नाम पुरीदास इति संस्थापयिष्यसि ॥४६
अयं तावत् कुमारो हि मातुरासीत्तदोदरे ।
शिवानन्दे गृहं प्राप्ते तस्य जन्माभवत् किल ॥४७
परमानन्ददासेति कृतं नामाज्ञया प्रभोः ।
महाप्रभुः पुरीदास इत्युक्त्वोपजहास तम् ॥४८
शिवानन्देन वालोऽसौ प्रभुणा मेलितो यदा ।
तन्मुखे स्वपदाङ्गुष्ठं महाप्रभुरवेशयत् ॥४९
शिवानन्दस्य सौभाग्य-सिन्धोः पारं व्रजेन्नु कः ।
यस्य गोष्ठीजनान् सर्वानात्मीयानवदत् प्रभुः ॥५१
अथ सर्वान् समादाय भक्तान् प्रभुरभक्षयत् ।
अत आचम्य गोविन्दमेवमाज्ञापयत्तदा ॥५१
शिवानन्दस्य तिष्ठन्ति यावद्भार्य्या सुता इह ।
भुक्तावशेषपात्रं मे तावत्तैर्लभ्यतामिति ॥५२
नवद्वीपोषितो नाम्ना परमानन्दमोदकः ।
प्रभो र्गेहान्तिके गेहवासी मोदकविक्रयी ॥५३
वाल्यकाले प्रभुस्तस्य गेहं गच्छन् पुनः पुनः ।
दुग्ध-मोदकखण्डांश्च तेन दत्तानभक्षयत् ॥५४
वाल्यकालात् प्रभृत्येव स आसीत् स्नेहवान् प्रभौ ।
तस्मिन् वर्षे प्रभुं द्रष्टुं तत्र सोऽपि समागतः ॥५५
स परमेश्वरोऽस्मीति ब्रुवन्दण्डवदानमत् ।
तमालोक्य प्रभुः प्रीतः कुशलं परिपृष्टवान् ॥५६
त्वयागत्य कृतं साधु स्वस्ति ते परमेश्वर ।
आगतात्र मुकुन्दस्य मातेत्यब्रूत स प्रभुम् ॥५७

नाम मातुर्मुकुन्दस्य श्रुत्वा सङ्कुचितोऽपि सन् ।
तस्य प्रीतिमपेक्ष्यैव प्रभुरूचे न किञ्चन ॥५८
सरलः प्रश्रयोन्मत्तो वैदग्ध्यं न विवेद सः ।
इति तस्य गुणैरेभिः प्रापदन्तःसुखं प्रभुः ॥५६
पुरेवाथाखिलैर्भक्तैः समं सम्मार्ज्य गुण्डिचाम् ।
नर्त्तनं कृतवांस्तत्र रथस्याग्रे महाप्रभुः ॥६०
इष्टासु चतुरो मासान् सर्वयात्रासु ते स्ततः ।
प्रभुं निमन्त्रयामासु र्मालिनी प्रमुखाः स्त्रियः ॥६१
आनीतै र्वस्तुभिर्देशाद्बहुभिः प्रभुरोचकैः ।
पक्त्वा व्यञ्जनमन्नञ्च ता भिक्षां प्रभवे ददुः ॥६२
दिवसे भूयसीः क्रीड़ाः कृत्वा भक्तगणैः सह ।
रजन्यां कृष्णविच्छेदादरुदद्दुःखितः प्रभुः ॥६३
अथैवं बहुलीलाभि र्गते मासचतुष्टये ।
प्रतियानाय गौड़ाय भक्तानाजिज्ञपत् प्रभुः ॥६४
ततो निमन्त्रयामासुः सर्वे भक्ता महाप्रभुम् ।
प्रोवाचैवं प्रभुः सर्वांस्तान् भक्तान्मधुरं वचः ॥६५
यूयमायाथ सर्वेऽत्र द्रष्टुं मां प्रतिवत्सरम् ।
आयान्तः प्रतियान्तश्च बहून् क्लेशानवाप्नुथ ॥६६
निवारयितुमिच्छामि युस्मान् ज्ञात्वातिदुःखितान् ।
वर्द्धते हृदि मे लोभः किन्तु सङ्गसुखाय वः ॥६७
गौड़ एव निवासार्थं नित्यानन्दं व्यजिज्ञपम् ।
व्याहत्याज्ञां तमायातं किन्नु शक्नोमि भाषितुम् ॥६८
अयमाचार्य्यगोस्वामी प्राप्तः कृत्वा कृपां मयि ।
तत् प्रेमर्णेन बद्धोऽस्मि शोधनाय न च क्षमे ॥६६
दारपुत्रगृहादीनि त्यक्त्वा सर्वाणि मत्कृते ।
नानादुर्गममार्गान् स विलङ्घ्यैतीह सत्वरम् ॥७०

अहमत्र समासीनो वर्त्तें नीलाचले सुखम् ।
न कस्यापि कृते क्लेशलेशोऽपि मम विद्यते ॥७१
सन्न्यासिजन एवाहं नास्ति किञ्चिद्धनं मम ।
युष्माकं शोधयाम्येतदृणं किन्तु समर्पयन् ॥७२
धनं मे देह एवायं स मया वः समर्पितः ।
यत्र विक्रेतुमिच्छा व स्तत्र विक्रीयतामयम् ॥७३
इति वाचा प्रभोः सर्वे बभूवुः प्रीतचेतसः ।
अनर्गलाश्रुधाराभी रुरुदुः सर्व एव ते ॥७४
सर्वेषां कण्ठमालम्ब्य रोदनं कृतवान् प्रभुः ।
क्रन्दन्नेवाखिलान् भक्तानाशिश्लेष पृथक् पृथक् ॥७५
सर्व एव स्थितास्तत्र गन्तुं कोऽपि न चक्रमे ।
एवमेव व्यतीतानि पञ्चसप्तान्यहान्यथ ॥७६
ततोऽद्वैतावधूताभ्यामेवमूचे महाप्रभुः ।
प्रकृत्या ते गुणैः सर्वं जगद्विक्रीयते प्रभो ॥७७
पुनरेवं निबध्नासि कृपावचन-रज्जुभिः ।
कोनु कुत्र प्रयानाय शक्नोति त्वां त्यजन्निति ॥७८
सान्त्वयित्वैव तान् सर्वानथ भक्तान्महाप्रभुः ।
ततः प्रस्थापयामास स्वयं सुस्थिरमानसः ॥७९
नित्यानन्दमुवाच त्वं नागच्छेह पुनः पुनः ।
भविष्यति मया सार्द्धं तत्रैव तव सङ्गमः ॥८०
ततो रोरुद्यमानेषु सर्वेषु प्रस्थितेष्वथ ।
अवतस्थे विषादेन गृह एव महाप्रभुः ॥८१
अबध्नादखिलान् भक्तान् स्वानुकम्पागुणैः प्रभुः ।
महाप्रभोः कृपर्णं तत् कः शोधयितुमर्हति ॥८२
यथा यान्नर्त्तयत्येष स्वतन्त्रः प्रभुरीश्वरः ।
तेन ते निखिलं त्यक्त्वा यान्ति देशान्तरं जनाः ॥८३

लोकोऽयं नर्त्यते तेन शालभञ्जीव मायिना ।
ईश्वरस्य चरित्रं हि किञ्चिद् बोद्धुं न शक्यते ॥८४
दिदृक्षुर्जगदानन्दो मातरं परवत्सरे ।
गृहीत्वाथ प्रभोराज्ञां नवद्वीपपुरं गतः ॥८५
ववन्दे तत्र गत्वासौ शचीमातुः पदाम्बुजम् ।
ततस्तस्यै जगन्नाथप्रसादवसनं ददौ ॥८६
मातरं स प्रभोर्नाम्ना दण्डवत् प्रणनाम च ।
ततस्तां कथयामास प्रभोः सानुनयस्तुतिम् ॥८७
लब्ध्वा तं जगदानन्दं माता नन्दितचेतसा ।
तदुक्ताश्च प्रभोर्वार्त्ता संशुश्राव दिवानिशम् ॥८८
अब्रवीज्जगदानन्दो मातः प्रायः कदाचन ।
अत्रैव त्वामुपागत्य भोजनं कुरुते प्रभुः ॥८९
भुक्त्वात्र प्रभुरब्रूत तत्र सानन्दचेतसा ।
आकण्ठं पूरयित्वाद्य जननी मामभोजयत् ॥९०
तत्राहं यामि भुञ्जे च माता किन्तु न वेत्ति मे ।
तस्याः प्रत्यक्षमश्नामि सा स्वप्न इति मन्यते ॥९१
मातावादीदहं जातु पक्त्वा व्यञ्जनमुत्तमम् ।
मनसाभिलषाम्येवं निमाइ भक्षयत्विदम् ॥९२
स्वप्नो नूनं मया दृष्ट इति पश्चादवेदिषम् ।
ततः पुत्रमपश्यन्त्या अश्रुधारावहन्मम ॥९३
इत्येवं जगदानन्दः शचीमाता च तावुभौ ।
चैतन्यस्य कथां नक्तन्दिवमालेपतुः सुखम् ॥९४
सर्वे भक्ता नवद्वीपवासिनो मिलितास्ततः ।
जगदानन्दमासाद्य महानन्दं प्रपेदिरे ॥ये५
जगाम जगदानन्द आचार्येणाथ मेलितुम् ।
सोऽपि तं जगदानन्दं प्राप्य हृष्टमना अभूत् ॥९६

तं लब्ध्वा वासुदेवेन गुप्तेन च मुरारिणा ।
न मुक्तो जगदानन्दः सानन्दं स्थापितो गृहे ॥९७
शृण्वन्त स्तन्मुखात् सर्वे चैतन्यस्यान्तरीं कथाम् ।
बभूवु र्विस्मृतात्मानस्तत्कथासुखमोहिताः ॥९८
मेलितुं जगदानन्दो यैर्भक्तै स्तद्गृहं ययौ ।
ते विसस्मरुरात्मानमपि तस्य कथासुखात् ॥९९
धन्योऽसौ जगदानन्दश्चैतन्यप्रेमभाजनम् ।
सोऽमिलद् येन मेनेऽसौ चैतन्यं प्राप्तवानिति ॥१००
स शिवानन्दसेनस्य गृहं गच्छन्नवस्थितः ।
चन्दनादिकतैलञ्च पेचिवान् पूर्णमात्रया ॥१०१
सुगन्धीकृत्य तत्तैलं गर्गरीं तेन पूरयन् ।
सयत्नादरमादाय स नीलाचलमागतः ॥१०२
गोविन्दस्य समीपे तत्तैलं न्यस्य तमब्रवीत् ।
श्रीमदङ्गे प्रभोस्तैलं त्वयैतद्दीयतामिति ॥१०३
ततो निवेदयामास गोविन्दश्च महाप्रभुम् ।
चन्दनाद्याख्यतैलं हि जगदानन्द आनयत् ॥१०४
सोऽयमिच्छति यद्येतत् प्रभुर्गृह्णाति मूर्द्धनि ।
पित्तवायुप्रकोपस्य भवत्युपशमस्तदा ॥१०५
गौड़े पक्वा सुरभ्येतत्तैलं कलससम्भृतम् ।
इह तेन समानीतं भूयिष्ठैर्यतनैरिति ॥१०६
प्रभुणोक्तं न सन्न्यासी तैलाभ्यञ्जनमर्हति ।
तथाप्येतद्धि सौगन्ध्याद्भवेत् परमधिक्कृतम् ॥१०७
जगन्नाथाय तद्देहि तैलं दीपोज्ज्वलेद् यथा ।
परिश्रान्तिस्तथा तस्य गच्छेत् सफलतामिति ॥१०८
प्रभोर्वाक्यानि गोविन्दो जगदानन्दमब्रवीत् ।
श्रुत्वा तूष्णींभवन् किञ्चिन्नोक्तवान् स च पण्डितः ॥१०९

दशस्वहःसु यातेषु गोविन्दोऽजिज्ञपत् पुनः ।
प्रभोऽस्ति पण्डितस्येच्छा तत्तैलं गृह्यतामिति ॥११०
शृण्वन्नेवोक्तवान् किञ्चित् स क्रोधवचनं प्रभुः ।
अङ्गं मर्दयितुं संवाहक एको नियुज्यताम् ॥१११
अहमित्थं सुखं भोक्तुमस्मि सन्न्यासमाश्रितः ।
सर्वेषां वः परीहासः सर्वनाशाद्भवेन्मम ॥११२
लप्स्यते तैलगन्धं यो जनो मे गच्छतः पथा ।
कथयिष्यत्यसौ दारी सन्न्यासीति स मां प्रति ॥११३
इत्याकर्ण्य प्रभोर्वाक्यं गोविन्दो मौनमाश्रयत् ।
प्रभाते जगदानन्दः प्रभोः पार्श्वमुपागमत् ॥११४
प्रभुरूचे त्वयानीतं तैलं पण्डित गौड़तः ।
अहमस्मि तु सन्न्यासी ग्रहीतुं तैलमक्षमः ॥११५
जगन्नाथाय तद्देहि येन दीपो ज्वलिष्यति ।
तथा साफल्यमेष्यन्ति तव सर्वे श्रमा इति ॥११६
पण्डितोऽकथयत् कस्त्वामुक्तवाननृतं वचः ।
नाहमानीतवांस्तैलं गौड़देशात् कदाचन ॥११७
इत्युक्त्वासौ गृहात्तैल-पूर्णं कलसमानयन् ।
तमभाङ्क्षीद्विनिक्षिप्य चत्वरे पुरतः प्रभोः ॥११८
स तैलकलसं भङ्क्त्वा तत्पथेन गृहं गतः ।
कपाटं सार्गलीकृत्य शयानस्तत्र संस्थितः ॥११९
तृतीये दिवसे तस्य द्वारं गत्वा महाप्रभुः ।
उत्तिष्ठ पण्डितेत्युक्त्वा जगदानन्दमाह्वयत् ॥१२०
अद्य त्वं रन्धनं कृत्वा भिक्षान्नं मे प्रदास्यसि ।
आगमिष्यामि मध्याह्ने द्रष्टुं याम्यधुनेश्वरम् ॥१२१
इत्युक्त्वैव प्रभौ याते तत उत्थाय पण्डितः ।
स्नात्वा पपाच यत्नेन बहूनि व्यञ्जनानि सः ॥१२२

कृत्वा माध्याह्निकं कर्म प्रभुर्भोक्तुमथागतः ।
प्रक्षाल्य श्रीपदद्वन्द्वमासने समुपाविशत् ॥१२३
शाल्यन्नं सघृतं स्तूपीकुर्वता कदलीदले ।
समन्ताद्वल्कपात्राणि व्यञ्जनैः पूरितानि च ॥१२४
तुलसीमञ्जरी तेन न्यस्तान्नव्यञ्जनोपरि ।
जगन्नाथस्य पिष्टानि स्थापितान्यग्रतः प्रभोः ॥१२५
प्रभुणोक्तं द्वितीयेऽन्नव्यञ्जनं न्यस्य भाजने ।
युगपत्त्वमहञ्चाद्य करिष्यावोऽत्र भोजनम् ॥१२६
इत्युक्त्वा हस्तमुद्धृत्य न भुक्त्वा च प्रभौ स्थिते ।
पण्डितः कथयामास किञ्चित् सप्रेमभाषणम् ॥१२७
भवान् प्रसादमादत्तां मया पश्चाद् ग्रहीष्यते ।
आग्रहो भवतश्चैवं कथं वा खण्ड्यतां मया ॥१२८
इत्याकर्ण्य प्रभुर्भोक्तुं सुखेनैवोपचक्रमे ।
लब्ध्वा च व्यञ्जनास्वादं जगदानन्दमब्रवीत् ॥१२९
क्रोधाविष्टेन पक्वानां स्यादियान् स्वाद ईदृशः ।
त्वयि कृष्णप्रसादोऽयमित्येव ज्ञायते मया ॥१३०
भोक्ष्यते स्वयमेवेदं कृष्ण इत्येव कारणात् ।
सोत्कर्षं तव हस्तेन स एवैवमपाचयत् ॥१३१
समर्पयसि कृष्णाय त्वमन्नामृतमीदृशम् ।
तव सौभाग्यसीमाया वर्णनं किं करोम्यहम् ॥१३२
पण्डितः प्रत्युवाचाथ भोक्ष्यते यः स पाचकः ।
अहं साधन-सामग्री-समाहर्त्ता तु केवलम् ॥१३३
पण्डितेनोपनीतानि व्यञ्जनानि मुहुर्मुहुः ।
भयात् किञ्चिदनुक्त्वैव सहर्षं बुभुजे प्रभुः ॥१३४
साग्रहं भोजयामास पण्डितोऽथ महाप्रभुम् ।
अभूद्दशगुणं तस्य भोजनं दिवसान्तरात् ॥१३५

वारंवारमथोत्थातुमिच्छत्यपि महाप्रभौ ।
व्यञ्जनानि तमानीय पण्डितः पर्य्यवेषयत् ॥१३६
किञ्चिद्वक्तुमशक्तेन प्रभुणा भक्षितं भयात् ।
अभुक्ते जगदानन्द उपवासं करिष्यति ॥१३७
ततो विनय-सम्मानपूर्वमूचे महाप्रभुः ।
त्वया दशगुणं भोज्यं भोजितोऽस्मि समाप्यताम् ॥१३८
अथोत्थायासनात्तत्र कृताचामे महाप्रभौ ।
आनयत् पण्डितो माल्यं चन्दनं मुखवासकम् ॥१३९
गृहीत्वा चन्दनादीनि तत्रासीनोऽभवत् प्रभुः ।
अब्रवीच्च ममाग्रेऽद्य भोजनं क्रियतामिति ॥१४०
स प्रत्यूचे प्रभो गत्वा विश्रामं लभतां भवान् ।
मया कृत्यं समाधाय प्रसादो गृह्यतेऽधुना ॥१४१
रमाइ-रघुनाथाभ्यां पाके साहायकं कृतम् ।
किञ्चिद्व्यञ्जनमन्नञ्च ताभ्यां दित्साम्यहं पुनः ॥१४२
प्रभुरूचेऽथ गोविन्द त्वमत्रैव स्थितिं कुरु ।
पण्डितेऽथ कृताहारे गत्वा मां कथयिष्यसि ॥१४३
इत्येवं कथयित्वैव ततो याते महाप्रभौ ।
पण्डितो वचनं किञ्चिद् गोविन्दं तमवोचत ॥१४४
इतो याहि द्रुतं पादसंवाहनकृते प्रभोः ।
निषण्णः पण्डितो भोक्तुमिति तस्मै निवेदय ॥१४५
प्रभुभुक्तावशेषान्नं स्थाप्यते त्वत्कृते मया ।
भोक्ष्यसे त्वमिहागत्य गते निद्रां महाप्रभौ ॥१४६
रामा-नन्दाइ-गोविन्द-रघुनाथेभ्य एव सः ।
प्रददौ वण्टयंस्तेभ्यः शेषान्नव्यञ्जनं प्रभोः ॥१४७
प्रभुभक्षितशेषान्नं तस्मिन् भुक्तवति स्वयम् ।
तत्रैवं प्रेरयामास गोविन्दं प्रभुरादिशन् ॥१४८

दृश्यतां जगदानन्दः प्रसादं भुक्तवान्नवा ।
इति विज्ञाय तद्वार्त्तां शीघ्रं मे ज्ञाप्यतामिति ॥१४९
ददर्शागत्य गोविन्दः पण्डितं कृतभोजनम् ।
मुखात्तस्य तदाकर्ण्याशेत स्वच्छन्दतः प्रभुः ॥१५०
प्रेमैवं जगदानन्दे प्रावर्त्तत महाप्रभोः ।
कृष्णस्य सत्यभामायां श्रुतो भागवते यथा ॥१५१
जगदानन्दसौभाग्यसीमां कः कर्त्तुमर्हति ।
भुवने तस्य सौभाग्यं तद्भाग्येनैव तुल्यते ॥१५२
तामिमां जगदानन्दप्रेमलीलां शृणोति यः ।
वेत्ति प्रेम्णः स्वरूपं स प्रेमरत्नञ्च विन्दति ॥१५३
आशास्ते यः पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१५४

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे जगदानन्दतैलभञ्जनं नाम द्वादशः परिच्छेदः ।

—०—

अन्त्यलीलायां त्रयोदशः परिच्छेदः

"कृष्णविच्छेदजातार्त्या क्षीणे चापि मनस्तनू ।
दधाते फुल्लतां भावैर्यस्य तं गौरमाश्रये ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
अथैवं जगदानन्दं समादाय महाप्रभुः ।
सुखेनास्वादयत् प्रेमतरङ्गान् बहुधा तदा ॥२
कृष्णविच्छेदशोकेन क्षीण-काय-मना अपि ।
भावावेशात् कदाचित्तु प्रभुः प्रापत् प्रफुल्लताम् ॥३

रम्भावल्के शयानोऽसात्रमांसलतनुः प्रभुः ।
विव्यथे वल्ककाठिन्यसंस्पर्शादस्थिपञ्जरे ॥४
तथा दृष्ट्वाखिला भक्ता दुःखिता अपि भाषितुम् ।
न शेकु र्जगदानन्द उपायन्तूद्भावयत् ॥५
सूक्ष्मं वस्त्रमथानीय रञ्जयित्वा च गैरिकैः ।
स तदा शाल्मलीतूलैः पूरयामास तत् पुनः ॥६
तूलशय्योपधाने च गोविन्दस्य करे ददत् ।
अस्यां शायय शय्यायां प्रभुमित्युपदिष्टवान् ॥७
गोस्वामिनं स्वरूपञ्च जगदानन्द उक्तवान् ।
शय्यायां शाययत्वद्य प्रभु' गत्वा भवानिति ॥८
स्वरूपेऽवस्थिते तत्र शयनावसरे प्रभोः ।
तूलशय्योपधाने ते दृष्ट्वा क्रुद्धोऽभवत् प्रभुः ॥९
गोविन्दं पृष्टवान् कोऽयमेतत् कारितवानिति ।
जगदानन्द इत्याख्यां श्रुत्वा सङ्कुचितोऽभवत् ॥१०
तत्तूलशयनं दूरं गोविन्देनापसारयन् ।
कदलीवल्कलेष्वेव शयनं कृतवात् प्रभुः ॥११
स्वरूपेणोक्तमिच्छा ते, किं कर्त्तुं पारयाम्यहम् ।
शयनोपेक्षया दुःखं महत् प्राप्स्यति पण्डितः ॥१२
प्रभुरूचेऽथ खट्वैकानीयतां पातनाय तु ।
विषयान् जगदानन्दो मां भोजयितुमिच्छति ॥१३
सन्न्यासी जन एवास्मि शय्या भूतलमेव मे ।
खट्वाशय्योपधानं क्व मुण्डितं मस्तकं क्व वा ॥१४
ततः स्वरूपगोस्वासी समेत्योवाच पण्डितम् ।
तच्छ्रुत्वा जगदानन्दो महादुःखमना अभूत् ॥१५
अथ स्वरूपगोस्वामी तदोपायं विचिन्तयन् ।
कदलीशुष्कपत्राणि सुबहूनि समानयत् ॥१६

छित्त्वा छित्त्वा नखैस्तानि सूक्ष्माणि कृतवानसौ ।
प्रभोरधिवहिर्वासस्तानि सर्वाण्यपू पुरत् ॥१७
एवमेव चकारासौ पातनाच्छादने उभे ।
भूयो यत्नातिरेकेण प्रभुणाग्राहयच्च ते ॥१८
सर्वे दृष्ट्वा प्रभुं तत्र शयानं सुखिनोऽभवन् ।
केवलं जगदानन्दो वहिरन्तरदूयत ॥१९
पुरासीज्जगदानन्दो गियासु मथुरां प्रति ।
प्रभुणानभ्यनुज्ञातः प्रस्थातुं नाशकत्ततः ॥२०
अप्रकाशयता तेन वहिर्दुःखं मनोगतम् ।
प्रयास्यन्मथुरामाज्ञां महाप्रभुरयाच्यत ॥२१
प्रभुणोचे स कुप्यन् मे मथुरां त्वं गमिष्यसि ।
मयि दूषणमारोप्य भिक्षुकश्च भविष्यसि ॥२२
प्रत्यूचे जगदानन्दो गृहीत्वा चरणौ प्रभोः ।
चिरात् प्रभृति काङ्क्षामि गन्तुं वृन्दावनं प्रति ॥२३
अलब्ध्वा तु प्रभोराज्ञां प्रस्थातुं न समर्थये ।
इदानीमनुमन्यस्व तत्र यास्यामि निश्चितम् ॥२४
प्रभुः प्रेमवशात्तस्य गमनं नान्वमन्यत ।
सोऽप्याज्ञां प्रार्थयामास भूयोभूयो महाप्रभुम् ॥२५
अथ स्वरूपगोस्वामी पण्डितेन निवेदितः ।
वर्त्तते मे चिरादेव गन्तुं वृन्दावनं मनः ॥२६
अन्तरेण प्रभोराज्ञां न गन्तुं पारयाम्यहम् ।
नाधुनाप्यनुजानाति याहीत्याह रुषा प्रभुः ॥२७
स्वभावादेव मे तत्र मनो गन्तुं प्रवर्त्तते ।
तस्याज्ञां विनयाद् गृह्णन् भवान् मह्यं ददात्विति ॥२८
श्रुत्वा स्वरूपगोस्वामी प्रभुपादमवोचत ।
ईहते जगदानन्दो गन्तुं वृन्दावनं भृशम् ॥२९

अतएव तवादेशं भूयो भूयः प्रयाचते ।
देह्याज्ञां मथुरां दृष्ट्वा प्रत्यागच्छत्वसौ सकृत् ॥३०
दर्शनार्थं यथाब्दीया गौड़देशं स गच्छति ।
सकृद् वृन्दावनं दृष्ट्वा प्रत्यायातु तथैव सः ॥३१
इति स्वरूपगोस्वामिवचसाज्ञां प्रभुर्ददौ ।
जगदानन्दमाहूय शिक्षयामास चादरात् ॥३२
आवाराणसि सच्छन्दं पथैव त्वं गमिस्यसि ।
क्षत्रियादिजनैः सार्द्धं सावधान स्ततोऽग्रतः ॥३३
बध्नन्त्येकाकिनो गौड़ान् मुषित्वा वाटतस्कराः ।
बद्ध्वा लुण्ठन्ति सर्वस्वं रुन्धन्तो न त्यजन्ति तान् ॥३४
समं सनातनेनैव मथुरां प्राप्य वत्स्यसि ।
तत्रत्यान् स्वामिनः सर्वान् भक्त्या वन्दिष्यसेऽन्वहम् ॥३५
न तु स्थास्यसि तैः सार्द्धं दूराद्भक्तिं करिष्यसि ।
तेषामाचारचेष्टानां मर्म बोद्धुं न शक्ष्यसि ॥३६
वनानीक्षिष्यसे तत्र समादाय सनातनम् ।
क्षणमेकमपि त्याक्षीर्मा सङ्गं तस्य निश्चितम् ॥३७
प्रत्यावर्त्तिष्यसे शीघ्रं चिरं तत्र न वत्स्यसि ।
मा गोवर्द्धनमारोह तत्र गोपालमीक्षितुम् ॥३८
अहमप्येमि तत्रेति विज्ञापय सनातनम् ।
यथासौ मत्कृते तत्र स्थानमेकं करोत्विति ॥३९
उक्त्वैवं जगदानन्दमाशिश्लेष महाप्रभुः ।
वन्दमानः प्रभोः पादौ ततः प्रस्थितवान् स च ॥४०
अथासौ सकलान् भक्तांस्तत्र सम्प्रार्थ्य सम्मतिम् ।
व्रजन् वन-पथेनैव वाराणस्यामुपस्थितः ॥४१
तेन तपनमिश्रश्च मिलितश्चन्द्रशेखरः ।
तावुभौ च प्रभोर्वार्त्तां श्रुतवन्तौ ततोऽखिलाम् ॥४२

मथुरां शीघ्रमागत्य प्राप्तवान् स सनातनम् ।
तावथान्योन्य-सङ्गेन ननन्दतुरुभावपि ॥४३
वनान्यदर्शयत्तस्मै द्वादशैव सनातनः ।
ततो महावनं दृष्ट्वा गोकुलेऽवसतामुभौ ॥४४
सनातनगुहागेहे वसन्नेकत्र पण्डितः ।
ततो देवालयं गत्वा तत्रान्नं पचति स्म च ॥४५
सनातनोऽकरोद् भिक्षां गत्वा नित्यं महावनम् ।
देवतामन्दिरे जातु जातु वा ब्राह्मणालये ॥४६
सनातनोऽखिलानर्थान् पण्डितस्य समादधत् ।
भिक्षित्वोपानयद् भोज्यं पानीयञ्च महावनात् ॥४७
एकदा जगदानन्दो निमन्त्र्य श्रीसनातनम् ।
रन्धनं कर्त्तुमारेभे नित्यकृत्यं समापयन् ॥४८
महात्मा कोऽपि सन्न्यासी श्रीमुकुन्दसरस्वती ।
नाम्नैकं स वहिर्वासः सनातनाय दत्तवान् ॥४९
वाससा तेन मूर्द्धानं बध्नन्नेव सनातनः ।
अभ्येत्य जगदानन्दं तद्गेहद्वार्य्युपाविशत् ॥५०
लोहितं वस्त्रमालोक्य प्रेमाविष्टोऽथ पण्डितः ।
महाप्रभोः प्रसादोऽयमिति निश्चित्य पृष्टवान् ॥५१
एतत्त्वं लोहितं वस्त्रं कुतोऽसि प्राप्तवानिति ।
सरस्वतीमुकुन्दोऽदादित्युवाच सनातनः ॥५२
पण्डितस्तु तदाकर्ण्य जातदुःखेन चेतसा ।
अन्नस्थालीं करे कुर्वन् तमाहन्तुमुपाययौ ॥५३
ज्ञात्वा तस्य मनोभावं लज्जमाने सनातने ।
चुल्ल्यामारोपयन् स्थालीं वक्तुमेवं प्रचक्रमे ॥५४
सर्वेषां पार्षदानां त्वं वरिष्ठोऽसि महाप्रभोः ।
अपरः कोऽपि नास्त्येव तव तुल्यः प्रभोः प्रियः ॥५५

वस्त्रं सन्न्यासिनोऽन्यस्य मस्तकेन धृतं त्वया ।
य एतत् क्षमते सोढ़ुं तादृशः को नु वर्त्तते ॥५६
ततः सनातनेनोक्तं महात्मन् साधुपण्डित ।
त्वया तुल्यः प्रियः कोऽपि चैतन्यस्य न विद्यते ॥५७
एतादृशी हि चैतन्यनिष्ठा त्वय्येव युज्यते ।
न तां दर्शयसि त्वञ्चेत् कथं शिक्षामहे वयम् ॥५८
यदेवेक्षितुकामोऽहं बद्धवान् वाससा शिरः ।
अपूर्वं तव तत्प्रेम प्रत्यक्षं दृष्टवानहम् ॥५९
वैष्णवेनारुणं वस्त्रं परिधातुं न युज्यते ।
किं ममानेन कस्मैचिद्दास्यामीदं प्रवासिने ॥६०
पक्त्वाथ जगदानन्दश्चैतन्याय न्यवेदयत् ।
तत्प्रसादमगृह्णीतामासीनौ तत्र तावुभौ ॥६१
भुक्त्वा प्रसादमन्योन्यं गाढ़मालिङ्गतामुभौ ।
ततश्चैतन्यविच्छेदशोकाच्च क्रन्दतुः पुनः ॥६२
द्वौ मासौ जगदानन्द एवं वृन्दावने वसन् ।
श्रीचैतन्यस्य विच्छेददुःखं सोढुं न चक्षमे ॥६३
महाप्रभोश्च सन्देशमब्रवीत् स सनातनम् ।
अहमप्येमि तत्स्थानमेकं वासाय कुर्व्विति ॥६४
पण्डिते जगदानन्दे यात्राज्ञामथ याचति ।
उपहारान् ददौ कांश्चित् प्रभोरर्थे सनातनः ॥६५
रासस्थलस्य धूलीश्च शिलां गोवर्द्धनस्य च ।
गुञ्जामाला स्तथा पक्क-शुष्क-पीलुफलानि च ॥६६
तान्यादाय प्रतस्थेऽसौ जगदानन्दपण्डितः ।
प्रतिप्रस्थापयंस्तञ्च व्याकुलोऽभूत् सनातनः ॥६७
विचार्य्य स्थानमेकं स निश्चिकाय प्रभोः कृते ।
द्वादशादित्यभूभागे मठमेकं स लब्धवान् ॥६८

तच्च स्थानमुपस्कृत्य स्थापयामास यत्नतः ।
मठस्याग्रे च गोस्वामी निर्मायोटजमावसत् ॥६६
सत्वरं जगदानन्दे प्राप्ते नीलाचलं ततः ।
प्रभुः परममानन्दं प्राप भक्तगणैः सह ॥७०
वन्दमानः प्रभोः पादौ स भक्तैः समगच्छत ।
महाप्रभुश्च तं प्रेम्णा निविड़ं परिरब्धवान् ॥७१
सनातनस्य विज्ञाप्य प्रभवे दण्डवन्नतिम् ।
पण्डितो वालुकादीनि रासस्थल्या उपानयत् ॥७२
सर्ववस्तूनि संस्थाप्य प्रभुः पीलूनि वण्टयन् ।
वृन्दावनफलानीति दत्त्वा हृष्टश्च भुक्तवान् ॥७३
ये विज्ञाश्चूषयन्ति स्म ते तदष्ठीनि केवलम् ।
अनभिज्ञास्तु गौड़ीयाश्चर्वन्तस्तान्यभक्षयन् ॥७४
कटुस्वादान्मुखे लाला जिह्वायाः परिसुस्रवुः ।
वृन्दावनस्य पीलूनां भक्षणं कौतुकावहम् ॥७५
आयातो जगदानन्द इति सर्वे मुदं गताः ।
एवं प्रादुरभून्नीलाचले लीला महाप्रभोः ॥७६
प्रभुर्यमेश्वरोद्यानं गच्छन्नासीद् यदैकदा ।
देवदासी तदा काचिद् गीतिं गातुं प्रचक्रमे ॥७७
आसीना मन्दिरालिन्दे गुर्जरीरागसङ्गतम् ।
जगौ सा गीतगोविन्दपदं सुमधुरस्वरम् ॥७८
सुदूराद् गीतमाकर्ण्य प्रेमावेशान्महाप्रभुः ।
गायति स्त्री पुमान् वेति विशेषं नाववुद्धवान् ॥७६
आवेशवशतो धावं स्तेनैव सह मेलितुम् ।
पथि स्नुही-वृति-च्छिन्न-चरणोऽप्यगमत् प्रभुः ॥८०
कण्टकाङ्कुर-विद्धाङ्गमात्मानं बुबुधे न सः ।
गोविन्दोऽनुययौ धावंस्तमतित्वरयाकुलः ॥८१

प्रभुं धावन्तमालोक्य स्त्रियश्चादूरसंस्थिताम् ।
गोविन्दो गायति स्त्रीति वदंस्तं वक्षसाग्रहीत् ॥८२
स्त्रीनामाकर्णयन्नेव वाह्यसंज्ञीभवन् प्रभुः ।
ततो भूयः परावृत्य तेनैव प्रस्थितः पथा ॥८३,
प्रभुरूचेऽद्य गोविन्द प्राणा मे रक्षितास्त्वया ।
सञ्जाते रमणीस्पर्शेऽभविष्यन्मृत्युरेव मे ॥८४
ऋणमेतन्न शक्ष्यामि प्रतिदातुमहं तव ।
अरक्षत्त्वां जगन्नाथः कोऽहं तुच्छ इति ब्रुवन् ॥८५
गोविन्दः प्रभुणादिष्टः स्थास्यस्येव मया सह ।
रक्षणे मम सर्वत्र सावधानो भविष्यसि ॥८६
इत्युक्त्वा च परावृत्य निजवासं गते प्रभौ ।
तदाकर्ण्य स्वरूपाद्याः सञ्जाता भीतमानसाः ॥८७
इतस्तपनमिश्रस्य तनयो रघुनाथकः ।
भट्टाचार्य्यस्त्यजन् सर्वं कर्म द्रष्टुं प्रभुं ययौ ॥८८
असौ प्रस्थितवान् काश्या गौड़देशपथं श्रयन् ।
तेन सार्द्धं प्रतस्थे च सेवकः पेटकं वहन् ॥८९
विश्वासो रामदासाख्यस्ताभ्यां सम्मिलितः पथि ।
विश्वासभाजनं राज्ञो विश्वासालयकर्मकृत् ॥९०
सर्वशास्त्रप्रवीणोऽसौ काव्यप्रकाशशिक्षकः ।
रामचन्द्रमुपासीनः सोऽभूत् परमवैष्णवः ॥९१
राममन्त्रं जजापासावष्टौ यामान् दिवानिशम् ।
सर्वं त्यक्त्वा जगन्नाथं द्रष्टुं सोऽप्यचलत्तदा ॥९२
स रघुनाथभट्टेन सार्द्धं सम्मिलितः पथि ।
ययौ भट्टस्य मञ्जूषां शिरसा स्वेन संवहन् ॥९३
बहुधासौ सिषेवे तं तत्पादौ समवाहयत् ।
अतोऽस्य रघुनाथस्य मनः सङ्कोचमागमत् ॥९४

महाभागवतोऽसि त्वं पण्डितश्च महाजनः ।
मा मां सेवस्व गच्छ त्वं सुखेनैव मया समम् ॥६५
प्रत्यूचे रामदासेन जात्या शूद्रोऽस्मि चाधमः ।
मदीयो निजधर्मोऽयं ब्राह्मणानां हि सेवनम् ॥६६
नैव त्वं कुरु सङ्कोचं दासोऽहं तव निश्चितम् ।
भवन्तं सेवमानस्य हर्षो मे जायते हृदि ॥६७
इत्युक्त्वा सोऽवहत् पेड़ां सिषेवे बहुधा च तम् ।
अजपत्तारकं मन्त्रं रघुनाथस्य सर्वदा ॥६८
एवं नीलाचलं भट्टरघुनाथः समागतः ।
गत्वा महाप्रभोः पादौ मिलितः सकुतूहलम् ॥६६
प्रणमन्दण्डवद् भट्टः पपात प्रभुपादयोः ।
रघुनाथ इति ज्ञात्वा तमाश्लिष्यन्महाप्रभुः ॥१००
मिश्र-शेखरयोस्तेन प्रणिपाते निवेदिते ।
पृष्ट्वा वार्त्तां तयोः सर्वां तमवादीन्महाप्रभुः ॥१०१
साधु वृत्तं त्वमायातः पश्य कमललोचनम् ।
प्रसादभोजनन्त्वद्य ममात्रैव करिष्यसि ॥१०२
अथ गोविन्दमादिश्य तस्मै वासं प्रदाप्य च ।
स्वरूपप्रमुखै र्भक्तै र्मेलयामास तं प्रभुः ॥१०३
इत्थं मासाष्टकं तस्थौ प्रभुणा सममेव सः ।
उल्लासो ववृधे तस्य प्रत्यहं कृपया प्रभोः ॥१०४
प्रभुं निमन्त्रयामास रघुनाथोऽन्तरान्तरा ।
स्वगृहेऽण्णं विचित्राणि व्यञ्जनानि च पक्कवान् ॥१०५
भट्टः श्रीरघुनाथस्तु रन्धने निपुणोऽभवत् ।
यत् पपाच तदेवाभूदमृतेन समं खलु ॥१०६
प्रभुः परम-सन्तोषात् कृतवांस्तत्र भोजनम् ।
भक्ष्यं भट्टस्य तत्पात्रावशेषान्नं बभूव च ॥१०७

प्रथमं रामदासोऽसौ प्रभुणा मिलितो यदा ।
नाधिकां करुणां तस्मिन् स चकार प्रभुस्तदा ॥१०८
अन्तर्मुमुक्षुमेवामुं विद्यागर्वितमानसम् ।
अजानात् सर्वचित्तज्ञः सर्वज्ञो भगवान् प्रभुः ॥१०६
रामदासो वसन्नीलाचलेऽध्यापितवांस्तदा ।
ग्रन्थं काव्यप्रकाशाख्यं पठ्नायकवंशजान् ॥११०
मासानष्टौ स्थितं भट्टं प्रेरयिष्यन् गृहं प्रभुः ।
विवाहो नैव कर्त्तव्यस्त्वयेत्येवं न्यवारयत् ॥१११
इतो गत्वा गृहं वृद्धौ सेवस्व पितरौ सदा ।
वैष्णवादेव चाधीष्व श्रीमद्भागवतं मुदा ॥११२
सकृन्नीलाचलं धाम पुनरप्यागमिष्यसि ।
इत्युक्त्वा प्रभुणा कण्ठमाला तस्य गलेऽर्पिता ॥११३
परिरभ्य प्रभुर्भट्टं गमनाय यदादिशत् ।
तदा रोदितुमारेभे भट्टश्च प्रेमविह्वलः ॥११४
स्वरूपप्रमुखान् भक्तान् याचित्वानुमतिं ततः ।
प्राप्य चाज्ञां प्रभोर्वाराणसीं भट्टः समागमत् ॥११५
गृहे चत्वारि बर्षाणि सिषेवे पितरावसौ ।
श्रीभागवतमध्यैष्ट तत्र वैष्णव-पण्डितात् ॥११६
काशीप्राप्तौ ततः पित्रोः स उदासीनमानसः ।
त्यक्त्वा गेहादिकं सर्वमुपागच्छत् पुनः प्रभुम् ॥११७
प्रभुपादान्तिके मासानष्टौ तं पूर्ववत् स्थितम् ।
अभ्युनुज्ञापयामास गमनाय पुनः प्रभुः ॥११८
इतो बृन्दावनं गच्छ रघुनाथ ममाज्ञया ।
तत्र गत्वा वस प्रान्ते श्रीसनातनरूपयोः ॥११९
पठ भागवतं कृष्णनाम नित्यं गृहाण च ।
अचिराद् भगवान् कृष्णः करिष्यति कृपां त्वयि ॥१२०

इत्युक्त्वा प्रभुणा भट्टो गाढ़मालिङ्गितस्तदा ।
कृष्णप्रेम्णा प्रमत्तोऽभूत् कृपया च महाप्रभोः ॥१२१
देवस्य तुलसीमाला प्रभुणाप्ता महोत्सवे ।
चतुर्दशकरा शुद्धताम्बूलवीटिकाश्च याः ॥१२२
तास्तस्मै प्रभुणा दत्ता मालाताम्बूलवीटिकाः ।
इष्टदेव इति ज्ञात्वा मालां भट्टो गलेऽग्रहीत् ॥१२३
प्रभोरादेशमादाय स वृन्दावनमागतः ।
सनातनञ्च रूपञ्च समुपेत्य समाश्रयत् ॥१२४
स भागवतमध्यैष्ट रूपगोस्वामि-संसदि ।
पठन् भागवतं प्रेम्णा द्रवीभूत-मना अभूत् ॥१२५
अभवंस्तस्य कम्पाश्रुगद्‌गदाः कृपया प्रभोः ।
वाष्परुद्धात्तिकण्ठोऽसौ पठितुं नैव चक्षमे ॥१२६
पिककण्ठ-स्वरश्चासौ नानारागांश्च मूर्च्छयन् ।
पठंश्चैकमपि श्लोकं द्वित्रिर्वावर्त्तयत् पुनः ॥१२७
पठन् शृण्वंश्च कृष्णस्याद्भुतसौन्दर्य्य-माधुरीम् ।
अभवद्विह्वलः प्रेम्णा बुबुधे न च किञ्चन ॥१२८
गोविन्द-चरणद्वन्द्वारविन्द-प्राण-सम्पदा ।
आत्मा समर्पितस्तेन श्रीगोविन्दपदाम्बुजे ॥१२९
स्वशिष्यं कारयामास श्रीगोविन्दस्य मन्दिरम् ।
मुरली-कुण्डलादीनि भूषणान्यप्यदापयत् ॥१३०
ग्राम्यवार्त्तां न शुश्राव न बभाषे च जिह्वया ।
निणाय प्रहरानष्टौ कृष्ण-पूजा-कथादिभिः ॥१३१
न च जग्राह कर्णाभ्यां वैष्णवान्निन्द्यकर्मणः ।
सर्वे कृष्णं भजन्तीति केवलं ज्ञातवानसौ ॥१३२
लीला-मनन-काले स तां मालां प्रभुणार्पिताम् ।
प्रसाद-वाससा सार्द्धं निजकण्ठे बबन्ध च ॥१३३

कृष्णप्रेमाभवत्तस्य निर्बाधः कृपया प्रभोः ।
इति तावन्मया प्रोक्तं चैतन्यस्य कृपाफलम् ॥१३४
गोकुले जगदानन्दगमनं कथितं मया ।
देवदास्याश्च सङ्गीतश्रवणं तत्तदन्तरा ॥१३५
रघुनाथस्य च प्रेम तत् कृपायाः फलं प्रभोः ।
एकत्रैव परिच्छेदे सर्वथोक्तं कथात्रयम् ॥१३६
श्रूयेरन् श्रद्दधानेन येनैता निखिलाः कथाः ।
कृष्णप्रेमधनं तस्मै दद्याद् गौरहरिः स्वयम् ॥१३७
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥१३८

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे जगदानन्द-वृन्दावन-गमनं नाम त्रयोदशः परिच्छेदः ।

—०—

अन्त्यलीलायां चतुर्दशः परिच्छेदः

"कृष्णविच्छेदविभ्रान्त्या मनसा वपुषा धिया ।
यद्यद्व्यधत्त गौराङ्ग स्तल्लेशः कथ्यतेऽधुना ॥१॥"
स विजेजीयतां श्रीमच्चैतन्यो भगवान् स्वयम् ।
निजभक्तगणप्राणो गौरचन्द्रो जयत्वलम् ॥१
चैतन्यजीवनो नित्यानन्दो जेजीयतां प्रभुः ।
जयत्वद्वैत आचार्यो गौरप्रेष्ठो जयत्वसौ ॥२
ते श्रीवास-स्वरूपाद्याः प्रभोर्भक्ता जयन्तु च ।
सर्वे मे दीयतां शक्तिश्चैतन्यं वर्णये यया ॥३
श्रीकृष्णविरहोन्मादः सुगम्भीरो महाप्रभोः ।
न धीरैरपि शक्योऽभूदुपलब्धुं कथञ्चन ॥४

अवबोद्धुमशक्यं यत् कस्तद् वर्णयितुं क्षमः ।
चैतन्यः शक्तिदो यस्य स विद्याद् वर्णयेदपि ॥५

श्रीमत्स्वरूपगोस्वामी दासश्च रघुनाथकः ।
लीलां व्यवृणुतामेतां कड़चापुस्तकद्वये ॥

तदानीमवतस्थाते द्वाविमावन्तिके प्रभोः ।
दूरदेशस्थिताः सर्वे कड़चा-कारिणोऽपरे ॥७

द्वाभ्यामाभ्यां प्रभोर्भावमनुभूय प्रतिक्षणम् ।
संक्षेपेण विवृण्वद्भ्यां कड़चारचना कृता ॥८

स्वरूपः सूत्रकारोऽत्र रघुनाथश्च वृत्तिकृत् ।
तद्व्याख्या पञ्जिका-टीका-तुल्या विस्तीर्य्यते मया ॥९

तत्र विश्वासमाधाय श्रूयतां भाववर्णनम् ।
ततो विज्ञास्यते भावः प्रेमरत्नञ्च लप्स्यते ॥१०

प्रयाते मथुरां कृष्णे दशा गोप्या बभूव या ।
कृष्ण-विच्छेद-दुःखेन सा दशाजायत प्रभोः ॥११

विललाप यथा राधा श्रीमदुद्धव-दर्शनात् ।
क्रमेनैव तथोन्माद-विलापं कृतवान् प्रभुः ॥१२

सर्वदा राधिका-भावमभिमेने महाप्रभुः ।
आत्मानं तेन भावेन राधिकेति विवेद सः ॥१३

दिव्योन्मादाद्भवत्येवं वर्त्तते कोऽत्र विस्मयः ।
दिव्योन्माद-प्रलापः स्याद् यतोऽधिरूढ़भावतः ॥१४

"तथाह्युज्ज्वलनीलमणौ स्थायिभावप्रकरणे सप्तत्रिंशदधिकशततमः श्लोकः—

एतस्य मोहनाख्यस्य गतिं कामप्युपेयुषः ।
भ्रमाभा कापि वैचित्री दिव्योन्माद इतीर्य्यते ।
उद्घूर्णा-चित्र-जल्पाद्यास्तद्भेदा बहवो मताः ॥२॥"

शय्यायामेकदा निद्रां गच्छन्नासोन्महाप्रभुः
रासलीलां प्रकुर्वन्तं कृष्णं स्वप्ने ददर्श च ॥१५
त्रिभङ्गीसुन्दराकारं मुरलीशोभिताननम् ।
कन्दर्पमोहनं पीताम्बरं तं वनमालिनम् ॥१६
नृत्यन्ती मण्डलावृत्त्या निखिलास्तत्र गोपिकाः ।
अन्तरा राधया सार्द्धं नृत्यन्तं नन्द-नन्दनम् ॥१७
पश्यंस्तेन रसेनैव भावाविष्ट-मनाः प्रभुः ।
अद्य वृन्दावने कृष्णं प्राप्तोऽस्मीत्यवबुद्धवान् ॥१८
चिरयन्तं प्रभुं दृष्ट्वा तं गोविन्दोऽजजागरत् ।
जाग्रदेव विदन् स्वप्नं दुःखितोऽभून्महाप्रभुः ॥१९
देहाभ्यास-वशेनैव नित्यकृत्यं समाप्य सः ।
व्यलोकयज्जगन्नाथं यथाकालमुपस्थितः ॥२०
स्थितेऽनुगरुड़-स्तम्भं वीक्षमाने महाप्रभौ ।
लक्षशो मनुजास्तत्र ददृशुः पुरतः प्रभोः ॥२१
ओड्रीया रमणी कापि जनतान्तर्हितेक्षणा ।
अपश्यद् गरुड़स्तम्भात् स्कन्धे न्यस्तपदा प्रभोः ॥२२
तथा दृष्ट्वैव गोविन्दो न्यषेधीत्तां ससम्भ्रमम् ।
तच्चैवं वारयामास प्रभुस्तदवरोपणात् ॥२३
रे कुक्षणज मामैवं नारीमेतां निवारय ।
यथा कामं करोत्वेषा श्रीजगन्नाथदर्शनम् ॥२४
अथासाववरुह्यैव भुवं साध्वससत्वरम् ।
दृष्ट्वा महाप्रभुं तस्य ववन्दे चरणौ तदा ॥२५
तस्या आर्त्तिं प्रभुर्दृष्ट्वा वक्तुमेवं प्रचक्रमे ।
मह्यमेतावतीमार्त्तिं जगन्नाथो न दत्तवान् ॥२६
जगन्नाथ-समाविष्ट-तनु-प्राण-मना इयम् ।
स्कन्धे मे न्यस्तपादापि न किञ्चिदवगच्छति ॥२७

अहो भाग्यवती सेयं वन्देऽस्याश्चरणावहम् ।
भवेदस्याः प्रसादेन यदि मेऽप्यार्त्तिरीदृशी ॥२८

प्रथमं प्रभुरागत्य जगन्नाथं विलोकयन् ।
अमन्यत जगन्नाथं साक्षाद् व्रजेन्द्रनन्दनम् ॥२९

स्वप्नसन्दर्शनावेशात्तथाभूतमनाः प्रभुः ।
यं यमालोकयत् सर्वं वंशीवदनमन्वभूत् ॥३०

तां नारीमधुना दृष्ट्वा बाह्यसंज्ञां गतः प्रभुः ।
जगन्नाथं सुभद्राञ्च बलरामञ्च दृष्टवान् ॥३१

मन्यमानः कुरुक्षेत्रे श्रीकृष्णं दृष्टवानिति ।
क्व प्राप्तोऽस्मि कुरुक्षेत्रं क्व तद्वृन्दावनं गतम् ॥३२

इति व्यग्रमना भूत्वा लब्धरत्नं प्रणाशयन् ।
समायातो निजावासं विषण्णहृदयः प्रभुः ॥३३

ततो भूतल आसीनः स्वनखेनालिखत् क्षितिम् ।
न च वीक्षितवान किञ्चिदश्रुगङ्गाप्लुतेक्षणः ॥३४

मया वृन्दावनस्वामी प्राप्तो भूयः प्रणाशितः ।
को नु मे हृतवान् कृष्णं क्वाहमागतवानिति ॥३५

स्वप्नसन्दर्शनावेशात् प्रेम्णोद्वेलमनाः प्रभुः ।
बाह्यसंज्ञां गतो मेने धनं नष्टमिवात्मनः ॥३६

कदाचित् कृतवान् गीतं नृत्यञ्चोन्मादवानिव ।
देहस्यैव स्वभावेन विदधे स्नानभोजने ॥३७

रामानन्दं स्वरूपञ्च रात्रिकाले समागते ।
आत्मनो मानसीं वार्त्तामुद्घाट्याकथयत् प्रभुः ॥३८

"तथाहि गोस्वामिपादोक्तः श्लोकः—

प्राप्त-प्रणष्टाच्युत-वित्त आत्मा
ययौ विषादोज्झित-देह-गेहः ।

गृहीतकापालिकधर्मको मे
बृन्दावनं सेन्द्रिय-शिष्यबृन्दः ॥३॥

यथा रागः"

लब्धं कृष्ण-धनं प्रणाश्य च पुनः स्मृत्वा तदीयान् गुणान्
विच्छेद-व्यथया महाप्रभुरभूत्तापाकुलो विह्वलः ।
ऊचेऽसाववलम्ब्य कण्ठयुगले रायं स्वरूपं तथा
हा हा चापलमागतं हरिहरि स्थैर्य्यं विलुप्तञ्च मे ॥३९

हे मज्जीवन-बान्धवौ मधुरिमा कृष्णस्य मे श्रूयतां
यस्मिँल्लोभ-वशान्मदीय-हृदयं त्यक्त्वा निजाँल्लौकिकान् ।
धर्मान् वैदिक-कर्मजांश्च निखिलान् वेशं दधद् योगिनो
भिक्षा-पर्य्यटनाय जातमधुना निष्किञ्चनं भिक्षुकम् ॥४०

श्रीकृष्णलीला-शुचि-शङ्खकुण्डले
श्रुत्योर्दधानं शुक-शिल्पि-निर्मिते ।
करेण गृह्णत् तृड़लावु-भाजन-
माशार्थना-पात्र-विलम्बितांसकम् ॥४१

चिन्ता-कन्थावृताङ्गं मलिन-तनु रजो-भस्मराशि-प्रलेपाद्
हा हा कृष्णेति लोकान् प्रतिवदति मुहुः केवलं सप्रलापम् ।
लोभोष्णीषञ्च बिभ्रन्निज-शिरसि वहत् पाणिनोद्वेग-यष्टिं
भिक्षाभावान्मदीयं हृदयमिदमतिक्षीणकायञ्च जातम् ॥४२

वेदव्यास-शुकादि-योगि-निवहैः कृष्णस्य सर्वात्मनो
ये ये तस्य निरञ्जनस्य ललिता लीलासमूहा व्रजे ।
श्रीमद्भागवतादिशास्त्रनिचये सम्यक्तया वर्णिता-
स्तद्भावानुगतोपदेशमनिशं पापठ्यते मे मनः ॥४३

शिष्याणि कृत्वा च दशेन्द्रियाणि
गृह्णन्महावातुलनाम तैः समम् ।

देह-स्वगेहं विषयान् धनानि च
विहाय वृन्दावनमेति मे मनः ॥४४
तत्रोषिताः स्थावर-जङ्गमा ये
वृक्षालताश्चाश्रमिणो गृहस्थाः ।
भिक्षामटन्तेषु च मूल-पत्र-
फलान्यदज्जीवति तत् सशिष्यम् ॥४५

रूप-स्पर्शन-शब्द-सौरभ-रसै र्गोपीभिरास्वादितैः
श्रीकृष्णस्य गुणामृतै स्तदशनोच्छिष्टैः सयत्नाहृतैः ।
तच्छिष्येन्द्रियपञ्चकेन नियतं भिक्षोपलब्धैश्च तै
र्जीवातुं परिपालयत्यनुदिनं तद्भिक्षुकं मे मनः ॥४६

शून्ये कुञ्जान्तर्गृहे तैः स्वशिष्यैः
कृष्णध्यानं योगमभ्यस्यमानम् ।
द्रष्टुं साक्षात् कृष्णमात्मानमेतत्
सर्वारात्रीर्वर्त्तते जाग्रदेव ॥४७

तन्मे मनः कृष्णवियोगि दुःखाद्
दशा दशाप्नोत्यवलम्ब्य योगम् ।
तद्भयाकुले तत्र पलायमाने
शून्यः शरीरालय एष जातः ॥४८

श्रीकृष्णष्य वियोगेन गोपीनां या दशा दश ।
ता एवाविर्भवन्ति स्म प्रभोरन्तर्दशा दश ॥४९

"तथाह्युज्ज्वलनीलमणौ शृङ्गारभेदप्रकरणे पञ्चषष्टितमः श्लोकः—

चिन्तात्र जागरोद्वेगौ तानवं मलिनाङ्गता ।
प्रलापो व्याधिरुन्मादो मोहो मृत्यु र्दशा दश ॥४॥"

दशाभिर्दशभिस्ताभिर्व्यस्तो रात्रिन्दिवं प्रभुः ।
कदोदेति दशा केति नासीच्चेतसि निश्चयः ॥५०

कथयित्वा तथा तूष्णीं वर्त्तमाने महाप्रभौ ।
श्लोकान् वाचयितुं रामानन्दरायः प्रचक्रमे ॥५१
श्रीमत्स्वरूपगोस्वामी कृष्णलीलां जगौ ततः ।
तावज्जीजनतामीषद् वाह्यज्ञानं प्रभोरुभौ ॥५२
एवमेवार्द्धरात्रं तौ यापयन्तौ महाप्रभुम् ।
अभ्यन्तरं प्रकोष्ठस्य नीत्वाशाययतामुभौ ॥५३
तत स्तस्मिन् गते रामानन्दराये निजालयम् ।
द्वारे स्वरूप-गोविन्दावशयातामुभौ च तौ ॥५४
समग्रामेव तां रात्रिं जाग्रदेव महाप्रभुः ।
जगावुच्चैस्तरां कृष्णनामसङ्कीर्त्तनं मुहुः ॥५५
स्वरूपः शब्दमश्रुत्वा द्वारमुद्घाटयन्नथ ।
रुद्धद्वारत्रये गेहे प्रभुर्नास्तीत्यवैक्षत ॥५६
अनालोक्य प्रभुं तत्र चिन्तितौ तौ बभूवतुः ।
प्रज्वाल्य दीपयष्टिञ्च तमन्विष्य विचेरतुः ॥५७
सिंहद्वारवहिर्भागादुत्तरस्यां दिशि प्रभुः ।
ताभ्यां चैतन्यगोस्वामी पतितः पर्य्यदृश्यत ॥५८
दृष्ट्वा स्वरूपगोस्वामि-प्रमुखा नन्दिता अपि ।
चिन्ताग्रस्ता बभूवुस्ते तां विलोक्य प्रभो र्दशाम् ॥५९
आसीद्दीर्घं वपुः पञ्च-ष-हस्तं पतितं प्रभोः ।
हीनं चेतनया श्वास-प्रवाह-हीन-नासिकम् ॥६७
एकैकं हस्तपादञ्चाभवद्धस्तत्रयायतम् ।
देहास्थिग्रन्थयो भिन्नाश्चर्ममात्रावृताः परम् ॥६१
ये ये तस्य कटि-ग्रीवा-हस्त-पादास्थि-सन्धयः ।
वितस्तिपरिमाणेन जातास्ते ते पृथक् पृथक् ॥६२
त्वङ्मात्रमस्थिसन्धीनामुपर्य्यायतमाततम् ।
तथाभूतं प्रभुं दृष्ट्वा सर्वे जाताः सुदुःखिताः ॥६३

ऊर्द्ध्व नेत्रं स्रवल्लाला-फेन-पुञ्ज-मुखं प्रभुम् ।
भक्तानां पश्यतां प्राणा देहांस्त्यक्तुं समुद्यताः ॥६४
अथ स्वरूपगोस्वामी सर्वैर्भक्तजनैः सह ।
उच्चैराचारयत् कृष्णनाम कर्णे महाप्रभोः ॥६५
चिरेणैवं प्रविष्टे च हृदयं कृष्णनामनि ।
प्रभुर्गर्जन् समुत्तस्थौ हरिं ब्रूहीत्युदीरयन् ॥६६
तस्मिंश्चैतन्यमासेऽथ संलग्ना अस्थिसन्धयः ।
अभूत्तस्य यथापूर्वं योग्यरूपं कलेवरम् ॥६७
लीलेयं रघुनाथेन दासेनैवं प्रकाशिता ।
पुस्तके नाम चैतन्यस्तवकल्पतराविति ॥६८

"तथाहि स्तवावल्यां चैतन्यस्तवकल्पवृक्षे चतुर्थः श्लोकः—

क्वचिन्मिश्रावासे व्रजपति-सुतस्योरुविरहात्
श्लथ-श्री-सन्धित्वाद्दधदधिकदैर्घ्यं भुजपदोः ।
लुठन् भूमौ काक्वा विकलविकलं गद्गदवचा
रुदन् श्रीगौराङ्गो हृदय उदयन्मां मदयति ॥५॥"

सिंहद्वारे स्थितं दृष्ट्वात्मानं लब्धातिविस्मयः ।
क्वाहं किं त्वं करोषीति स्वरूपं पृष्टवान् प्रभुः ॥६९
स्वरूपोऽवददुत्तिष्ठ प्रभो गच्छ निजालयम् ।
तत्र गत्वाखिलं वृत्तं करिष्ये तव गोचरम् ॥७०
इत्युक्त्वा प्रभुमादाय स्वरूपो नीतवान् गृहम् ।
न्यवेदयच्च तां सर्वामवस्थां स महाप्रभोः ॥७१
प्रभुस्तत् सर्वमाकर्ण्य महाविस्मयमागतः ।
अवादीत्तं न मे कश्चित् स्मृते लेशोऽपि विद्यते ॥७२
विद्यमानं समक्षं मे कृष्णमेव हि दृष्टवान् ।
दत्त्वैव दर्शनं मुह्यं विद्युद्वत् स तिरोहितः ॥७३

अस्मिन्नवसरे शङ्खो जगन्नाथस्य वादितः ।
स्नात्वा तद्दर्शनायाथ प्रातिष्ठत महाप्रभुः ॥७४

विकारोऽद्भुतरूपोऽयं प्रभोरभिहितो मया ।
यमाकर्ण्य चमत्कारं लभन्ते निखिला जनाः ॥७५

दृश्यते यो न लोकेऽस्मिन् श्रूयते नापि शास्त्रतः ।
तं भावं कृतवान् व्यक्तं स सन्न्यासि-शिरोमणिः ॥७६

शास्त्र-लोकानतिक्रान्ता भावा ये येऽभवन् प्रभोः ।
तेषु प्राकृतलोकानां प्रत्ययो नैव जायते ॥७७

श्रीरघुनाथदासोऽसौ सदासीत् प्रभुणा सह ।
मयैतत्तन्मुखाच्छ्रुत्वा प्रतीत्यैवात्र लिख्यते ॥७८

एकस्मिन्दिवसे गच्छन् समुद्राभिमुखं प्रभुः ।
अकस्माद्दृष्टवान्दूरे चटकं नाम पर्वतम् ॥७९

मत्वा गोवर्द्धनं शैलं तमाविष्टमनाः प्रभुः ।
अगच्छत् सत्वरं धावं स्तत्पर्वतदिशं प्रति ॥८०

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकविंशाध्यायेऽष्टादशः श्लोकः—

हन्तायमद्रिरवला हरिदास-वर्य्यो
यद्राम-कृष्ण-चरण-स्पर्श-प्रमोदः ।
मानं तनोति सहगोगणयोस्तयो र्यत्
पानीयसूजवस-कन्दर-कन्द-मूलैः ॥६॥"

इति श्लोकं पठन् वायु-वेगेन प्रस्थितः प्रभुः ।
तत्पश्चादेव गोविन्दो धावन्नपि न चाप तम् ॥८१

चित्कारेणाथ सर्वेषां जातः कोलाहलो महान् ।
ये यत्रासंस्त उत्थायान्वधावन् सपदि प्रभुम् ॥८२

स्वरूपो जगदानन्दः पण्डितश्च गदाधरः ।
नीला-रामाइ-नन्दाश्च तथा पण्डितशङ्करः ॥८३

गोस्वामि-भारती-पुर्य्यौ सिन्धुतीरं समागताः ।
आचार्य्यो भगवान् खञ्ज स्तत्रागच्छच्छनैःशनैः ॥८४
प्रथमं वायुवेगेन धावति स्म महाप्रभुः ।
ततः स्तम्भोदयाद्देहे चलितुं नाशकत् पथि ॥८५
उद्गता रोमकूपेभ्यो मांसपिण्डा व्रणोपमाः ।
बभुस्तेष्वपि रोमाञ्चाः प्रभोर्देहे कदम्बवत् ॥८६
सुस्रुवू रोमकूपेभ्यः स्वेदाः शोणितधारया ।
अनुद्गताक्षरात् कण्ठादुद्गतो घर्घरध्वनिः ॥८७
अजस्रं प्रावहन्नश्रुधारा नेत्रद्वयात् प्रभोः ।
गङ्गा-यमुनयोर्धारा मिलिता इव सिन्धुना ॥८८
देहः शङ्ख इव श्वेतोऽभवद्वैवर्ण्यमागतः ।
ततः प्रादुरभूत् कम्पः समुद्रस्य तरङ्गवत् ॥८९
वेपमान-तनौ भूमितले निपतति प्रभौ ।
गोविन्दः सत्वरं धावन्नुपागच्छन्महाप्रभुम् ॥९०
सर्वाङ्गानि प्रभोः सिञ्चन् स कमण्डलु-वारिणा ।
गृहीत्वा च वहिर्वासस्तेन तं समवीजयत् ॥९१
अथ तत्रागताः सर्वे स्वरूप-प्रमुखा गणाः ।
तामवस्थां प्रभोर्दृष्ट्वारब्धवन्तश्च रोदितुम् ॥९२
विकारान् सात्त्विकानष्टावद्भुतानथ ते प्रभोः ।
श्रीमदङ्गेषु पश्यन्तः सर्वेऽभूवंश्चमत्कृताः ॥९३
उच्चैः सङ्कीर्त्तनं चक्रुरथ ते कर्णयोः प्रभोः ।
तदङ्गानि मृजन्तिस्म वारिणा शीतलेन च ॥९४
एवमेव बहून् वारांश्चेष्टमानेषु तेष्वथ ।
अकस्मात् प्रभुरुत्तस्थौ हरिं ब्रूहीत्युदीरयन् ॥९५
सर्वैं हरिहरीत्युक्ते महानन्देन वैष्णवैः ।
आपूरयन् दिशः सर्वा उत्थितो मङ्गलध्वनिः ॥९६

इतस्ततो निरैक्षिष्ट समुत्थाय महाप्रभुः ।
यमेव द्रष्टुकामोऽभून्न लेभे तस्य दर्शनम् ॥९७
वैष्णवांस्तान् विलोक्यार्द्ध-वाह्य-संज्ञामथाप्नुवन् ।
प्रभुः स्वरूपगोस्वामिपादं पप्रच्छ किञ्चिन ॥९८
अये केनाहमानीतो गिरेर्गोवर्द्धनादिह ।
लीलां कृष्णस्य लब्ध्वापि नास्मि तृप्तिं गतो दृशोः ॥९९
इतोऽहं गतवानद्य गिरिं गोवर्द्धनं प्रति ।
गोधनं चारयन् कृष्णो मया तत्र विलोकितः ॥१००
स गोवर्द्धनमारुह्य वेणुं वादयते स्म च ।
चरन्त्यो धेनवः सर्वा गिरेरासन् समन्ततः ॥१०१
आयाता राधिकादेवी शृन्वती मुरलीरवम् ।
रूप-भाव-सखीस्तस्या नाहं वर्णयितुं क्षमे ॥१०२
राधामादाय कृष्णेऽथ प्रविष्टे गिरिकन्दरम् ।
कुसुमोच्चयनार्थं ताः काश्चित् सख्यः समुद्यताः ॥१०३
तत्क्षणादेव युष्माभि र्महान् कोलाहलः कृतः ।
ततएव गृहीत्वात्र समानीतो बलादहम् ॥१०४
अहं युष्माभिरानीतः कथं दुःखयितुं वृथा ।
लीलां प्राप्तोऽपि कृष्णस्य न तृप्तोऽस्मि दृशोरिति ॥१०५
एतावत् कथयित्वासौ रुदन्नासीन्महाप्रभुः ।
अवलोक्य दशां तस्य वैष्णवा रुरुदुर्भृशम् ॥१०६
तदैव भारती-पुर्य्यौ स्वामिनौ तत्र सङ्गतौ ।
तौ विलोकयतो जातः सम्भ्रमः श्रीमहाप्रभोः ॥१०७
लब्ध्वा सम्यग् वहिर्ज्ञानं प्रभुणा वन्दितावुभौ ।
तौ पुन र्युगपत् प्रेम्णा गाढ़माश्लिष्यतःस्म तम् ॥१०८
प्रभुरूचे युवां कस्मादेतावद्दूरमागतौ ।
प्रत्युक्तवान् पुरीस्वामी तव नृत्यं निरीक्षितुम् ॥१०९

इत्येवं वचसा पुर्य्यां लज्जमानो महाप्रभुः ।
आजगाम समुद्रस्य तीर्थं तैः सह वैष्णवैः ॥११०
तत्र स्नात्वा निजावासं समागत्य महाप्रभुः ।
महाप्रसादमानीतं बुभुजे सकलैः सह ॥१११
इत्येवं कथितो दिव्योन्माद-भावः प्रभोर्मया ।
प्रभावं भाषितुं यस्य ब्रह्मापि प्रभवेन्नहि ॥११२
चटकक्षितिभृद्-यात्रा-लीला दासेन वर्णिता ।
रघुनाथेन चैतन्यस्तवकल्पतरावियम् ॥११३

"तथाहि स्तवावल्यां चैतन्यस्तवकल्पवृक्षेऽष्टमः श्लोकः—

समीपे नीलाद्रेश्चटकगिरिराजस्य कलना-
दये गोष्ठे गोवर्द्धनगिरिपतिं लोकितुमितः ।
व्रजन्नस्मीत्युक्त्वा प्रमद इव धावन्नवधृतो
गणैः स्वैर्गौराङ्गो हृदय उदयन्मां मदयति ॥७॥"

अलौकिक्यः प्रभोर्लीला या याश्च कथिता इह ।
तास्ता महाप्रभोः खेलाः को बोद्धुं क्षमते जनः ॥११४
यथासंक्षेपमत्रोक्तं मया दिग्दर्शनं यथा ।
कृष्णप्रेमधनं तेन लभ्यं यः शृणुयादिदम् ॥११५
आशास्ते यः पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥११६

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे चटकगिरि-गमन-रूप-
दिव्योन्माद-वर्णनं नाम चतुर्दशः परिच्छेदः ।

—०—

अन्त्यलीलायां पञ्चदशः परिच्छेदः

"दुर्गमे कृष्णभावाब्धौ निमग्नोन्मग्न-चेतसा ।
गौरेण हरिणा प्रेम-मर्य्यादा भूरि दर्शिता ॥१॥"

जय श्रीकृष्णचैतन्य जय श्रीमन्नधीश्वर ।
पूर्णानन्दवपुः श्रीमन्नित्यानन्द जय प्रभो ॥१

जयाद्वैत जयाचार्य्य कृष्णचैतन्यवान्धव ।
श्रीवासप्रमुखा यूयं हे भक्ता जयत प्रभोः ॥२

एवमेवात्मनो वाह्य-भाव-रूपाणि विस्मरन् ।
कृष्ण-भाव-समाविष्टः प्रभुरासीद्दिवानिशम् ॥३

तद्भावे जातु मग्नोऽभूज्जातु वाह्यार्द्ध चेतनः ।
जातु स्फूर्त्त-वहिः-संज्ञो भेजे तिस्रोदशाः प्रभुः ॥४

तस्य स्नानेक्षणाहारा जाता देहस्वभावतः ।
यथा वेगात् कुलालस्य चक्रमावर्त्तते सदा ॥५

वीक्षमाणो जगन्नाथमेकदाथ महाप्रभुः ।
दृष्टवान् श्रीजगन्नाथं साक्षाद्व्रजेन्द्रनन्दनम् ॥६

ते कृष्णस्य गुणाः पञ्च सममेवास्फुरन् प्रभोः ।
आकर्ष स्तद्गुणाः पञ्च प्रभोरिन्द्रियपञ्चकम् ॥७

तस्यैकं मन आकृष्टं प्रतिस्वं पञ्चभिर्गुणैः ।
आचरीकर्षणात्तेषां सञ्जातं तदचेतनम् ॥८

तदा भोग उपान्नाख्ये जगन्नाथस्य निःसृते ।
गृहीत्वा गृहमानिन्युर्भक्ताः सर्वे महाप्रभुम् ॥९

रामानन्दं स्वरूपञ्च सममादाय तावुभौ ।
तयोः कण्ठावलम्बेन विललाप महाप्रभुः ॥१०

राधिका कृष्णविच्छेदादुत्कण्ठमानमानसा ।
उत्कण्ठाकारणं स्वस्य विशाखामब्रवीद् यथा ॥११

तथा श्लोकं पठन् पश्चात्तापञ्च विदधत् प्रभुः ।
श्लोकार्थं श्रावयामास तावुभौ विलपन् स्वयम् ॥१२

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे तृतीयः श्लोकः—

सौन्दर्य्यामृत-सिन्धु-भङ्ग-ललना-चित्ताद्रि-संप्लावकः
कर्णानन्दि-सनर्म-रम्य-वचनः कोटीन्दु-शीताङ्गकः ।
सौरभ्यामृत-संप्लवावृत-जगत् पीयूषरम्याधरः
श्रीगोपेन्द्रसुतः स कर्षति वलात् पञ्चेन्द्रियाण्यालि मे ॥२॥

यथा रागः ।"

कृष्णस्य स्वर-सौरभाधर-रसस्पर्शेषु रूपे तथा
माधुर्य्यं वचसामगोचरमभिज्ञाय प्रलुब्धान्तराः ।
एकं मे हृदयाश्वमिन्द्रियजना आरुह्य पञ्चैव ते
स्वाः स्वाः पञ्चदिशः प्रतीह युगपद्धावन्त्यतीव द्रुतम् ॥१३
शृणु मे सखि दुःखकारणं महतीं लम्पटताञ्च दस्युताम् ।
अयतेन्द्रियपञ्चकेन मे परवित्तं ह्रियते दिवानिशम् ॥१४
एको मनोऽश्वः सममेव पञ्चभिः
कृष्टोदिशः पञ्च कया स गच्छतु ।
सर्वैः स कृष्टो युगपन्मुमूर्षति
सोढुं मया दुःखः मिदं न शक्यते ॥१५
निर्दोषमिन्द्रियगणं प्रति नास्मि रुष्टा
रूपादयो हरिगुणा अतिकर्षका हि ।
तैः कृष्ट इन्द्रियगणो मरणोद्यतो मे
प्राणा ममापि न चिरेण तनुं त्यजन्ति ॥१६
श्रीकृष्णरूपामृत-सागरोर्मे
रेकोऽपि विन्दुर्जगतीं निमज्जयेत् ।
चित्तोच्चशैलानपि विश्वयोषिता
माप्लाव्य धावत्यति तान् पुरो नयन् ॥१७

या नाना-रस-भाव-नर्म-रुचिरा कृष्णस्य वाङ्माधुरी
यस्या दुश्चरितावलीं विवरितुं शक्तिर्न वाचामपि ।
सा बद्ध्वा स्वगुणैर्दृढं त्रिभुवनस्त्रीणां श्रुतीः कर्षति
प्राणाः सन्ततकर्षनादिव गतास्तासां श्रुतीनामपि ॥१८

श्रीकृष्णस्य तनुः सुशीतलतमा किं कथ्यते तद्बलं
दीप्त्या कोटि-शशाङ्क-चन्दन-वन-श्री-मोषिणी हेलया ।
नारीणां कुच-शैल-गौरव-भृतामाकर्षणे वक्षसां
दत्त्वा कर्षति मानसानि सततं तासामियं लीलया ॥१९

कृष्णाङ्ग-सौरभ-भरो मृगनाभि-गर्वं
नीलोत्पलस्य च मदं हरति प्रसह्य ।
नासान्तरेष निवसन् भुवनाङ्गनानां
चेतांसि कर्षति मुहुर्मुहुरेव नित्यम् ॥२०

कृष्णस्याधर-पल्लवामृतरसः कर्पूर-गौर-स्मितो
माधुर्य्या निजया हरत्यनुदिनं यः सुन्दरीणां मनः ।
लब्ध स्त्याजयति स्पृहां परत्र विषये सम्पादयत्यन्यथा
क्षोभञ्च व्रजयोषितां परिपणः प्रेम्णः प्रसिद्धो हि सः ॥२१

इत्येतामभिधाय गौरहरिणा वाचं तयोर्ग्रहता
कण्ठावुक्तमये स्वरूप श्रृणुतं हे रामरायाधुना ।
किं किं वा विदधाम्यहं क्वनु पुनर्गच्छामि गच्छन्नथ
कृष्णं कुत्र लभे कदेति वदतं तत्-कौशलं मे युवाम् ॥२२

एवमेव ब्रुवन् गौरहरिः प्रतिदिनं प्रभुः ।
रामानन्द-स्वरूपाभ्यां विलापं कृतवान् भृशम् ॥२३

गीतं गायन् स्वरूपोऽथ श्लोकान् रायश्च वाचयन् ।
सततं तावुभावेव समाश्वासयतां प्रभुम् ॥२४

जयदेव-कवे र्विद्यापतेः कर्णामृतस्य च ।
तावानन्दयतां श्लोक-सङ्गीताभ्यां महाप्रभुम् ॥२५

एकदाथ समुद्रस्य तीरं गच्छन् महाप्रभुः ।
अकस्माद्दृष्टवांस्तत्र कुसुमोपवनं पुरः ॥२६

तच्च वृन्दावनं मत्वा धावंस्तत्र प्रविष्टवान् ।
व्यचरत् कृष्णमन्विष्यन् प्रेमावेशवशात् प्रभुः ॥२७

कृष्णमन्तर्हितं राधां गृहीत्वा रासमण्डलात् ।
अन्विष्यन्त्यो विचेरुस्ता यथा सख्यः समन्ततः ॥२८

तथैव भावमाविष्टः प्रभु र्वृक्षलताः प्रति ।
पठन् श्लोकांस्तमन्विष्यन् विचचार ततस्ततः ॥२९

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रिंशाध्याये नवम-सप्तमाष्टमाः श्लोकाः—

चूत-प्रियाल-पनसासन-कोविदार-
जम्वर्क-विल्व-वकुलाम्र-कदम्व-नीपाः ।
येऽन्ये परार्थभवका यमुनोपकूलाः
शंसन्तु कृष्णपदवीं रहितात्मनां नः ॥३॥

कच्चित्तुलसि कल्याणि गोविन्द-चरण-प्रिये ।
सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेऽतिप्रियोऽच्युतः ॥४॥
मालत्यदर्शि वः कच्चिन्मल्लिके जाति-यूथिके ।
प्रीतिं वो जनयन् यातः करस्पर्शेन माधवः ॥५॥"

पनसाम्रपियाला हे हे कोविदार-जम्ववः ।
यूयं परोपकाराय यतध्वे तीर्थवासिनः ॥३०

कृष्णेनोपगता यूयं दृष्टवन्तश्च किन्नु तम् ।
कृष्णस्योद्देशमुक्त्वा मे जीवनं परिरक्षत ॥३१

अथोत्तरमलब्ध्वासावनुमाय व्यचिन्तयत् ।
एते पुंजातयः सर्वे तुल्याः श्रीकृष्णवन्धुभिः ॥३२

कथमेते वदिष्यन्ति कृष्णोद्देशन्तु मां प्रति ।
इमाः स्त्रीजातयः किन्तु लतिका मे सखीसमाः ॥३३

कृष्णदर्शनमाप्ताः स्म इति वक्ष्यन्ति निश्चितम् ।
अपृच्छत्तर्कयित्वैवं तुलस्यादिलताः प्रभुः ॥३४

तुलसी-मालती-मल्ली-माधवी-यूथिकालताः ।
भवतीनां प्रियः कृष्णः प्राप्तः किं भवदन्तिकम् ॥३५

सर्वा नूनं भवत्यो मे भवन्त्येव सखीसमाः ।
कृष्णस्योद्देशमुक्त्वा तद्रक्षन्तु मम जीवनम् ॥३६

तथाप्युत्तरमप्राप्य प्रभुरन्तरचिन्तयत् ।
कृष्णदास्य इमास्तावद्भयाद्वक्ष्यन्ति नैव माम् ॥३७

अथाग्रे स मृगीर्दृष्ट्वा प्राप्त-कृष्णाङ्ग-सौरभः ।
तन्मुखानि निरीक्ष्यैवं ताः पप्रच्छ सनिश्चयम् ॥३८

"सथाहि तत्रैवैकादशः श्लोकः—

अप्येण-पत्न्युपगतः प्रिययेह गात्रै
स्तन्वन् दृशां सखि सुनिर्वृतिमच्युतो वः ।
कान्ताङ्गसङ्गकुचकुङ्कुमरञ्जितायाः
कुन्दस्रजः कुलपतेरिह वाति गन्धः ॥६॥"

ब्रूत सख्यः स कृष्णः किं राधया सह सर्वथा ।
युष्मभ्यं सुखदानार्थं समायातोऽत्र नान्यथा ॥३९

वहिरङ्गा वयं न स्मो राधासख्यः प्रिया वयम् ।
दूरादेवाभिजानीमस्तदङ्गैः सङ्ग-सौरभम् ॥४०

राधाया अङ्ग-सङ्गेन कुचयोः कुङ्कुमस्पृशः ।
कृष्ण-कुन्द-स्रजो गन्धः प्रवातीह सुवासितः ॥४१

इमास्त्यक्त्वा गतः कृष्णो विरहिण्य इमास्ततः ।
किं वोत्तरं प्रदास्यन्ति नैव शृण्वन्ति मे वचः ॥४२

वृक्षानथ पुरोदृष्ट्वा फल-पुष्प-भरानतान् ।
भूतले पतिताः सर्वास्तच्छाखाश्चाब्रवीत् प्रभुः ॥४३

एते कृतनमस्काराः कृष्णमालोक्य निश्चितम् ।
इति निर्णीय पप्रच्छ तान् कृष्णागमनं प्रभुः ॥४४

"तथाहि तत्रैव द्वादशः श्लोकः—

वाहुं प्रियांस उपधाय गृहीतपद्मो
रामानुजस्तुलसिकालिकुलै र्मदान्धैः ।
अन्वीयमान इव वस्तरवः प्रणामं
किंवाभिनन्दति चरन् प्रणयावलोकैः ॥७॥"

भृङ्गं पतन्तमालोक्य वारयिष्यन् प्रियामुखात् ।
कृष्णः सञ्चालयँल्लीला-पद्मञ्चान्यमना अभूत् ॥४५
दत्तं तेनावधानं किमत्र युष्मन्नमस्कृतौ ।
न दत्तमथवा तेन ब्रूत सत्यमिदं वचः ॥४६
श्रीकृष्णस्य वियोगेन सेवका दुःखिता इमे ।
किंवा प्रत्युत्तरं दद्युरेषां संज्ञा न विद्यते ॥४७
इत्युक्त्वा पुरतो गत्वा मन्वानो यमुनातटम् ।
तत्रापश्यत् कदम्बस्य तले कृष्णमवस्थितम् ॥४८
मुरली-वदनः कोटि-कोटि-मन्मथ-मोहनः ।
हरत्यसीमसौन्दर्य्यो जगन्नेत्रमनांसि सः ॥४९
तत्सौन्दर्य्यमथालोक्य मूर्च्छिते च प्रभौ भुवि ।
पतन्त्येव स्वरूपाद्यास्तमुपेत्योपतस्थिरे ॥५०
प्रभोः पुरेव सर्वाङ्गे विकाराः सात्त्विकाः स्फुटाः ।
स्वादयन्नन्तरानन्दं स वहिर्विह्वलोऽभवत् ॥५१
मिलितैः पूर्ववत् सर्वैः प्रभुर्लम्भितचेतनः ।
उत्थायैव निचिक्षेप समन्ताल्लोचनद्वयम् ॥५२
क्वासौ कृष्णो गतो दृष्टो मया साम्प्रतमेव सः ।
अहरत् सुषमा यस्य मनो नेत्रयुगञ्च मे ॥५३

पुनः कस्मान्न पश्यामि मुरलीशोभिताननम् ।
तस्य दर्शनलोभेन भ्रमतो नयने मम ॥५४

यमेवोक्तवती श्लोकं विशाखां प्रति राधिका ।
आरेभे पठितुं श्लोकं तमेवासौ महाप्रभुः ॥५५

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे चतुर्थः श्लोकः—

नवाम्बुद-लसद्द्युति र्नवतड़िन्मनोज्ञाम्बरः
सुचित्रमुरलीस्फुरच्छरदमन्दचन्द्राननः ।
मयूर-दल-भूषितः सुभग-तार-हार-प्रभः
स मे मदन-मोहनः सखि तनोति नेत्रस्पृहाम् ॥८॥

यथा रागः"

फुल्लेन्दीवर-निन्दि-कोमलरुचिः सद्यो-दलत् कज्ज्वलः
स्निग्ध-श्रीर्विजितोपमाननिचया कृष्णस्य मुग्धा तनुः ।
प्रत्यग्राम्बुद-जाल-चिक्कण-मृदुश्यामां हरन्ती द्युतिं
सर्वेषामपि तर्पयत्यतितरां नेत्राणि चित्तानि च ॥५६

वद मे कमुपायमाश्रये सखि कृष्णो जलदोऽयमद्भुतः ।
मम लोचनचातकद्वयी तमवीक्ष्य म्रियते पिपासया ॥५७

पीताम्बरस्थास्नु-तड़ित्-परिच्छदो मुक्तावलीरेष वकावलीर्दधत् ।
शिखण्डमैन्द्रं धनुरुच्चकै र्वहन् प्रालम्बमन्यच्च धनु र्विलोक्यते ॥५८

वेणुस्वनं जलदगर्जितमेव मत्वा ।
वृन्दावने शिखिगणो विदधाति नृत्यम् ।
कृष्णे घने लसति पूर्णनिरङ्कचन्द्रो
लावण्यपूरघनचन्द्रिकयाद्भुतोऽसौ ॥५९

लोकांश्चतुर्दश निषिञ्चति कृष्णमेघे
लीलामृतं विसृजतीक्षितमात्र एव ।
दुर्दैवचण्डमरुता गमितेऽतिदूरं
तौ चातकौ जलमनाप्य तृषा म्रियेते ॥६०

हा हा श्लोकान् पठ पठ पुना रामरायेति वाष्पैः
कुण्ठत्-कण्ठः प्रभु रभिदधे तन्मुखाच्चाथ शृण्वन् ।
तच्छ्लोकानां स्वयमपि पुनर्व्यञ्जयन् गूढ़भावान्
स्पष्टव्याख्यामिह विवृतवान् हर्ष-शोकाभिभूतः ॥६१

"तथाहि श्रीमद्भागवते दशमस्कन्ध ऊनविंशाध्याये
षट्त्रिंशः श्लोकः—

वीक्ष्यालकावृतमुखं तव कुण्डलश्रि-
गण्ड-स्थलाधर-सुधं हसितावलोकम् ।
दत्ताभयञ्च भुज-दण्ड-युगं विलोक्य
वक्षः श्रियैकरमणञ्च भवाम दास्यः ॥६॥

यथा रागः"

कृष्णः प्रसार्य्य जलजेन्दु-जिदास्य-जालं
तत्राधर-स्मित-सुभक्ष्यतृणं निधत्ते ।
आगत्य तत्र पतिता व्रजयोषिदेण्यो
दास्योभवन्ति पति-गेह-कुलानि हित्वा ॥६२

कृष्णः सखे व्याध इवाचरत्यसौ
धर्मानधर्मानपि नैव मन्यते ।
नारी-मृगीणां मृदु मर्म विध्यति
करोत्युपायान् विविधांश्च तत्कृते ॥६३

स्वच्छे कपोल-फलके प्रतिविम्बिताया
रुच्यश्रिया मकर-कुण्डल-नृत्य-भासः ।
हृत्वावलाः स्मित-कटाक्ष-विषाक्तवाणै-
रन्तर्घ्नतोऽस्य रमणी-वध-भी र्न कापि ॥६४

श्रीवत्स-लक्ष्मी-श्रितमायतोच्चं
दस्युप्रकाण्डीयमुरो मुरारेः ।

व्रजस्य लक्ष्मी-गण-चित्त-वक्षो-
लक्षस्य दक्षं हरिदास्य-दाने ॥६५

वृत्तायतार्गल-समं नहि तत्तदीयं
वाह्वोर्युगं, भवति कृष्णभुजङ्गयुग्मम् ।
दृक्कन्दरौ प्रविशता हृदि दश्यमाना-
स्तेनावला गरल-यातनया म्रियन्ते ॥६६

सोशीर-चन्दन-सिताभ्र-पराजयिष्णु
कोटीन्दु-शीतल-कराङ्घ्रितलं मुरारेः ।
स्पर्शो हि यस्य सकृदप्यपहन्ति काम-
ज्वाला-विषं स रमणी-हृदयैक-लोभ्यः ॥६७

इति प्रलप्यैव स गौरकृष्णः
श्लोकं तथार्थं पुनरेकमूचे ।
यं राधिका प्रोक्तवती विशाखा-
मुद्घाट्य शोकं हृदयादबाधम् ॥६८

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे सप्तमः श्लोकः—

हरिन्मणिक-वाटिका-प्रततहारि-वक्षस्थलः
स्मरार्त्त-तरुणी-मनः-कलुष-हन्तृ-दोरर्गलः ।
सुधांशु-हरिचन्दनोत्पल-सिताभ्र-शीताङ्गकः
स मे मदनमोहनः सखि तनोति वक्षःस्पृहाम् ॥१०॥"

प्रभुणोक्तमहं कृष्णमिदानीमेव लब्धवान् ।
दुर्दैवेनात्मनो नूनं तं प्रणाशितवान् पुनः ॥६९
चञ्चल-प्रकृतिः कृष्णो नासावेकत्र तिष्ठति ।
दर्शनेन मनो हृत्वा तिरोभवति तत्क्षणात् ॥७०

"तथाहि श्रीमद्भागवते दशमस्कन्ध ऊनत्रिंशाध्याये
त्रिचत्वारिंशः श्लोकः—

तासां तत्सौभगमदं वीक्ष्य मानञ्च केशवः ।
प्रशमाय प्रसादाय तत्रैवान्तरधीयत ॥११॥"

उक्तः स्वरूपगोस्वामी प्रभुणा गीयतां त्वया ।
गीतमेकं यथा संज्ञा हृदये मे भवेदिति ॥७१

तच्च स्वरूपगोस्वामी श्रुत्वा सुमधुरं जगौ ।
श्रावयन् गीतगोविन्दपदमेकं महाप्रभुम् ॥७२

"तथाहि गीतगोविन्दे द्वितीयसर्गे द्वितीयः श्लोकः—

रासे हरिमिह विहित-विलासम् ।
स्मरति मनो मम कृत-परिहासम् ॥१२"

इति स्वरूपगोस्वामी पदमेतज्जगौ यदा ।
तदा नर्त्तितुमारेभे प्रेमावेशान्महाप्रभुः ॥७३

प्रत्यङ्गं सात्त्विका भावा अष्टौ प्रकटतां गताः ।
याताश्चोद्वेलतां सर्वे हर्षाद्या व्यभिचारिणः ॥७४

भावानामुदयः सन्धिस्तथा शवलताभवन् ।
महायुद्धमभूत्तेषां प्रवलानां परस्परम् ॥७५

भूयोभूयः पदं तेनैकैकशोऽगापयत् प्रभुः ।
ववृधे तस्य नृत्यञ्च मुहुः स्वादयतो रसम् ॥७६

इत्थं बहुचिरं तेन क्रियमानेऽथ नर्त्तने ।
पदं स्वरूपगोस्वामी तत्क्षणात् पर्य्यशेषयत् ॥७७

प्रभुणोदीर्य्यमानेऽपि ब्रूहि ब्रूहीत्यनारतम् ।
दृष्ट्वा स्वरूपगोस्वामी श्रमं तस्य न गीतवान् ॥७८

श्रुत्वा भक्तजनास्तञ्च ब्रूहि ब्रूहीतिवादिनम् ।
समन्तान्मिलिताः सर्वे कृतवन्तो हरिध्वनिम् ॥७९

अथोपावेशयद्रामानन्दरायो महाप्रभुम् ।
श्रमं दूरीचकारास्य वीजयन् व्यजनादिभिः ॥८०

ततः सर्वे नयन्तस्तं समुद्रस्य तटं प्रभुम् ।
स्नापयित्वा च भूयस्तं निजमावासमानयन् ॥८१
भोजनं कारयित्त्वा तं ते शय्यामध्यशाययन् ।
रामानन्दादयः: सर्वे जग्मुः स्वं स्वं गृहं ततः ॥८२
मयायं तावदुद्यानविहारः कथितः प्रभोः ।
वृन्दाबनमिति भ्रान्त्या प्रभुर्यत्र प्रविष्टवान् ॥८३
प्रलापवचनैः सार्द्धं तस्योन्माददशां प्रभोः ।
श्रीमत्स्वरूपगोस्वामी सविस्तरमवर्णयत् ॥८४

"तथाहि स्तवमालायां श्रीचैतन्यदेवस्तवे षष्ठः श्लोकः—

पयोराशेस्तीरे स्फुरदुपवनाली-कलनया
मुहुर्वृन्दारण्य-स्मरण-जनित-प्रेम-विवशः ।
क्वचित् कृष्णावृत्तिप्रचल-रसनो भक्तिरसिकः
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् ॥१३॥"

नान्तश्चैतन्यलीलानां ताः शक्यन्ते न लेखितुम् ।
दिङ्मात्रं दर्शयंस्तासां सूचनां विदधाम्यहम् ॥८५
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥८६

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्ड उद्यानविहारो नाम
पञ्चदशः परिच्छेदः ।

—०—

अन्त्यलीलायां षोड़शः परिच्छेदः

"वन्दे श्रीकृष्णचैतन्यं कृष्ण-भावामृतं हि यः ।
आस्वाद्यास्वादयन् भक्तान् प्रेम-दीक्षामशिक्षयत् ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वलम् ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१

इत्थं नीलाचले भक्तजनैः सार्द्धं महाप्रभुः ।
सर्वदा निवसन्नासीत् श्रीकृष्णप्रेम-विह्वलः ॥२

संवत्सरावसानेऽथ भक्ता गौड़-निवासिनः ।
पुनः पूर्ववदागत्य मिलिताः प्रभुणा सभम् ॥३

तैश्च सर्वैः समं तिष्ठन् प्राप्तोऽसौ वाह्यचेतनाम् ।
पूर्ववद्रथयात्रायां कृतवान्नर्त्तनादिकम् ॥४

आजगाम समेतस्तैः कालिदासाभिधानकः ।
कृष्णनाम विना नान्यत् स वचः किञ्चिदब्रवीत् ॥५

महाभागवतः सोऽभूत् सरलोदार-मानसः ।
कृष्णनामेङ्गितेनैवाचरत् कर्माखिलं वहिः ॥६

कदाचित् कोतुकेनाक्षान् यद्यदीव्यत्तदा वदन् ।
स हरे कृष्ण कृष्णेति चालयामास पाशकान् ॥७

स रघुनाथदासस्य पितृव्योऽभूत् सगोत्रजः ।
भुञ्जानो वैष्णवोच्छिष्टं वयसा स्थविरोऽभवत् ॥८

यावन्तो वैष्णवा आसन् गौड़देश-समुद्भवाः ।
तावतामेव सर्वेषामुच्छिष्टं भुक्तवानसौ ॥९

वयोज्येष्ठ-कनिष्ठांश्च ब्राह्मणानुत वैष्णवान् ।
उपदामुत्तमं वस्तु गृहीत्वा तानुपाययौ ॥१०

तेषां भोजनशेषान्न-पात्रं याचन् गृहीतवान् ।
यत्र क्वापि न तल्लेभे तत्र लुक्कायितोऽभवत् ॥११

वैष्णवेनाथ भुक्त्वा च दूरं क्षिप्ते च भाजने।
सोऽलक्षितस्तदादाय लिहन्नेव स भुक्तवान् ॥१२
शूद्रस्याप्युपदा-पाणि वैंष्णवस्य गृहं ययौ।
एवं तत्र निलीनः संस्तस्याप्युच्छिष्टमाश सः ॥१३
वैष्णवं झड़ुनामानं जात्या तं भूमिमालिनम्।
स रसालफलै रेवोपहारैरभ्युपेतवान् ॥१४
स तांस्तस्मै रसालोपहारान् यच्छन्नवन्दत।
भार्य्यीया अपि तस्याथ स नमस्कृतवान् पुनः ॥१५
भार्यया सहितः सोऽयमासीदुपविशंस्तदा।
कालिदासं निरीक्ष्यैव बहुमानमदर्शयत् ॥१६
कालिदासेन कुर्वाण इष्टगोष्ठीं कियच्चिरम्।
झड़ुठाकुर ऊचे तं मधुरं वचनं पुनः ॥१७
जात्याहं नीचवंश्योऽस्मि भवान् सर्वोत्तमोऽतिथिः।
भवतः सेवनं केन प्रकारेण करोम्यहम् ॥१८
मामाज्ञापय विप्रस्य गृहेऽन्नं दापयानि ते।
त्वया तत्र प्रसादान्ने प्राप्ते जीवाम्यहं ततः ॥१९
कालिदास उवाचाथ दयस्व मम ठाकुर।
पतितः पामरश्चास्मि त्वामेव द्रष्टुमागतः ॥२०
अधुनाहं पवित्रोऽस्मि प्राप्तवांस्तव दर्शनम्।
चरितार्थोऽस्मि संवृत्तो जीवनं सफलञ्च मे ॥२१
एकैव मम वाञ्छास्ति कृपां चेत् कुरुषे मयि।
मह्यं पादरजो देहि पादौ धेहि च मूर्ध्नि मे ॥२२
ठाकुरोऽथावदन्मैवं वचनं नैव युज्यते।
नीचजातिरहं त्वन्तु महावंशसमुद्भवः ॥२३
श्लोकान् वाचयता कालिदासेन श्रावितोऽथ सः।
झड़ुठाकुर आकर्ण्य लब्धवान् परमं सुखम् ॥२४

"तथाहि हरिभक्तिविलासस्य दशम-विलासे एकनवति-
तमाङ्कधृतं भगवद्वाक्यम्—

न मे भक्तश्चतुर्वेदी मद्भक्तः श्वपचः प्रियः ।
तस्मै देयं ततोग्राह्यं स च पूज्यो यथाह्यहम् ॥२॥

तथाहि श्रीमद्भागवते सप्तमस्कन्धे नवमाध्याये नवमः
श्लोकः—

विप्राद्द्विषड़्गुण-युतादरविन्द-नाभ-
पादारविन्द-विमुखात् श्वपचं वरिष्ठम् ।
मन्ये तदर्पित-मनो-वचनेहितार्थ-
प्राणं पुनाति स कुलं नतु भूरिमानः ॥३॥

तथाहि तत्रैव द्वितीयस्कन्धे त्रयस्त्रिंशाध्यायेऽष्टमः श्लोकः—

अहोवत श्वपचोऽतो गरीयान्
यज्जिह्वाग्रे वर्त्तते नाम तुभ्यम् ।
तेपुस्तपस्ते जुहुवुः सस्नुरार्य्या
ब्रह्मानूचुर्नाम गृणन्ति ये ते ॥४॥"

इति ठाकुर आकर्ण्य प्रोचे सत्यमिदं वचः ।
कृष्णभक्तिर्हि यस्यास्ति शास्त्रे श्रेष्ठः स कथ्यते ॥२५
नीचजातिरहं कृष्णभक्तिर्मे नापि वर्त्तते ।
अपरस्तादृगस्त्येव तथा शक्तिर्नमे पुनः ॥२६
कालिदासेऽथ तं नत्वा यातुमाज्ञाञ्च याचति ।
तमप्यनु व्रजन्नासीत्तदानीं झड़ुठाकुरः ॥२७
प्रतिप्रस्थाप्य तं तावत् स्वगृहं ठाकुरे गते ।
पथि तत्पादचिह्नानि न्यपतन् यत्र तत्र च ॥२८
कालिदासस्ततोधूलिमुद्गृह्याङ्गान्यलेपयत् ।
ततो लुक्कायितस्तस्थौ ठाकुरस्य गृहान्तिके ॥२९

झड़ुठाकुर आगत्य तान्याम्राणि विलोक्य च ।
मनसा कृष्णचन्द्राय सर्वान्येव समार्पयत् ॥३०
तस्य पत्नी वहिष्कृत्य कदली-वल्क-पेटकात् ।
तानि तस्मै ददौ सोऽति भुक्तवांस्तानि चूषयन् ॥३१
चूषं चूषं स तद्वल्क-पेटकेऽष्ठि-त्वचोऽक्षिपत् ।
भोजयित्वा च तं पत्नी स्वयं पश्चादभक्षयत् ॥३२
अष्ठि-त्वग्भिश्च तद्वल्क-पेटकं साप्यपूरयत् ।
वहिरुच्छिष्ठ-गर्त्ते तत् सर्वमेव निचिक्षिपे ॥३३
मुहुश्चूषयतो वल्कपेटकाष्ठित्वचश्च ताः ।
अभवत् कालिदासस्य प्रेमोल्लासो महान् हृदि ॥३४
सर्वेषां वैष्णवानां स गौड़देश-निवासिनाम् ।
कालिदासो गृहीत्वैवं भुक्तशेषमभक्षयत् ॥३५
यदा सोऽयं कालिदासो नीलाचलमुपागतः ।
तदा महाप्रभुस्तस्मिन् कृतवान्महतीं कृपाम् ॥३६
प्रभुर्द्रष्टुं जगन्नाथं जगाम प्रतिवासरम् ।
ययौ तमनु गोविन्दो वहन् जलकमण्डलुम् ॥३७
सिंहद्वारादुदीचीस्थ-कपाटान्तर्हितस्थले ।
सोपानस्य तले गर्त्तोद्वाविंशस्यैव वर्त्तते ॥३८
प्रक्षाल्यैव पदद्वन्द्वं तस्मिन् गर्त्ते महाप्रभुः ।
नित्यमेव जगाम श्रीजगन्नाथं निरीक्षितुम् ॥३९
आदिदेश च गोविन्दं प्रत्येवं नियमं प्रभुः ।
यथा कोऽपि न गृह्णीयान्मत्पादक्षालनाम्बिति ॥४०
तत्-पादाम्बु न केनापि प्राणिनाप्तुमशक्यत ।
केनापि छद्मना भक्तैरन्तरङ्गैरलभ्यत ॥४१
एकदा क्षालयत्येव तत्र पादौ महाप्रभौ ।
कालिदासः समागत्य तत्र हस्तावपातयत् ॥४२

एकाञ्जलिमितं वारि द्वयञ्जलं त्र्यञ्जलञ्च सः ।
पीतवानथ तं भूयः पानात् प्रभुरवारयत् ॥४३

नैवातःपरमप्येवं त्वया कार्य्यं पुनः पुनः ।
एतावत्-कालपर्य्यन्तं वाञ्छा ते पूरिता मया ॥४४

सर्वज्ञानां शिरोरत्नं चैतन्यः स्वयमीश्वरः ।
वैष्णवान् प्रति तच्छ्रद्धां मनसैव व्यबुध्यत ॥४५

तेन श्रद्धागुणेनैव तस्मिंस्तुष्टोऽभवत् प्रभुः ।
प्रसादं कृतवांस्तस्मिन्नेवमन्यैः सुदुर्लभम् ॥४६

अस्ति द्वाविंशतेरारोहणानां दक्षिणोपरि ।
जनस्यारोहतो वामे श्रीनृसिंहस्य विग्रहः ॥४७

तं नमस्कृतवान् देवं प्रत्यहं श्रीमहाप्रभुः ।
नमस्कुर्वन्निमौ श्लोकावपठच्च पुनः पुनः ॥४८

"तथाहि नृसिंहपुराणे—

नमस्ते नरसिंहाय प्रह्लादाह्लाददायिने ।
हिरण्यकशिपोर्वक्षः-शिला-टङ्क-नखालये ॥५॥

इतो नृसिंहः परतो नृसिंहो यतो यतो यामि ततो नृसिंहः ।
वहिर्नृसिंहो हृदये नृसिंहो नृसिंहमादिं शरणं प्रपद्ये ॥६॥"

ततो देवं जगन्नाथं निरैक्षत महाप्रभुः ।
गृहं गत्वा च मध्याह्नकृत्यान्ते भुक्तवांस्तदा ॥४८

कालिदासो वहिर्द्वारे तिष्ठन्नासीत् प्रतीक्षया ।
इति ज्ञात्वैव गोविन्दं सङ्केतेनावदत् प्रभुः ॥५०

गोविन्दः सर्वमज्ञासीदिङ्गितं तन्महाप्रभोः ।
प्रददौ कालिदासाय प्रभोरुच्छिष्टभाजनम् ॥५१

वर्त्तते महिमैतावान् वैष्णवोच्छिष्टभक्षणे ।
प्रापयत् कालिदासं स प्रभोस्तां चरमां कृपाम् ॥५२

अतस्तद्वैष्णवोच्छिष्टं भुङ्क्ष्व त्यक्त-घृणात्रपः ।
स्वाभीष्टं निखिलं कृत्यं त्वं तस्मादेव लप्स्यसे ॥५३
भवेन्महाप्रसादाख्यं कृष्णोच्छिष्टं पुनश्च तत् ।
महामहाप्रसादाख्यं भक्त-भुक्तावशेषितम् ॥५४
भक्तानां पादधूलिश्च तत्पाद-क्षालनाम्बु च ।
तद्भुक्तशेषमन्नञ्च त्रयमेतन्महाबलम् ॥५५
कृष्णप्रेमा भवत्येव त्रयस्यैतस्य सेवनात् ।
इत्येवं सर्वशास्त्राणि वदन्त्युच्चै र्मुहुर्मुहुः ॥५६
भूयो भूयस्ततो वच्मि भक्तैराकर्ण्यतामिदम् ।
श्रद्धया क्रियतां सर्वैरेतत्त्रितयसेवनम् ॥५७
उल्लासो जायते कृष्ण-नाम-प्रेम्णोरतस्त्रयात् ।
भवेत् कृष्णकृपा चात्र प्रमाणं कालिदासकः ॥५८
इत्थं नीलाचले तत्र महाप्रभुरवस्थितः ।
चकारालक्षितामन्यैः कालिदासे महाकृपाम् ॥५९
तस्मिन् वर्षे शिवानन्दो भार्य्यया सममाययौ ।
सहानयत् पुरीदासं कनिष्ठतनयञ्च सः ॥६०
तं पुत्रं सममादाय प्रभोः पार्श्वमुपागतः ।
कारयामास पुत्रेण प्रभोश्चरणबन्दनम् ॥६१
कृष्णं ब्रूहीत्यवादीत्तं भूयोभूयो महाप्रभुः ।
तथापि वालकः कृष्णनाम नासावुदैरयत् ॥६२
बहुधा चेष्टमानेऽपि शिवानन्दे शिशुं प्रति ।
असौ नोदीरयामास कृष्णनाम तु वालकः ॥६३
प्रभुणोक्तमहं नामाजिग्रहं जगतीजनैः ।
अपि स्थावर-पर्य्यन्तं कृष्णाख्यानमवादयम् ॥६४
इमं वाचयितुं कृष्णनाम नाहं समर्थये ।
इति स्वरूपगोस्वामी श्रुत्वोवाच हसन् मृदु ॥६५

कृष्णनाम-महामन्त्रं भवानस्मै प्रदत्तवान् ।
मन्त्रं प्राप्य न कस्यापि पुरतस्तं प्रकाशयेत् ॥६७
मनसैव जपेन्मन्त्रं मुखेनोदीरयेन्न तु ।
इयमस्य मनो-वाणी मयैवमनुमीयते ॥६७
अन्येद्युः प्रभुरूचेऽथ पुरीदास पठेति तम् ।
एकमुच्चारयामास स श्लोकं रचयंस्तदा ॥६८

"तथाहि कर्णपूरकृतः श्लोकः—

श्रवसोः कुवलयमक्ष्णोरञ्जनमुरसो महेन्द्र-मणि-दाम ।
बृन्दावन-रमणीनां मण्डनमखिलं हरिर्जयति ॥७॥"

सप्तवर्षीण एवासौ बालो नाध्यैष्ट किञ्चन ।
तथा वाचयति श्लोकमिति सर्वे चमत्कृताः ॥६९
महिमा ह्यनुकम्पायाः श्रीचैतन्य प्रभोरयम् ।
नाप्नुवन्त्यवधिं यस्य ब्रह्माद्या अपि देवताः ॥७०
भक्तास्ते चतुरो मासान् प्रभुणाथ समं स्थिताः ।
गौड़देशं गता भुय आदेशेन महाप्रभोः ॥७१
अवस्थितस्य तैः साकं बाह्यज्ञानमभूत् प्रभोः ।
अथ तेषु प्रयातेषु तस्योन्मादोऽप्यवर्द्धत ॥७२
तस्यास्फुरन्नहोरात्रं रूप-गन्ध-रसा हरेः ।
साक्षात् कृष्ण-तनु-स्पर्शमासीदनुभवन्निव ॥७३
एकदाथ जगन्नाथं द्रष्टुं याते महाप्रभौ ।
सिंहद्वारप्रतीहारो ववन्दे तमुपेयिवान् ॥७४
उक्तोऽसौ प्रभुणा क्वास्ते कृष्णः प्राणेश्वरो मम ।
कृष्णं मे दर्शयेत्युक्त्वा तमगृह्णात् करे प्रभुः ॥७५
स प्रत्यूचे तमत्रास्ते सोऽयं व्रजेन्द्रनन्दनः ।
भवानेतु मया सार्द्धं कारयिष्यामि दर्शनम् ॥७६

सोऽथ त्वं मे सखा कुत्र प्राणनाथोऽस्ति दर्शय ।
इत्युक्त्वा तं करे गृह्णन् मन्दिरालिन्दमाययौ ॥७७

तेनोचे दृश्यतां तावदेष श्रीपुरुषोत्तमः ।
नेत्रयोस्तृप्तिपर्य्यन्तं भवता दृश्यतामिति ॥७८

अथासौ गरुड़स्तम्भ-पश्चाद्भागे स्थितः प्रभुः ।
अपश्यत्तं जगन्नाथं संवृत्तं मुरलीमुखम् ॥७६

इमां लीलां निजग्रन्थे दासः श्रीरघुनाथकः ।
प्राकाशयत चैतन्य-स्तव-कल्पतराविति ॥८०

"तथाहि स्तवावल्यां चैतन्यस्तव-कल्पवृक्षे सप्तमः श्लोकः—

क्व मे कान्तः कृष्णस्त्वरितमिह तं लोकय सखे
त्वमेवेति द्वाराधिपमभिवदन्नुन्मद इव ।
द्रुतं गच्छ द्रष्टुं प्रियमिति तदुक्तेन धृततद्-
भुजान्तो गौराङ्गो हृदय उदयन्मां मदयति ॥८॥"

तदानीमेव गोपाल-वल्लभे भोग उद्यते ।
वाद्यं नैराजनं शङ्ख-घण्टादि-ध्वनिनोत्थितम् ॥८१

तस्मिन्नपसृते भोगे जगन्नाथस्य सेवकाः ।
महाप्रसादमादाय प्रभोः पार्श्वमुपाययुः ॥८२

स्रजयित्वा प्रभुं तेऽथ प्रसादं तत्करे ददुः ।
गन्धेनैव मनो माद्यत्यस्यास्वादस्य का कथा ॥८३

महार्घस्य प्रसादस्य तस्योत्कृष्टस्य वस्तुनः ।
प्रभुं भोजयितुं लेशमपि तेऽति चिचेष्टिरे ॥८४

रसनायां समर्प्याथ स्तोकं तस्य महाप्रभुः ।
शेषं बबन्ध गोविन्द-वसनस्याञ्चलेन च ॥८५

सुधा-कोटि-रसास्वादं प्राप्नुवन् विस्मितः प्रभुः ।
पुलकाञ्चित-सर्वाङ्गो जातोऽश्रु-प्लुत-लोचनः ॥८६

स्वादुतैतावती कस्मात् समायातात्र वस्तुनि ।
इह सञ्चारितं नूनं श्रीकृष्णस्याधरामृतम् ॥८७
इत्येवं मन्यमानस्य प्रेमावेशोऽभवत् प्रभोः ।
अथ वीक्ष्य जगन्नाथ-सेवकांस्तेन संवृतः ॥८८
लभ्यः सुकृतिना फेलालव इत्यूचिवान् मुहुः ।
प्रभुस्तैः सेवकैः पृष्टः कोऽर्थोऽस्येति वद प्रभो ॥८६
प्रभुणोक्तमिदं दत्तं यद्धि कृष्णाधरामृतम् ।
जित-पीयूष-सर्वस्व मिदं ब्रह्मादि-दुर्ल्लभम् ॥६०
योहि प्राप्नोति तुस्यैकं लवं स एव भाग्यवान् ॥६१
भाग्यात् सामान्यतस्तस्य प्राप्तिः सङ्घटते नहि ।
पूर्णा कृष्णकृपा यत्र स एवाप्तुं तमर्हति ॥६२
श्रीकृष्णस्य कृपाहेतुः पुण्यं सुकृतमुच्यते ।
तद् यस्यास्ति स आप्नोति फेलां, धन्यः स एव हि ॥६३
इत्युक्त्वा तान् प्रभुः सर्वान् गमनायान्वजिज्ञपत् ।
विलोक्योपान्नभोगञ्च निजमावासमागमत् ॥६४
ततो माध्याह्निकं कृत्यं कृत्वा भिक्षां समापयत् ।
सर्वदान्तश्च सस्मार श्रीकृष्णस्याधरामृतम् ॥६५
कुर्वन्नपि वहिः कृत्यं प्रेम्णोद्वेलमनाः सदा ।
मुहुः सञ्जातमावेशं कृच्छ्रात् संवृतवान् प्रभुः ॥६६
सान्ध्यं कृत्यं समाप्याथ पुनर्निजगणैः सह ।
नानाकृष्णकथारङ्गै र्न्यषीदन्निभृतं प्रभुः ॥६७
गोविन्दः प्रभुसङ्केतात् प्रसादांस्तानुपानयत् ।
प्रैरयद् भारतीपुर्य्योः कृते किञ्चित्ततः प्रभुः ॥६८
रामानन्दः स्वरूपश्च सार्वभौमादयो गणाः ।
ये तत्रासन् ददौ तेभ्यः प्रसादान् वण्टयन् प्रभुः ॥६६

तेषां सौरभमाधुर्य्यं समास्वाद्याखिला जनाः ।
अलौकिकात्तदास्वादाज्जाता विस्मयमोहिताः ॥१००
प्रभुणोक्तमिदं सर्वं वस्तु प्राकृतमेव हि ।
मरीचैत्त्वव-कर्पूर-लवङ्गैला-गुड़त्वचः ॥१०१
गव्यानि रसवासादीनीति प्राकृतवस्तुनः ।
निखिलस्यैव यः स्वादः स ज्ञातोऽस्त्यखिलैरपि ॥१०२
तस्यैव वस्तुनः स्वाद इयान् गन्धोऽप्यलौकिकः ।
इति यूयं समास्वाद्य तथा प्रत्येष्यथ ध्रुवम् ॥१०३
आस्वादो दूरमस्त्वस्य मनो गन्धेन माद्यति ।
स्वां माधुरीं विना विस्मार्य्यतेऽनेनान्यमाधुरी ॥१०४
वस्तुन्यत्रैव कृष्णस्याधर-स्पर्शोऽभवत्ततः ।
अधरस्य गुणास्तस्य सर्वे सञ्चारिता इह ॥१०५
अन्य-विस्मारणं गन्धस्वादौ सम्यगलौकिकौ ।
महच्चोन्मादनं कृष्णाधरस्यैव गुणा इमे ॥१०६
महता सुकृतेनैव सम्प्राप्ताः स्मोऽधुना वयम् ।
युष्माभिः क्रियतां भक्त्या महत्यास्वादनं ततः ॥१०७
सर्वेऽथास्वादयामासुः कुर्वन्तस्ते हरिध्वनिम् ।
बभूवुः स्वादयन्तश्च प्रेम्णा सोन्माद-मानसाः ॥१०८
आज्ञां दत्तवति प्रेमावेशादथ महाप्रभौ ।
श्लोकं वाचयितुं रामानन्दरायः प्रचक्रमे ॥१०९

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याये चतुर्दशः श्लोकः—

सुरतवर्द्धनं शोकनाशनं स्वरितवेणुना सुष्ठु चुम्बितम् ।
इतर-राग-विस्मारणं नृणां वितर वीर नस्तेऽधरामृतम् ॥६॥"

प्रभुस्तं श्लोकमाकर्ण्य सन्तोषं परमं गतः ।
श्लोकं पठितुमारेभे राधोत्कण्ठाप्रकाशकम् ॥११०

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गेऽष्टमः श्लोकः —

व्रजातुल-कुलाङ्गनेतर-रसालि-तृष्णा-हर-
प्रदीव्यदधरामृतः सुकृति-लभ्य-फेला-लवः ।
सुधाजिदहिवल्लिका-सुदल-वीटिकाचर्वितः
स मे मदनमोहनः सखि तनोति जिह्वास्पृहाम् ॥१०॥"
इत्युक्त्वैव प्रभुर्गौरो भावाविष्टेन चेतसा ।
अर्थं श्लोकद्वयस्यैवं विदधे प्रलपंस्ततः ॥१११

"यथा रागः"

हे नागर त्वदधरो मनसस्तनोश्च
क्षोभं करोति सुरते तनुते च लोभम् ।
हर्षं शुचञ्च दवयन्नपरं रसञ्च
विस्मारयन् भुवनमात्मवशं करोति ॥११२
ह्री-धीरता-निखिल-धर्महरोऽधरस्ते
नारीजनस्य हृदयं मदयन् प्रसह्य ।
जिह्वाञ्च कर्षति, पुनः स विचार्य्यते चेत्
सर्वं विभाति चरितं विपरीतमस्य ॥११३
नार्य्याः कथा किमुत, तद् ब्रुवती विलज्जे
हे नागरायमधरस्तव धृष्टराजः ।
पुंसोऽपि कर्षति स पाययितुं रसंस्वं
विस्मारयन्नपरवस्तुरसानपीष्टान् ॥११४
दूरेऽस्तु चेतन-कथा, स जड़ेषु धत्ते
चैतन्यधर्ममयि मायिवरोऽधरस्ते ।
शुष्केन्धनं तव स वेणुमिमं सुयोज्य
चित्तेन्द्रियैः स्वमपि पाययते सदैव ॥११५
वेणुश्च धृष्टपुरुषः पुरुषाधरं स
भूयः पिबन् व्रजवधूर्वदति स्वपानम् ।

हे गोपिकाः शृणुत यूयमिदं प्रसह्य
युष्माकमेव हि धनं सततं पिवामि ॥११६
यद्यस्ति वोऽत्र निजता-मतिरेत रुष्टा
धर्म-त्रपा-दर-कुलादरमप्यपास्य ।
त्यक्तं मया पिवत सुष्ठु न चेदभीतः
शश्वत् पिवाम्ययि परांश्च तृणाय मन्ये ॥११७
सञ्चारिताधर-सुधैकवलेन वेणु-
राकर्षति त्रिजगती-जन-मानसानि ।
धर्माद्धिया गृहगताश्च दुरासधैर्य्या
अस्मान् विड़म्वयति नैकविधं स एव ॥११८
नीवीमपि स्खलयतीह पुरोगुरूणां
केशेषु कर्षति नु नाशितधर्मलज्जाः ।
आनीय न स्तव करोति च पाददासी-
रेवं स नर्त्तयति नः कृतलोकहासम् ॥११९
इत्थं विगर्हयति नः परिशुष्कवंश-
खण्डोऽप्यसाविति दशां कृतवान्न ईशः ।
तूष्णीं विनास्य सहनं करवाम किंवा
नोच्चै र्हि रोदितुमिहार्हति चौरमाता ॥१२०
एवं तवाधर-चरित्रमथ कुप्रथा वा
सा श्रूयतां, त्वदधरेण च सङ्गतं यत् ।
भक्ष्यञ्च पेयमखिलं सुधया समानं
फेलेति नाम विदितं भुवने विभाति ॥१२१
तस्यालवं सुरगणा अपि नाप्नुवन्ति
प्रत्येतु को भुवन ईदृश-दम्भवाचि ।
नाम्ना यदेव सुकृतं बहुजन्म-पुण्यं
यस्यास्ति तल्लवममुं लभते स एव ॥१२२

तस्मादप्यधिकं सदम्भवचनं हे कृष्ण तच्छ्रूयतां
ताम्बूलं तव दन्तचर्वितमहो तत् कथ्यतेऽनर्घकम् ।
उद्गारोऽप्यथ तस्य विश्रुत-सुधा-सारांश इत्युच्यते
यात्येवास्य पतद्ग्रहैकफलतां गोपीमुखाम्भोरुहम् ॥१२३

एते ते निखिलास्तवैव कुटिलाचारा इति ज्ञायते
चातुर्य्यं त्यज तत् कथं हरसि नः
प्राणान् सखे वेणुना ।
नारीणां वध-दूषणं न भजसे हासार्थमेवात्मनो
देहि स्वाधरपल्लवामृतमिदं पानाय नः साम्प्रतम् ॥१२४

इत्येवं ब्रुवतो भावः प्रत्यावृत्तो महाप्रभोः ।
उत्कण्ठा ववृधे तस्य प्रेमकोपे प्रशाम्यति ॥१२५

अत्यन्तं दुर्ल्लभं तद्धि श्रीकृष्णस्याधरामृतम् ।
सफलं जीवितं तस्य येन तद्वस्तु लभ्यते ॥१२६

योग्यः सन्नपि चेत् कोऽपि तत् पातुं नाधिगच्छति ।
स निर्ल्लज्जो वृथा प्राणान् वहत्येव सुनिश्चितम् ॥१२७

अयोग्योऽपि जनः कश्चित् पातुमाप्नोति तत् सदा ।
योग्योऽप्यप्राप्य तल्लोभात् केवलं म्रियते पुनः ॥१२८

तत्तर्कयामि तस्यास्ति कस्यचित्तपसो बलम् ।
अयोग्यायापि दत्तो तत् कृष्णाधर-सुधा-फलम् ॥१२९

रामराय पुनर्ब्रूहि किञ्चिच्छुश्रूषते मनः ।
अथ विज्ञाय तद्भावं रायो गोपीवचोऽपठत् ॥१३०

"तथाहि श्रीमद्भागवते दशमस्कन्ध एकत्रिंशाध्याये नवमः
श्लोकः—

गोप्यः किमाचरदयं कुशलं स्म वेणु-
र्दामोदराधरसुधामपि गोपिकानाम् ।

भुङ्क्ते स्वयं यदवशिष्टरसं ह्रदिन्यो
हृष्यत्त्वचोऽश्रु मुमुचु स्तरवो यथार्य्याः ॥११॥"
इत्येवं श्लोकमाकर्ण्य भावाविष्टो महाप्रभुः ।
सौत्कण्ठं सप्रलापञ्च तस्यार्थं कृतवान् पुनः ॥१३१

"यथा रागः ।"

गोपेन्द्रनन्दन इह व्रजधाम्न्यवश्यं
यां काञ्चिदेष परिणेष्यति गोपिकानाम् ।
तस्मादिमा स्तदधरामृतमात्मवित्तं
मन्यन्त एव न तदन्यजनेन लभ्यम् ॥१३२

हे गोपिका वदत यूयमिदं विचार्य्य
तेपे तपः कतमदेष जपंश्च सिद्धम् ।
मन्त्रं पुनः कतममेव वसन् क्व तीर्थे
जन्मान्तरेषु कुशली सुकृती च वेणुः ॥१३३

कृष्णाधरामृतमिदं विजितामृतर्द्धि
जीवन्ति गोपतनया यदवाप्तुकामाः ।
तद्वेणुरेष पुरुषोऽपि जड़ोऽप्ययोग्यः
पेपीयते सततमित्यतिचित्रमेतत् ॥१३४

तत्-स्वामिनीरकथयन् पिबति प्रसह्य
विज्ञापयत्यपि पिबन् कृतहूतिरुच्चैः ।
पश्यास्य दैवज-बलानि तपःफलानि
तत्-पीत-शेषमवलेढ़ि महाजनोऽपि ॥१३५

कालिन्दिका वहति मानसगङ्गयात्र
कृष्णेन ते अभिषवाय वगाह्यमाने ।
लोभातिरेकवशतः पिबतः सहर्ष-
मुच्छिष्टकं तदधरामृतमेव वेणोः ॥१३६

नार्य्यो पुनः किमुत ते तरवोऽपि सर्वे
तीरे परोपकृतिनश्च तपश्चरन्ति ।
आकृष्य पद्भिरवशेषरसं ह्रदिन्योः
कस्मात् पिबन्ति नहि बोद्धुमलं भवामः ॥१३७

आर्य्यस्य पुत्रमुत पौत्रमिव स्वजातिं
मत्वाङ्कुरैः पुलकिताः कुसुमै र्हसन्तः ।
मुञ्चन्ति तेऽश्रु मकरन्द-मिषात् स्ववंशा-
ज्जाते हि वैष्णवजने भवति प्रहर्षः ॥१३८

वेणुः किं तप आतनोदिति वयं ज्ञात्वैव तप्यामहे
नार्य्यो योग्यतमा वयं पुनरतीवायोग्य एवास्त्यसौ ।
यन्न प्राप्य वयं हि दुःखनिहता स्तेनैव तत् पीयते
तत्सोढ़ुं वयमक्षमा स्तदधुना कुर्मस्तपोनिर्णयम् ॥१३९

इत्येवं प्रलपन् स गौरभगवान् प्रेम्णाभवद्विह्वलः
सर्वैर्भक्तजनैः स्वरूपसहितः श्रीरामरायान्वितः ।
भावावेशवशेन जातु कृतवान् गीतं पुन र्नर्त्तनं
मूर्च्छां जातु गतोऽयमेवमनयद्रात्रिन्दिवं श्रीप्रभुः ॥१४०

रूप-स्वरूप-रघुनाथ-सनातनानां
स्वाभीष्टपादयुगलानि निधाय मूर्द्ध्नि ।
चैतन्यकृष्णचरितामृतमेतदाह
दीनोऽतिहीन-मतिकः खलु कृष्णदासः ॥१४१

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे कालिदासप्रसाद-
विरहोन्मादप्रलापो नाम षोड़शः परिच्छेदः ।

—०—

अन्त्यलीलायां सप्तदशः परिच्छेदः

"लिख्यते श्रीलगौरेन्दोरत्यद्भुतमलौकिकम् ।
यैर्दृष्टं तन्मुखाच्छ्रुत्वा दिव्योन्माद-विचेष्टितम् ॥१॥

भूयो जयतु चैतन्यो नित्यानन्दो जयत्यलम् ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
एवमेव तदा प्रेमावेशेन श्रीमहाप्रभुः ।
चकारोन्मादचेष्टाञ्च प्रलापांश्च दिवानिशम् ॥२
एकदाथ स्वरूपेण रामानन्देन च प्रभुः ।
कृष्णालापप्रसङ्गेन रात्रेरर्द्धमयापयत् ॥३
एवं यो यः प्रभोर्भावः प्रादुरासीद् यदा यदा ।
स्वरूपेण तदा गीतं गीतं तस्यानुरूपकम् ॥४
श्लोकान् विद्यापते र्गीतगोविन्द-चण्डिदासयोः ।
भावानुरूपकान् रामानन्दरायोऽप्यवाचयत् ॥५
महाप्रभुरपि श्लोकान् स्वयमेवान्तरान्तरा ।
सप्रलापं पठंस्तेषामर्थं व्याख्यातवानथ ॥६
इत्थं बहुविधैर्भावै र्निशीथे समुपस्थिते ।
श्रीप्रभुं शाययित्वोभौ जग्मतुस्तौ निजालयम् ॥७
गम्भीराद्वारमाश्रित्य गोविन्दे शयिते ततः ।
उच्चैः सङ्कीर्त्तनं सर्वां रजनीं कृतवान् प्रभुः ॥८
श्रीकृष्ण-वेणु-सङ्गीतमकस्माच्छ्रुतवान् प्रभुः ।
भावावेशवशेनैव तत्रैव प्रस्थितस्ततः ॥९
द्वारत्रयं तथैवासीत् कपाटैस्तैः समावृतम् ।
ततो वहिर्जगामासौ भावाविष्टो महाप्रभुः ॥१०
कालिङ्गयो धेनवस्तस्थुः सिंहद्वारस्य दक्षिणा ।
तत्र गत्वा पतन्नासील्लुप्तसंज्ञो महाप्रभुः ॥११

इतोऽश्रुत्वैव गोविन्दस्तदा कण्ठस्वरं प्रभोः ।
द्वाःकपाटावपावृत्य स्वरूपं तं समाह्वयत् ॥१२

ततः स्वरूपगोस्वामी सर्वैं र्भक्तजनैः सह ।
दीपं प्रज्वाल्य बभ्रामान्विष्यन् प्रभुमितस्ततः ॥१३

समन्तात् स तमन्विष्य सिंहद्वारमुपागतः ।
प्राप्तवांस्तत्र धेनूनां तासां मध्ये महाप्रभुम् ॥१४

उदरान्तः प्रविष्टाङ्घ्रि-हस्तः कूर्माकृतिः प्रभुः ।
उद्वमत्-फेन-पुञ्जास्यः सास्राक्षः पुलकाञ्चितः ॥१५

अचैतन्यः पतन्नासीत् कुष्माण्डफलवत्तदा ।
वहिर्जड़तयाक्रान्तोऽप्यन्तरानन्द-विह्वलः ॥१६

प्रभोरङ्गानि जिघ्रन्त्यः समन्ताद्धेनवः स्थिताः ।
तत्यजुर्नैव तत्-सङ्गमपि दूरापसारिताः ॥१७

कृतेऽपि बहुधा यत्ने नोदिता तस्य चेतना ।
तदा ते प्रभुमुत्थाप्य भक्ता आनिन्युरालयम् ॥१८

कृष्णसंकीर्त्तने प्रोच्चैः कृतेऽथ श्रवसोः प्रभोः ।
सुचिरेणैव कालेन चेतनां लब्धवान् प्रभुः ॥१६

अथ चैतन्यमाप्तस्य हस्तपादं प्रकाशितम् ।
विग्रहः पूर्ववत्तस्य पुनः स्वाभाविकोऽभवत् ॥२०

उत्थाय प्रभुरासीनः क्षिपन्दृष्टिमितस्ततः ।
ऊचे स्वरूपमानीतो युष्माभिः क्वाहमस्मि भोः ॥२१

वेणुनादमहं श्रुत्वा वृन्दावनमहं गतः ।
गोष्ठे नन्दात्मजं वेणुं वादयन्तं व्यलोकयम् ॥२२

वेणुवादन-सङ्केताद्राधां कुञ्जगृहागताम् ।
दृष्ट्वा कृष्णोऽगमत् कुञ्जं प्रति क्रीड़ितुमिच्छया ॥२३

राधिकामथ गच्छन्तीमहमप्यनुयातवान् ।
हृतं मे श्रवसोर्युग्मं तस्या भूषणशिञ्जितैः ॥२४

सखीभिः सह कुर्वत्या विलासं हास-नर्मणी ।
कण्ठोक्त-ध्वनिना तस्याः कर्णावुल्लसितौ मम ॥२५

तदानीमेव युष्माभिः कृत्वा कोलाहलं भृशम् ।
सबलात्कारमादाय समानीतोऽहमत्र हि ॥२६

तां पीयूषसमां वाणीं श्रोतुं नार्हाम्यहं पुनः ।
श्रवणं न लभे भूयस्तद्वंशी-भूषण-ध्वनेः ॥२७

प्रभुः स्वरूपमूचेऽथ भावावेशात् सगद्गदम् ।
म्रियेते तृष्णया कर्णौ श्राव्यतां मे रसायनम् ॥२८

अथ स्वरूपगोस्वामी ज्ञात्वा भावं महाप्रभोः ।
एकं भागवतश्लोकमपठन्मधुर-स्वरम् ॥२९

"तथाहि श्रीमद्भागवते दशमस्कन्ध ऊनत्रिंशाध्याये
चत्वारिंशः श्लोकः—

कास्त्र्यङ्ग ते कलपदामृत-वेणु-गीत-
सम्मोहितार्य्य-चरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्य-सौभगमिदञ्च निरीक्ष्य रूपं
यद् गो-द्विज-द्रुम-मृगाः पुलकान्यबिभ्रन् ॥२॥"

इत्याकर्ण्य प्रभु र्गोपीभावावेश-वशं गतः ।
तं श्रीभागवतश्लोकं व्याख्यातुमुपचक्रमे ॥३०

"यथा रागः"

गोपीभाव-वशीकृतेन मनसा रासं प्रविष्टः प्रभुः
कृष्णस्य स्मित-सान्त्व-नर्मवचसा सोपेक्षमुत्सारणम् ।
मत्त्वा सत्यतयात्मनोऽवददिदं सोल्लुण्ठनं तं रुषा
निश्चित्योत्तरमर्पय त्वमधुना हे नागराधीश्वर ॥३१

वसन्ति यावत्य इह त्रिलोक्यां
नार्य्योऽनुरूपास्तव नागरेन्द्र ।

Bhaja Nitai Gour Radhe Syam Japa Hare Krishna Hare Ram.

वेणुस्तवासौ ननु तावतीनां
नाकर्षति द्राक्कतमां वद त्वम् ॥३२

यावत्यो वेणुना ते सुमधुररुतयो व्याहृता दूतिकास्ता-
योगिन्यः सिद्धमन्त्रा इव झटिति मनो
योषितां मोहयन्ति ।
उत्कण्ठां वर्द्धयन्त्यः सुजन-कुल-
पथाच्च्यावयन्त्यः पुनस्ता-
स्त्वामानीयोपहारानिव ददति ते सादरं
पाणिपद्मे ॥३३

धर्मो वेणु-सहायकेन भवतास्माभिः परित्याजितो
निक्षिप्यैव कटाक्ष-काम-विशिखाँल्लज्जा-दरौ मोचितौ ।
रुष्ट्वा सम्प्रति कथ्यते पति-परित्यागे महद्दूषण
मस्माकं वत धार्मिकेण च वयं धर्मं सुशिक्ष्यामहे ॥३४

अन्यद्वचोऽपरमथो हृदयं वहिश्च
कार्य्यं पृथक् छठजनस्य हि चातुरी सा ।
त्वं वेत्थ नर्म रमणीजनसर्वनाश-
स्तेनैव सम्भवति तत्त्यज कौतुकानि ॥३५

वंशी-निनाद-मथितामृत-कण्ठजात-
सान्त्वामृताभरण-शिञ्जनकामृतानि ।
नारी कथं तदमृत-त्रय-कृष्ट-कर्ण-
प्राणान्तरा निजवशे हृदयं निधत्ताम् ॥३६

इत्युक्त्वासौ मानभारेण गौरो
भावैर्भङ्गैः प्लाव्यमानो निमग्नः ।
उत्कण्ठाढ्यौ राधिकोक्तं पठित्वा
व्याख्याति स्मास्वादयन् कृष्णलीलाम् ॥३७

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे पञ्चमः श्लोकः—

नदज्जलद-निस्वनः श्रवण-हारि-सच्छिञ्जितः
सनर्म-रस-सूचकाक्षर-पदार्थ-भङ्ग्युक्तिकः ।
रमादिक-वराङ्गना-हृदय-हारि-वंशी-कलः
स मे मदनमोहनः सखि तनोति कर्णस्पृहाम् ॥३॥

अस्यार्थः । यथा रागः ।"

निर्घोषं नववारिदस्य जयति श्रीकृष्णकण्ठध्वनि-
र्गम्भीरो मधुरश्च लज्जयति तत् पुंस्कोकिलानां कुलम् ।
एकेनापि कणेन तस्य निखिलाः कर्णा जगद्वासिना-
मात्मन्येव निमज्जिता न पुनरावृत्तौ क्षमन्ते ततः ॥३८

कमुपायं विदधे वदाधुना सखि तस्य ध्वनिना हृते मम ।
श्रवसी न तमाप्नुवती पुनस्तृषया मृत्युपथेन धावतः ॥३९

तन्मञ्जीरक-किङ्किणी-ध्वनि-जिता हंसास्तथा सारसा-
लज्जन्ते चटका अपि प्रविचलत्तत्-कङ्कणानां क्वणात् ।
तत्तद्भूषण-शिञ्जितं सकृदपि प्राप्ता भवेद् या श्रुति-
स्तां शश्वत्तदधिष्ठितां नहि विशेदन्योध्वनिः कश्चन ॥४०

तस्य श्रीमुख-भाषितामृतमहो स्वर्गामृतादुत्तमं
कर्पूरेण शुचि-स्मितेन मिलितं लोभास्पदं योषिताम् ।
नानाभाव-रसान् प्रकाशयति तच्छब्दार्थशक्तिद्वयी,
प्रत्येकञ्च तदक्षराणि विलसन्नर्मश्रियं बिभ्रति ॥४१

जीवत्यमुष्य त्रुटिमात्र-जीवनं
तस्याशया कर्ण-चकोरयुग्मम् ।
तद्भाग्यवान् जातु लभेत नान्यो
जनास्तद प्राप्य तृषा म्रियन्ते ॥४२

यास्तद्वेणु-कलामृतं सकृदपि श्रोत्रैः पिबन्त्यङ्गना-
स्तासां तत्क्षणमेव सीदति मनः शैथिल्यमाप्नोति च ।

नीव्योऽपि स्खलिताः पतन्त्यनूपदं दास्यो विना वेतनं
ता भूत्वास्य च वातुलप्रकृतयो धावन्ति तत्सन्निधौ ॥४३
कृष्णस्य वेणु-कलनादमवेत्य लक्ष्मी-
रप्यायया तमनु सङ्गममासुकामा ।
न प्राप्य सा तमतिवर्द्धित-तृट्तरङ्गा
तीव्रं तपश्चरितवत्यपि तं न लेभे ॥४४
सौभाग्यवन्त इह कर्णपुटैः प्रपूर्य्य
तन्निस्वनामृतचतुष्टयमापिबन्ति ।
यं कर्णमाविशति तन्न कथं स जातः
सच्छिद्रितेन सदृशो हि वराटकेन ॥४५

एवं निरालम्ब-हृदः प्रलापादुद्वेग आसीदुदितः प्रभोर्हि ।
औत्सुक्य-भीति-स्मृतयो विषादो मति
धृतिश्चेत्यभवंस्तु भावाः ॥४६
यो भावशावल्य-वशेन राधया
प्रोक्तोऽथ लीलाशुक-हृद्-विभासितः ।
श्लोकं पठंस्तं कृतवांस्तथा प्रभु
रुन्माद-शक्त्या विवृतार्थमद्भुतम् ॥४७

"तथाहि श्रीकृष्णकर्णामृते द्वाचत्वारिंशः श्लोकः—

किमिह कृणुमः कस्य ब्रूमः कृतं कृतमाशया
कथयत कथामन्यां धन्यामहो हृदयेशयः ।
मधुर-मधुर-स्मेराकारे मनो-नयनोत्सवे
कृपण-कृपणा कृष्णे तृष्णा चिरं बत लम्बते ॥४॥"

यथा रागः ॥"

उद्वेग-चञ्चल-मना विरहेण तस्य
न प्राप्त्युपायमपि चिन्तयितुं क्षमास्मि ।

युष्मास्वपीत्थमविवेकहृतासु सख्यः
पृच्छामि कां नु कमुपायमहं करोमि ॥४८
हा हा करोमि कमुपाय महो नु सख्यः
किंवा करोम्यहमितः क्व पुनः प्रयामि ।
प्राप्स्यामि वाञ्छिततमं क्व गता नु कृष्णं
प्राणाः प्रयान्ति मम माधवमन्तरेण ॥४६

क्षणात् स्थिरीकृत्य मनः प्रभुर्यद् व्यचारयत् कृत्यविनिर्णयाय ।
तत्पिङ्गलोक्ति-स्मरणेन तस्य मतिः प्रबुद्धेत्युचितं हि वक्तुम् ॥५०
नैराश्यतः स्यात् सुखमित्युपायस्त्यजामि कृष्णस्य ततोऽहमाशाम् ।
सख्यो विहायाप्रिय-तत्प्रसङ्गं ब्रूतापरं येन स विस्मृतः स्यात् ॥५१
इत्येव ब्रुवतः प्रभोः स्मृतिगतः कृष्णोऽस्फुरच्चेतसि
राधा-भाव-गतः सविस्मयमनाः प्रोचे प्रभुस्ताः सखीः ।
यं त्यक्तुं मम मानसं प्रयतते सोऽयं शयानोऽत्र मे
चित्ते तिष्ठति सर्वदा कथमपि त्युक्तुं न शक्नोमि तम् ॥५२
राधा-प्रेम जगद्विलक्षणमिदं तत्स्वभावो हि कृष्णे
साक्षात् काम इति भ्रमं जनयति त्रासस्ततो जायते ।
तत्त्रासादवदत् प्रभु र्जगदिदं यो मारयत्येष मे
मारोऽन्तः प्रविशन् ददात्यवसरं तद्विस्मृतौ न क्वचित् ॥५३
औत्सुक्ये विजितान्यभावबलके चेतः स्वराज्यं श्रिते
चेतो लालसितं स्थितं नच वशे दुःखान्निनिन्द प्रभुः ।
दीनं वाममिदं विनश्यति विना कृष्णामृतं मीनवत्
स्मेरास्यं द्विगुणां तृषां वितनुते हृन्नेत्रसन्तर्पणम् ॥५४

हा कृष्ण जीवनधनाब्जदलायताक्ष
हा दिव्य-सद्गुण-गणैक-महासमुद्र ।
हा श्यामसुन्दर हिरन्मय-पीत-वासो
हा नाथ रासरसिकेश्वर नागरेन्द्र ॥५५

त्वां कुत्र लप्स्ये वद तत्र याम्यहमिति ब्रुवन् प्रस्थितवान् प्रभुश्च तम्।
स्वरूप उत्थाय तदैव वक्षसा प्रभुं गृहीत्वा स्वपदे न्यषादयत् ॥५६

क्षणात् प्रभुर्लब्ध-संज्ञः स्वरूपं व्याजिज्ञपद् गीतयेऽथो तदास्यात्।
गीतामृतं गीतगोविन्द-विद्यापत्योः श्रुत्वा तृप्त-कर्णोऽभवच्च ॥५७

एवमेवानयत् सर्वमहोरात्रं महाप्रभुः।
प्रलाप-बचनैः कुर्वन् सर्वदोन्मादचेष्टितम् ॥५८
एकैकस्मिन्दिने भाव-विकारा येऽभवन् प्रभोः।
वर्णयं स्तान् सहस्रास्योऽनन्तोऽप्यन्तं न गच्छति ॥५९
तत्तेषां वर्णना दीन-जीवेन क्रियतां कथम्।
दिङ्मात्रमेव तच्छाखाचन्द्रन्यायेन दर्श्यते ॥६०
मनः कर्णौ च तृप्यन्ति जनस्यैतान् हि शृण्वतः।
निगूढ़ालौकिक-प्रेमचेष्टा-ज्ञानञ्च जायते ॥६१
निगूढ़स्याद्भुतप्रेम्णो माधुरीमहिमावधिम्।
स्वयमास्वादयन्नेवं दर्शयामास तं प्रभुः ॥६२
प्रभो र्दयालुताश्चर्य्यांश्चर्य्या चास्य वदान्यता।
तथा दयालुर्दाता च नैवान्यः श्रूयते भुवि ॥६३
भजध्वं सर्वभावेन चैतन्य-चरणौ जनाः।
तस्मादेव हि लप्स्यध्वे कृष्णप्रेमसुधाधनम् ॥६४
कथितैषा मया कूर्माकृतिलीला महाप्रभोः।
तत्रोन्मादप्रलापैस्तैरुक्तश्चोन्मादचेष्टितम् ॥६५
लीलेयं रघुनाथेन दासेन निजपुस्तके।
प्रकाशितास्ति चैतन्यस्तवकल्पतराविति ॥६६

"तथा हि स्तवावल्यां चैतन्यस्तवकल्पवृक्षे पञ्चमः श्लोकः—

अनुद्घाट्य द्वारत्रयमुरु च भित्तित्रयमहो
विलङ्घ्योच्चैः कालिङ्गिकसुरभिमध्ये निपतितः।

तनूद्यत्सङ्कोचात् कमठ इव कृष्णोरुविरहाद्
विराजन् गौराङ्गो हृदय उदयन्मां मदयति ॥५॥"
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्य-चरितामृतम् ॥६८

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे कूर्माकारानुभावोन्मादप्रलापो नाम सप्तदशः परिच्छेदः ।

—०—

अन्त्यलीलायामष्टादशः परिच्छेदः

"शरज्ज्योत्स्ना-सिन्धोरवकलनया जात-यमुना-
भ्रमाद्धावन् योऽस्मिन् हरि-विरह-तापार्णव इव ।
निमग्नो मूर्च्छालः पयसि निवसन् रात्रिमखिलां
प्रभाते प्राप्तः स्वैरवतु स शची-सूनुरिह वः ॥१॥"

मुहुर्जयतु चैतन्यो नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
एवं नीलाचले वासं कुर्वन् रात्रिन्दिवं प्रभुः ।
आसीदाप्लवमानोऽथ कृष्ण-विच्छेद-सागरे ॥२
अथासौ शारद-ज्योत्स्ना-स्नाताः सर्वाश्च शर्वरीः ।
व्यचरत् सममादाय गणान् स्वीयान्महाप्रभुः ॥३
पश्यन् सकौतुकं प्रत्युद्यानं भ्राम्यंश्च सर्वतः ।
शुश्राव रासलीलाया गीतिश्लोकौ पपाठ वा ॥४
प्रेमावेश-वशाज्जातु गीतिं गायन्ननर्त्त सः ।
भावाविष्टोऽनुजह्ने च रासलीलाः कदाचन ॥५
प्रभुर्धावितवान् जातु भावोन्मादादितस्ततः ।
कदाचिन्मूर्च्छितो भूमौ पपात च लुलोठ च ॥६

पठन् वा कर्णयन् रासलीलायाः श्लोकमेव सः।
तस्य व्याख्यातवानर्थं स्वयमेव हि पूर्ववत् ॥७

इत्थं श्रीरासलीलायाः श्लोकानां तत्र तावताम्।
अर्थं प्रकाशयन् हर्षं शोकञ्च प्राप्तवान् प्रभुः ॥८

श्लोकानां तावतामर्थान् विकारांश्च महाप्रभोः।
सर्वान् वर्णयतो ग्रन्थो भविष्यत्यतिविस्तृतः ॥९

वर्षाणि द्वादशाभूवन् या या लीलाः प्रतिक्षणम्।
नात्र ता लिखिता ग्रन्थे मया बाहुल्य-शङ्कया ॥१०

यथा दिग्दर्शनन्यायात् पूर्वं दर्शितवानहम्।
तान् विकारान् प्रलापांश्च तथात्राप्यवगच्छत ॥११

वक्तुं चेद् यततेऽनन्तः सहस्रेण मुखैरपि।
तदैकाहिकलीलानामन्तं प्राप्तुं स नार्हति ॥१२

लिखति श्रीगणेशश्चेत् स्वयं कोटियुगावधि।
तदैकाहिकलीलानामन्तं सोऽपि न विन्दति ॥१३

भक्त-प्रेम-विकारांस्तान्दृष्ट्वा कृष्णोऽपि मुह्यति।
यदन्तं सोऽपि नाप्नोति तुच्छस्यान्यस्य का कथा ॥१४

भक्तानां या दशाः प्रेम्णो गति-प्रकृतयश्च याः।
विकार-सुख-दुःखानि यानि यावन्ति तान्यपि ॥१५

स्वयं कृष्णोऽपि विज्ञातुं सम्यङ् न क्षमते यतः।
तान्यास्वादयितुं भक्तभावं स्वीकुरुते ततः ॥१६

कृष्णं नर्त्तयति प्रेमा तद्भक्तानखिलानपि।
नृत्यत्येव स्वयं प्रेमा युगपन्नृत्यति त्रयम् ॥१७

योहि वर्णयितुं प्रेमविकारानतिचेष्टते।
वामनस्य तुलां धत्ते स चन्द्रं धर्त्तुमिच्छतः ॥१८

कणमात्रं यथा वायुः समुद्रस्य हरत्यपाम्।
कृष्णप्रेम्णः कणामात्रं तथा जीवः स्पृशत्यसौ ॥१९

अनन्ताः प्रेम-कल्लोला उत्तिष्ठन्ति प्रतिक्षणम् ।
तुच्छो जीवः कथं तेषामन्तं विज्ञातुमर्हति ॥२०

भगवान् कृष्णचैतन्यो यमास्वादयति स्वयम् ।
स्वरूपाद्या गणा एव तं प्रेमाणं विदुः परम् ॥२१

जीवः सन्नपि यस्तस्य वर्णनाय प्रचेष्टते ।
पवित्रयितुमात्मानं कणमात्रं स्पृशत्यसौ ॥२२

पठित्वा रासलीलायाः सर्वान् श्लोकानथ प्रभुः ।
परिशेषे जलक्रीड़ाश्लोकमेवमवाचयत् ॥२३

"तथाहि श्रीमद्भागवते दशमस्कन्धे त्रयस्त्रिंशाध्याये त्रयोविंशः श्लोकः—

ताभिर्युतः श्रममपोहितुमङ्ग-सङ्ग-
घृष्ट-स्रजः स कुचकुङ्कुम-रञ्जितायाः ।
गन्धर्वपालिभिरनुद्रुत आविशद् वाः
श्रान्तो गजीभिरिभराड़िव भिन्नसेतुः ॥२॥"

एवं परिभ्रमन्नेव परितः श्रीमहाप्रभुः ।
अकस्माज्जातिकोद्यानादवालोकत सागरम् ॥२४

चन्द्रिकोद्भासितोच्छ्वासास्तरङ्गास्ते समुज्ज्वलाः ।
जाज्वल्यमानया दीप्त्या यामुना इव मेनिरे ॥२५

यमुनेयमिति भ्रान्त्या गतो धावन्महाप्रभुः ।
उत्प्लुत्य न्यपतत् सिन्धुजले सर्वैरलक्षितः ॥२६

पतन्नेव गतो मूर्च्छां नैव किञ्चिद्विवेद सः ।
तरङ्गै र्मज्जितो जातु कदाचिच्चोदमज्ज्यत ॥१७

तरङ्गैरुह्यमानोऽसौ शुष्केन्धनमिवाभ्रमत् ।
श्रीचैतन्यस्य लीलेयं विज्ञातुं केन शक्यते ॥२८

तरङ्गा नीतवन्तस्तं कोणार्काभिमुखं प्रभुम् ।
जातु तं मज्जयामासु र्निन्युरुत्प्लाव्य जातु च ॥२९

जलकेलिं करोत्येष कृष्णो गोपीगणैः सह ।
यमुनायामिहेत्येवं रङ्गे मग्नोऽभवत् प्रभुः ॥३०
अथेतस्तमपश्यन्तः स्वरूप-प्रमुखागणाः ।
बभूवुश्चकितास्तत्र प्रभुः क्व गतवानिति ॥३१
मनो-वेगाज्जगामासौ न केनापीह लक्षितः ।
प्रभोरदर्शनादेवं तेऽखिलाः समशेरत ॥३२
किमु द्रष्टुं जगन्नाथं प्रभु र्देवालयं गतः ।
उद्यानेऽन्यत्र वोन्मादान्मूर्च्छितः पतितोऽस्ति किम् ॥३३
गुण्डिचा-मन्दिरं किन्नु स नरेन्द्रसरोऽगमत् ।
चटकं गिरिमाहोस्वित् कोणार्कं प्रति धावति ॥३४
इत्युक्त्वा बभ्रमुः सर्वे तदन्वेषण-तत्पराः ।
अथायाताः समुद्रस्य तीरं कतिपये जनाः ॥३५
भ्रमतामेवमन्विष्य तेषां रात्रिरवासदत् ।
निश्चिक्युस्ते प्रभुर्लीलावसानं कृतवानिति ॥३६
प्रभुविच्छेदत स्तेषां प्राणा देहाद् गता इव ।
चित्ते नान्यत् किमप्यासीदनिष्टाशङ्कया विना ॥३७

"तथाह्यभिज्ञानशकुन्तल-नाटके चतुर्थाङ्के—

अनिष्टाशङ्कीनि बन्धुहृदयानि भवन्ति हि ॥३॥"

अथाब्धेस्तीरमागत्य विदधुस्ते विचारणाम् ।
चिरायुं गिरिमुद्दिश्य कतिचित् प्रस्थिता जनाः ॥३८
स्वरूपो दिशि पूर्वस्यां ययौ कैश्चिज्जनैः सह ।
सिन्धोस्तीरेषु नीरे च चकारान्वेषणं प्रभोः ॥३९
विषाद-विह्वलाः सर्वे जाता एवं विचेतनाः ।
प्रभु-प्रेम्णा विचेरुस्ते कुर्वन्तोऽन्वेषणं प्रभोः ॥४०
तैरायान् जालिकः कोऽपि जालस्कन्धोऽवलोकितः ।
गायन्नृत्यन् हसन् क्रन्दन् हरिर्हरिरिति ब्रुवन् ॥४१

जालिकस्य तथा चेष्टां दृष्ट्वा सर्वे चमत्कृताः ।
श्रीमत्स्वरूपगोस्वामी तमेवं पृष्टवानथ ॥४२
जालिक ब्रूहि दृष्टोऽस्यां दिशि कोऽपि जनस्त्वया ।
कथमेषा तवावस्था जातेति ब्रूहि कारणम् ॥४३
जालिकः प्रत्युवाचैवं न दृष्टोऽत्र नरो मया ।
कृष्यमाने मया जाले शव एकः समुत्थितः ॥४४
महान् मत्स्योऽयमित्येवं मत्वा यत्नान्मयोद्धृतः ।
पश्यतस्तं शवं चित्तो मम जातं महद्भयम् ॥४५
ततस्तं मोचयन् जालात्तदङ्गं स्पृष्टवानहम् ।
स्पर्शमात्रेण भूतोऽसौ हृदयं मे प्रविष्टवान् ॥४६
वेपथु र्मे भयाज्जातो नेत्राभ्याञ्चाश्रुनिर्झरः ।
वाणी सगद्गदा सर्वे रोमाञ्चाश्चोदितास्तनौ ॥४७
ब्रह्मदैत्योऽथवा भूतः सोऽयं वक्तुं न शक्यते ।
जनानां पश्यतामेव शरीरं प्रविशत्यसौ ॥४८
तस्य दीर्घं वपुः पञ्च-सप्त-हस्तप्रमानकम् ।
एकैकं हस्तपादञ्च त्रिहस्तपरिमाणकम् ॥४६
लम्बमानानि चर्माणि शिथिलेष्वस्थि-सन्धिषु ।
देहे तिष्ठन्ति न प्राणा स्तथा पश्यत एव मे ॥५०
शवरूपं गृहीत्वासौ तिष्ठत्युत्तानलोचनः ।
कदाचित् कृतहुङ्कारो जातु तिष्ठत्यचेतनः ॥५१
साक्षाद्दृष्टोऽस्मि युष्माभिः स भूतो मां प्रविष्टवान् ।
दारापत्यानि जीवेयुः कथङ्कारं मृते मयि ॥५२
तस्य भूतस्य वृत्तान्तो भ्रातर्वक्तुं न शक्यते ।
भूत-वैद्यमुपैम्येष भूतान्मां मोचयेत् स चेत् ॥५३
एकाकी विचरन् रात्रौ मत्स्यान् हन्मीह निर्जने ।
भूताः प्रेताश्च नायान्ति नृसिंह-स्मरणेन माम् ॥५४

भूतो नृसिंहनाम्ना मां द्विगुणं पीड़यत्ययम् ।
पश्यतो मे तदाकारं भयं चेतसि जायते ॥५५
मा तत्र यूयं यातेति निषेधामि पुनः पुनः ।
तत्रोपेतान् ध्रुवं युष्मान् स भूतोऽनुलगिष्यति ॥५६
इति स्वरूपगोस्वामी श्रुत्वा तत्त्वं विदन्नथ ।
जालिकं कथयामास किञ्चित् सुमधुरं वचः ॥५७
भूत-वैद्य-वरिष्ठोऽस्मि दक्षोऽहं भूतमोचने ।
इत्युक्त्वोदीरयन्मन्त्रं तन्मूर्द्ध्नि न्यस्तवान् करम् ॥५८
चपेटैस्त्रिभिराहत्योवाच भूतः पलायितः ।
न भेतव्यं त्वयेत्युक्त्वा सुस्थिरं तमकारयत् ॥५९
प्रेमैकतोऽन्यतो भीतिरस्थैर्य्यं द्विगुणं ततः ।
गता भीतिरतः किञ्चिद्धैर्य्यं तेनावलम्बितम् ॥६०
स्वरूपः प्रोक्तवांस्त्वं यं भूत इत्यवगच्छसि ।
नासौ भूतः परं कृष्णचैतन्यो भगवानसौ ॥६१
प्रेमावेशवशेनासौ पतितः सागराम्भसि ।
अधुना स्वेन जालेन तमुत्थापितवानसि ॥६२
तत्-स्पर्शेनैव सञ्जातः कृष्णप्रेमोदयस्त्वयि ।
भूत-प्रेत-भ्रमादेव तव जातं महाभयम् ॥६३
भीतिर्व्यपगतेदानीं जातोऽसि स्थिरमानसः ।
उत्थापितस्त्वया क्वासाविति दर्शय नोऽधुना ॥६४
जालिकः प्रोक्तवान् भूयो भूयोऽहं दृष्टवान् प्रभुम् ।
अयं नासौ भवत्येव सोऽत्यन्तं विकृताकृतिः ॥६५
स्वरूपोऽथोक्तवान् प्रेमविकारस्तस्य जायते ।
तेन दीर्घाकृतिस्तस्य विश्लिष्यन्तेऽस्थिसन्धयः ॥६६
इति जालिक आकर्ण्य परमानन्द-मानसः ।
तान् सर्वान् सममादाय महाप्रभुमदर्शयत् ॥६७

प्रभुर्भूमौ पतन्नासीद् दीर्घीभूतकलेवरः ।
पाण्डरो वारिसेकेन वालुका-लिप्त-विग्रहः ॥६८

ललल्लुलितचर्माणं दीर्घ-श्लथ-तनुं प्रभुम् ।
उत्थाप्य दूरमार्गैस्ते न शेकुर्नेतुमालयम् ॥६९

आर्द्रं कौपीनमुत्तार्य्य शुष्कं ते षर्य्यधापयन् ।
निःसार्य्य वालुका देहाद् वहिर्वासस्यशाययन् ॥७०

अथ सर्वे मिलित्वोच्चैश्चक्रुः सङ्कीर्त्तनं ततः ।
ऊचुः श्रीकृष्णनामोच्चैः कर्णमूले च ते प्रभोः ॥७१

चिरमेवं कृते शव्दः प्रविष्टः श्रवणौ प्रभोः ।
ततोऽसौ कृतहुङ्कारः समुत्तस्थौ महाप्रभुः ॥७२

लग्नानि च यथास्थानमस्थीन्युत्तिष्ठतः प्रभोः ।
अर्द्धवाह्यदशायां स निरैक्षत समन्ततः ॥७३

अन्तर्दशा तथा वाह्यदशा चार्द्धवहिर्दशा ।
इत्यन्तरा दशास्तिस्र एकस्यां स्थितवान् प्रभुः ॥७४

ईषदन्तर्दशावेशः स्वल्पवाह्यधिया सह ।
अर्द्धवाह्यदशा नाम भक्तैः सा कथ्यते दशा ॥७५

अर्द्धवाह्यदशायां सप्रलापवचनं प्रभुः ।
आकाशे कथयामास भक्ताः सर्वे च शुश्रुवुः ॥७६

कालिन्दीमवलोक्याहं श्रीमद्वृन्दावनं गतः ।
दृष्टवान् सलिलक्रीड़ां कुर्वन्तं नन्दनन्दनम् ॥७७

मिलित्वैकत्र गोपीभिः सहितो राधिकादिभिः ।
कृष्णः क्रीड़ति रङ्गेण महता यमुनाजले ॥७८

अहं तीरमधिष्ठाय सखीभिः सह दृष्टवान् ।
अदर्शयच्च तं रङ्गं सखी काचित् सखीगणम् ॥७९

"यथा रागः" ।

सख्याः करे निज-दुकूल-विभूषणानि
न्यस्य स्वयं लघुसितं वसनं वसानः ।
कान्तागणेन यमुनामवगाहमानः
कृष्णः करोति रुचिरं जलकेलिरङ्गम् ॥८०

कृष्णस्य पश्य सखि हे जलकेलिरङ्गं
सोऽयं मदान्ध-करिराज इव प्रमत्तः ।
गोपीभिरेष करिणीभिरिवोन्मदाभिः
क्रीड़न् विभाति विचलत्-कर-पुष्कराग्रः ॥८१

तेऽन्योन्यमादौ सलिलं क्षिपन्तो
वर्षन्ति धाराभिरभिद्रवन्तः ।
तेषामनिर्णेय-जयाजयाना-
मुदेत्यसीमं जलकेलि-युद्धम् ॥८२

वर्षन्त्यः स्थिरविद्युतो नवघनं सिञ्चन्ति कृष्णं भृशं
तासाञ्चोपरि सोऽपि वर्षति महावेगेन कृष्णाम्बुदः ।
तीरस्थस्य सखीगणस्य नयनै स्तृष्णाकुलैश्चातकै-
स्तत्तद्वर्षण-रङ्ग-जातममृतं हर्षेण पेपीय्यते ॥८३

आदौ जलाजलि तु युद्धमभूत् प्रवृत्तं
पश्चात् कराकरि मुखा-मुखि चैवमेषाम् ।
तस्योरसा च तदुरोभिरभूत् क्रमेण
युद्धं रदारदि नखानखि चाद्भुतं भोः ॥८४

तेषां पाणि-सहस्र-सेचनमथो पादैः सहस्रेण च
प्रत्यासत्तिमथो सहस्रवदनैरन्योन्यतश्चुम्बनम् ।
आश्लेषं युगपत् सहस्रवपुषां कर्णैः सहस्रेण च
तन्नर्मश्रवणं सहस्रनयनैः पश्यन्ति गोप्यस्तटात् ॥८५

राधां कन्धरदघ्न-वारि सबलात्कारं नयन्माधव-
स्तत्रामुञ्चदगाध-तोय-निवहो यत्रावहद्भीतिदः ।

तत्रैव प्लवते च सापि सबलं तत्-कन्धरं गृह्णती
तोयस्योपरि राजते गज-करोत्खाता
यथा पद्मिनी ॥८६

यावत्योऽत्र लसन्ति गोपललना स्तावन्ति रूपाण्यसौ
कृष्णो बिभ्रदचोरयच्च वसनान्यासां समासामपि ।
अच्छाच्छे यमुना-पयस्यवयवानासां सुदृश्योज्ज्वलान्
सुस्पष्टं परिलोकयन् सुखभरानास्वादयत्येव सः ॥८७

तरङ्ग-हस्त-प्रहितैः पलाशैः
काश्चित् कृतार्था नलिनी-सखीभिः ।
अर्धांशुकीकृत्य विमुक्तकेशां-
श्चोलीयति स्वं करयुग्ममन्या ॥८८

कृष्णेन राधां कलहायमानां
दृष्ट्वा निलीनाः कनकाब्जषण्डे ।
आकण्ठमग्ना विलसन्ति गोप्यो
न वेद्मि भेदं वदनाम्बुजानाम् ॥८६

इतो विहारं कृतवान् यथेप्सितं
कृष्णोऽधुनान्विष्यति गोपिका इति ।
विज्ञाय राधा त्वतिसूक्ष्मया धिया
समं सखीभिर्मिलिता विराजते ॥६०

यावन्ति हेम-नलिनानि जले प्लवन्ते
तावन्ति नीलनलिनानि मिलन्ति तैश्च ।
युध्यन्ति चित्रमितरेतरमेव तानि
पश्यन्ति कौतुकमिदं ललनास्तटस्थाः ॥६१

अथोत्थितां स्तत्पयसः प्रभूतान्
पृथक् स्थितान् युग्मश एव चक्रान् ।

उत्थाय नीलोत्पल-युग्मकानि
पृथक् पृथक् छादयितुं यतन्ते ॥६२
तद्वीक्ष्य रक्तोत्पलयुग्मकानि
नीलोत्पलान्येव निवारयन्ति ।
इत्थं द्वयैर्धर्षण-रक्षणाभ्यां
प्रवर्त्तते चक्रकृते रणोऽयम् ॥६३
नीलोत्पलं जड़मपि प्रवृणोति चक्र-
वाकं सचेतनमिति प्रतिभाति चित्रम् ।
स्थित्यागुणस्य च तयोरपि वैपरीत्यं,
कृष्णस्य राज्य इह राजति रीतिरेषा ॥६४
मित्रस्य मित्रं सहवासिनञ्च
नीलोत्पलं धर्षति चक्रवाकम् ।
असंस्तुतं शत्रुजनस्य मित्रं
रक्तोत्पलं रक्षति तं विचित्रम् ॥६५
विरोधभासातिशयोक्त्यलङ्कृती
कृष्णेन साक्षात् प्रकटय्य दर्शिते ।
आस्वाद्य ये हृष्टमना अहं पुन-
र्भवामि सन्तर्पित-लोचन-श्रवाः ॥६६
चित्रं तथा केलिमसौ समापयन्
कान्तागणं तीरमथानयद्धरिः ।
सुगन्ध-तैलामलकोन्मृजादिभि-
स्तीरे सखीभिः स निषेवितोऽभूत् ॥६७
स्नात्वा पुनः शुष्कपटं वसानः
स्वमन्दिरं रत्नमयं प्रविष्टः ।
बृन्दाहृतैः पुष्पविभूषणैः स
गन्धैर्व्यधान्मञ्जुल-वन्य-वेशम् ॥६८

वृन्दावनेऽद्भुतमया स्तरवोलताश्च
पुष्पश्रियं फलभरांश्च वहन्ति नित्यम् ।
तेषां फलानि निखिलानि तमानयन्ति
देव्यो निकुञ्ज-परिषेवणदासिकास्ताः ॥९९

तैः साधु संस्कृत-फलैः परिपूरयन्त्यः
पात्राण्युरूणि मणिरत्न-गृहस्य पीठे ।
श्रेणीकृतानि निखिलानि यथाक्रमं ताः
संस्थापयन्ति वरमासनमग्रतश्च ॥१००

नानारसानि सहकार-सुनारिकेल-
खर्जूर-कोलि-कदली-कमलाफलानि ।
द्राक्षा-वदाम-पनसानि च दाड़िमानि
मालूर-ताल-करकाणि च केशराणि ॥१०१

सक्षीरिणी-खरमुजा-विस-पीलुकानि
नानाविधानि बहुदेशज-विश्रुतानि ।
वृन्दावनेऽतिसुलभानि सहस्रसंख्या-
न्येतानि चापरविधानि समाहृतानि ॥१०२

गङ्गाजलान्यमृतकेलि-सुधाप्रबन्ध-
कर्पूरकेलि-सरपूप-सुधासिताश्च ।
सत्-कूर्चिकामयतरूंश्च विधाय गेहे
कृष्णस्य भोजनकृतेऽनयदत्र राधा ॥१०३

आलोक्य भक्ष्यनिकरस्य सुपारिपाट्यं
प्राप्तः सुखान्यशितवानुपविश्य कृष्णः ।
राधाथ भक्षितवती सहिता सखीभि-
रादाय कृष्णमथ मन्दिरमध्यशेत ॥१०४

सख्या कयाचिदथ तावुपवीज्यमानौ
संवाह्यमान-चरणाब्जयुगौ कयाचित् ।

तम्बूल-चर्वण-रतावथ लब्धनिद्रौ
सुप्ताः सखीश्च परिलोक्य सुखं गतोऽस्मि ॥१०५
यूयं तदा कलकलञ्च विधाय शब्दं
धृत्वा च मामिह हठादुपनीतवन्तः ।
वृन्दावनञ्च यमुना क गते क कृष्णो
गोप्यश्च हा मम सुखं निहतं भवद्भिः ॥१०६
इत्येवं कथयन्नेव वाह्य-संज्ञोऽभवत् प्रभुः ।
दृष्ट्वा पप्रच्छ गोस्वामि-स्वरूपं सम्मुख-स्थितम् ॥१०७
युष्माभिः कथमेवाहमानीतोऽत्र बलादिति ।
अथ स्वरूपगोस्वामी प्रतिवक्तुं प्रचक्रमे ॥१०८
पतितोऽसि समुद्रेऽस्मिन् प्रभो त्वं यमुनाभ्रमात् ।
इयद्दूरमथानीतः स्राव्यमानस्तदूर्मिभिः ॥१०९
जालिको निजजालेन त्वामुत्थापितवानयम् ।
लभमानस्तव स्पर्शं मत्तोऽभूत् प्रेमसम्पदा ॥११०
सर्वां रात्रिं वयं सर्वे त्वामन्विष्य समन्ततः ।
भ्रमन्तोऽस्य मुखाच्छ्रुत्वा प्राप्ताः
स्मस्त्वामिहागतः ॥१११
वृन्दावन-विलासंस्त्वं मूर्च्छाव्याजेन पश्यसि ।
पश्यतामेव मूर्च्छां ते मनोऽस्माकं विदूयते ॥११२
श्रावितः कृष्णनाम त्वमर्द्धवाह्यदशां गतः ।
प्रलापान् कृतवान् यांश्च तानश्रुन्माखिलान् वयम् ॥११३
प्रभुणोक्तमहं स्वप्नेऽपश्यं वृन्दावनं गतः ।
रासलीलां प्रकुर्व्वन्तं कृष्णं गोपीगणैः सह ॥११४
अथ कृत्वा जलक्रीड़ां सोऽकरोद् वन्यभोजनम् ।
तद्दृष्ट्वा च प्रलापांस्तान् कृतवानिति भाति मे ॥११५

ततः स्वरूपगोस्वामी स्नापयित्वा महाप्रभुम् ।
सममादाय सानन्दचेतसा वासमानयत् ॥११६

इत्येतत् कथितं तावत् समुद्रपतनं प्रभोः ।
श्रुत्वेदं लभते लोकश्चैतन्य-चरणाम्बुजम् ॥११७

आशास्ते यः पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्य-चरितामृतम् ॥११८

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे समुद्र-पतनं नामाष्टादशः परिच्छेदः ।

—०—

अन्त्यलीलायामूनविंशः परिच्छेदः

"वन्दे तं कृष्णचैतन्यं मातृ-भक्त-शिरोमणिम् ।
प्रलप्य मुख-संघर्षी मधूद्याने ललास यः ॥१॥"

श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्यद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१

एवमेवाकरोत् कृष्णप्रेमावेश-वशः प्रभुः ।
प्रलापांस्तान्महोन्मादाद्दिवारात्रं निरन्तरम् ॥२

अतिप्रेष्ठः प्रभोरासीज्जगदानन्दपण्डितः ।
चरित्र-महिमा यस्य प्रभुं नित्यमनन्दयत् ॥३

प्रतिवर्षं नवद्वीपं प्रति तं प्रैरयत् प्रभुः ।
समाश्वासयितुं वाञ्छन्नम्बां विच्छेद-दुःखिताम् ॥४

अये गच्छ नवद्वीपं नत्वाम्बां कथयिष्यसि ।
मन्नामग्राहमम्बायाः पादपद्मे ग्रहीष्यसि ॥५

मद्वचो ब्रूहि तामेवं स्मर्य्यमाणस्त्वयान्वहम् ।
जननि त्वामुपेत्याहं वन्दे पादाम्बुजं तव ॥६

माञ्च भोजयितुं वाञ्छा यदा ते जायते हृदि ।
तदैवावश्यमागत्य त्वद्दत्तं भक्षयाम्यहम् ॥७

तव सेवां परित्यज्य सन्न्यासं कृतवानहम् ।
वातुलेन मया नूनं धर्मनाशः कृतस्ततः ॥८

अयं महापराधो मे न मात गृह्यतां त्वया ।
सर्वथास्मि तवाधीनस्तवैव तनयोह्यहम् ॥९

आदेशादेव ते नीलाचलेऽस्मिन्निवसाम्यहम् ।
यावज्जीवं तमादेशं न त्यक्तुं शक्नुयामिति ॥१०

प्रसादबसनं गोपलीलायां प्राप्तवान् प्रभुः ।
मात्रे तत् प्रेरयामास पुरीस्वाम्युपदेशनात् ॥११

प्रसादोत्तममानाय्य जगन्नाथस्य यत्नतः ।
प्रजिघाय पृथक् कृत्वा मात्रे भक्तगणाय च ॥१२

मातृभक्तजनानां हि प्रभुरेव शिरोमणिः ।
कृतवानपि सन्न्यासं सदासेवत मातरम् ॥१३

अथ गत्त्वा नवद्वीपमभ्युपेत्य च मातरम् ।
अवदज्जगदानन्दः प्रभोः सर्वं निवेदनम् ॥१३

दत्त्वा प्रसादमाचार्य्यादिभिर्भक्तैः स सङ्गतः ।
मासं स्थित्वा ययाचाम्बामाज्ञां प्रतिनिवृत्तये ॥१५

अथाचार्य्यमुपेत्यासौ तदादेशं गृहीतवान् ।
प्रभुमाचार्यगोस्वामी कश्चित् सन्देशमब्रवीत् ॥१६

सङ्केतेनैवमाचार्य्योऽकथयद् यां प्रहेलिकाम् ।
अन्यै र्बोद्धुमशक्यां तां बुबुधे केवलं प्रभुः ॥१७

मम कोटिं नमस्कारान् प्रभवे त्वं निवेदय ।
ततो निवेदयाम्येवं तस्याहं चरणाम्बुजे ॥१८

वातुलं ब्रूहि सर्वेऽत्र सञ्जाता आकुला जनाः ।
वातुलं ब्रूहि हट्टेऽस्मिन् विक्रीयन्ते न तण्डुलाः ॥१९

वातुलं ब्रूहि नास्त्येव कर्मण्याकुलता पुनः ।
वातुलं ब्रूहि सन्देशमिमं वदति वातुलः ॥२०
तच्छ्रुत्वा जगदानन्दो हसन्नासीत्तदा ततः ।
नीलाचलं समागत्य प्रभवे तन्न्यवेदयत् ॥२१
श्रुत्वा प्रहेलिकामीषद्धास्यं कुर्वन्महाप्रभुः ।
एवमेषा तदाज्ञेति ब्रुवंस्तूष्णीं समाश्रयत् ॥२२
जानतापि स्वरूपेण पृष्ट एवं महाप्रभुः ।
अस्याः प्रहेलिकायास्तु नार्थं बोद्धुं समर्थये ॥२३
प्रभुः प्रोचे तमाचार्य्यः पूजको बलवत्तमः ।
निखिलागमशास्त्राणां विध्यनुष्ठान-कौशली ॥२४
उपासनाकृते भक्तो देवमावाहयेत् पुनः ।
पूजनस्य कृते तञ्च कञ्चित्कालं निरोधयेत् ॥२५
पूजा-निर्वहणे जाते पश्चाद्देवं विसर्जयेत् ।
नार्थं प्रहेलिकायास्तु वेद्मि तस्य मनो वा किम् ॥२६
महायोगेश आचार्य्यः प्रहेलिका-विशारदः ।
नाहमप्यर्थमेतस्या बोद्धुं शक्नोमि निश्चितम् ॥२७
इति भक्तगणाः श्रुत्वा विस्मयं परमं ययूः ।
ततः स्वरूपगोस्वामी सञ्जातः किञ्चिदुन्मनाः ॥२८
तद्दिनात् प्रभृति प्रादुरभूदन्या दशा प्रभोः ।
श्रीकृष्णविरहावस्था द्विगुणैव व्यवर्द्धत ॥२९
सोन्मादां कुर्वतश्चेष्टां प्रलापांश्च दिवानिशम् ।
विरहो वबृधे राधाभावावेशादनुक्षणम् ॥३०
कृष्णेन मथुरायानमकस्सादस्फुरत् प्रभोः ।
उद्घूर्णाख्या दशा जाता निखिलोन्मादलक्षणा ॥३१
रामानन्दं गृहीत्वासौ कण्ठे च प्रलपन् बहु ।
स्वरूपमथ पप्रच्छ मत्वा निजसखीजनम् ॥३२

विशाखां परिपप्रच्छ पुरा श्रीराधिका यथा ।
तथा श्लोकं पठन्नेव प्रललाप महाप्रभुः ॥३३

"तथाहि ललितमाधवे तृतीयाङ्के पञ्चविंशः श्लोकः —

क्व नन्द-कुल-चन्द्रमाः क्व शिखि-चन्द्रकालङ्कृतिः
क्व मन्द्र-मुरली-रवः क्व नु सुरेन्द्र-नील-द्युतिः ।
क्व रास-रस-ताण्डवी क्व सखि जीव-रक्षौषधि-
र्निधिर्मम सुहृत्तमः क्व बत हन्त वा धिग्विधिम् ॥३॥

यथा रागः ।"

व्रजपति-कुल-दुग्धाम्भोधि-जातः स कृष्णः
सकल-कल-सुधांशु र्दीप्यमानत्रिलोकः ।
तनुरुचिममृतं तत्तस्य पीत्वैव शश्वद्
व्रजनयन-चकोरा जीवनं धारयन्ति ॥३४

क्षणमप्यनिरीक्ष्य यन्मुखं
मम वक्षः स्फुटतीति सत्वरम् ।
सखि दर्शय मे क्व माधवो
न यदि स्थास्यति मे न जीवनम् ॥३५

व्रज-युवति-नलिन्यः काम-तिग्मांशु-दग्धाः
शिशिर-कर-सुधाभिः फुल्लतां यान्ति यस्य ।
क्व स निखिलकलाभिः पूर्ण इन्दुस्तमक्ष्णो-
र्मम सखि कुरु पान्थं रक्ष मे जीवितञ्च ॥३६

सुरपति-धनुराभोड्डीनपिच्छालि-चूड़ा
तड़ितमिव वसाना पीतवासो-युगञ्च ।
वकततिमिव मुक्तामालिकां धारयन्ती
नवजलधर-कान्तिः श्याममूर्त्तिः क्व चासौ ॥३७

यस्या नेत्रं स्पृशति सकृदप्यद्भुता श्याममूर्त्ति-
र्जाग्रत्यस्या वसति हृदये चूत-निर्य्यासवत् सा ।

नार्य्याश्चित्तं विशति सहसा किन्तु हा हन्त याति
नो निष्क्रान्तिं कथमपि शिवाकोलिसूचिशिखेव ॥३८

तापिञ्छ-गारुत्मत-रत्न-जित्वरा
कान्तिं र्जगन्त्युन्मदयत्यसौ सदा ।
उत्पूत-शृङ्गाररसेन मिश्रयन्
ज्योत्स्नां विधि र्निर्मितवानमूं किमु ॥३९

जित-नवघन-नादो वेणुनादः क्व चासौ
निखिलभुवनकर्षी यस्तमाकर्ण्य धावन् ।
व्रज-नगर-जनानां चातकानां समूहः
पिवति तृषितकण्ठः कान्ति-पीयूषधाराम् ॥४०

मम जीवन-रक्षणौषधिः क्व स मे वन्धुवरः कलानिधिः ।
सखि जीवति तं विना तनु र्धिगिमां दैव-
विड़म्वितास्मि हा ॥४१

या जीवितुं नेच्छति तां कथं बिधिः
सञ्जीवयत्येष इति क्रुधा शुचा
क्रान्तः प्रभुः कृष्ण-विधी अभर्त्सयत्
श्लोकं परं भागवतस्य वाचयन् ॥४२

"तथाहि श्रीमद्भागवते दशमस्कन्ध ऊनचत्वारिंशाध्याये सप्तदशः श्लोकः—

अहो विधात स्तव न क्वचिद्दया
संयोज्य मैत्र्या प्रणयेन देहिनः ।
तांश्चाकृतार्थान् वियुनङ्क्ष्यपार्थकं
विचेष्टितं तेऽर्भक-चेष्टितं यथा ॥३॥

अस्यार्थो यथा रागः ॥"

त्वं प्रेम-धर्माज्ञतया विधे श्रमं
व्यर्थं करोष्येव शिशुर्यथेहते ।

प्राप्नोमि चेत्त्वामनुशिक्षयाम्यह-
मित्थं यया त्वं न पुनः करिष्यसि ॥४३
अरे विधे क्रूरतमोऽसि निश्चितं
प्रेम्णैव संयोज्य सुदुर्लभौ जनौ ।
मिथोऽकृतार्थावपि तौ वियोजयन्
कथं सुदूरं नयसीतरेतरम् ॥४४
अरे विधे निष्करुण प्रदर्श्य मे
कृष्णाननं लोभितवान्दृशौ मनः ।
आच्छिद्य दूरं क्षण-पीतमेव तद्
दत्तापहारिन् कलुषेण लिप्यसे ॥४५
अक्रूरे कृतदूषणेऽपि किमभिक्रुद्धासि भो मामिति
वक्तुं चेदिदमुद्यतोऽसि सुदुराचार त्वमाकर्णय ।
अक्रूरस्य तनुं त्वयैव दधता कृष्णः स मे चोरितो
नेत्थं दुश्चरितं विधातुमपरः शक्नोति कश्चिज्जनः ॥४६
कुप्यामि ते कथमहं निजकर्मदोषं
भुञ्जे त्वया सह ममास्ति दविष्ठभेदः ।
यः प्राणनाथ उषितो युगपन्मयैव
कृष्णः कठोर-हृदयो मयि सोऽपि जातः ॥४७
सर्वानप्यपहाय यं हि भजते सर्वात्मना मे मनः
कृष्णोऽसौ स्वकरेण हन्ति वत मां नारी-वधादप्यभीः ।
प्रत्यावृत्य न मां स पश्यति मृत-प्रायां पुनस्तत्कृते
तं प्रेमाणमपि क्षणेन कृतवान् सञ्चूर्णयन् धूलिसात् ॥४८
किं कृष्णाय करोमि कोपमथवा दुर्दैवदोषो हि मे
स्वीयोऽयं परिपक्वमेतदधुना पापस्य तीव्रं फलम् ।
यो मे प्रेमवशं गतश्चिरमभूत् सम्प्रत्युदासीनतां
दुर्दैवेन बलीयसा मम पुनर्नीतः स कृष्णो ध्रुवम् ॥४६

एवं स गौरः सविषादमूचे
कृष्णासि यातः क्व हहा हहेति ।
गोपी-स्वभावाद्व्यलपत् पुनः स
गोविन्द दामोदर माधवेति ॥५०

अथ स्वरूपेण स रामराय
आश्वासयत्तं विविधैरुपायैः ।
तत्-सङ्ग-गीत्या विनिवृत्त-चित्तः
प्रभुः कथञ्चित् स्थिर-धैर्य्य आसीत् ॥५१

इत्थं विलपतस्तस्य रात्रेरर्द्धे गते ततः ।
प्रभुं स्वरूपगोस्वामी गम्भीरायामशाययत् ॥५२
शयिते च प्रभौ रामानन्दोऽगच्छन्निजालयम् ।
ततः स्वरूपगोविन्दौ तद्द्वारे शयितौ पुनः ॥५३
उद्वेल-हृदयः प्रेमावेशेन श्रीमहाप्रभुः ।
नाम-सङ्कीर्त्तनं जाग्रन्निषण्णः कृतवानथ ॥५४
प्रभोरुत्थित उद्वेगो विच्छेद-व्याकुलात्मनः ।
गम्भीरा-कुड्य आरेभे मुखं घर्षयितुं प्रभुः ॥५५
नासा-गण्डानने तस्य क्षतान्यासन्ननेकधा ।
रक्तधाराः स्रवन्ती र्न भावावेशाद्विवेद स ॥५६
मुखं सङ्घर्षयामाम भावेनैवाखिलां निशाम् ।
गोँ गोँ शब्दं कृतन्तेन स्वरूपः श्रुतवानथ ॥५७
दीपं प्रज्ज्वाल्य गेहान्तः प्रविश्य च मुखं प्रभोः ।
दृष्ट्वा स्वरूपगोविन्दौ महद्दुःखमवाप्नुताम् ॥५८
ततः शय्यां तमानीय कृत्वा च स्थिरमानसम् ।
त्वमेतत् कृतवान् क्वेति स्वरूपः पृष्टवान् प्रभुम् ॥५९
प्रत्यूचे प्रभुणोद्विग्नो गृहेऽवस्थातुमक्षमः ।
अभ्राम्यं द्वारमन्विष्यन् प्रस्थातुं त्वरितं वहिः ॥६०

द्वारमप्राप्य कुड्येषु चतुर्ष्वेवाहताननः ।
जात-क्षत-पतद्रक्तो नास्मि गन्तुमपि क्षमः ॥६१
इत्युन्माददशायां हि मनोऽस्थैर्य्यमुपेयुषा ।
यदुक्तं वा कृतं तेन सर्वमुन्मादलक्षणम् ॥६२
ततः स्वरूपगोस्वामी दुश्चिन्ता-ग्रस्त-मानसः ।
विमर्षं कृतवानन्येद्यवि भक्तजनैः सह ॥६३
सर्वैर्भक्तै र्मिलित्वासौ साधयामास च प्रभुम् ।
शङ्करं पण्डितं तेन सार्द्धं वेश्मन्यशाययत् ॥६४
प्रभोः णादतले शिश्ये तदा-प्रभृति शङ्करः ।
पादौ प्रसारयामास शङ्करस्योपरि प्रभुः ॥६५
प्रभु-पादोपधानाख्यः स बभूव ततः परम् ।
पुरा श्रीशुकदेवेन वर्णितो विदुरो यथा ॥६६

"तथाहि श्रीमद्भागवते तृतीयस्कन्धे त्रयोदशाध्याथे चतुर्थः

श्लोकः—

इति ब्रुवाणं विदुरं विनीतं
सहस्रशीर्ष्णश्चरणोपधानम् ।
प्रहृष्टरोमा भगवत्कथायां
प्रणीयमानो मुनिरभ्यचष्ट ॥४॥"

शङ्करः प्रभुपादाब्जं तथा संवाहयन्मुदा ।
यथाप्रोक्तं शयानश्च निद्रामग्नोऽभवत् सुखम् ॥६७
दृष्ट्वा नग्नशरीरं तं निद्रामग्नञ्च शङ्करम् ।
प्रभुरुत्थाय चावव्रे तदङ्गानि स्वकन्थया ॥६८
शङ्करो लब्धनिद्रोऽपि सदा सत्वरचेतनः ।
उपविष्टो निशां जाग्रत् प्रभोः पादौ स्वपीड़यत् ॥६९
न शशाक वहिर्गन्तुं शङ्कमानः प्रभुस्ततः ।
नालं घर्षयितुं कुड्ये मुखाब्जं तद्भयेन च ॥७०

रघुनाथेन दासेन लीलेयं श्रीमहाप्रभोः ।
प्रकाशितास्ति चैतन्य-स्तव-कल्पतराविति ॥७१

"तथाहि स्तवावल्यां चैतन्य-स्तव-कल्पवृत्ते षष्ठः श्लोकः—

स्वकीयस्य प्राणार्बुद-सदृश-गोष्ठस्य विरहात्
प्रलापानुन्मादात् सततमतिकुर्वन् विकलधीः ।
दधद्भित्तौ शश्वद्वदन-विधु-घर्षेण रुधिरं
क्षतोत्थं गौराङ्गो हृदय उदयन्मां मदयति ॥५॥"

इत्थं नक्तन्दिवं प्रेमसिन्धुमग्नो महाप्रभुः ।
मज्जन्नासीत् कदाचिद्वा प्लवमानः कदाचन ॥७२
रात्रौ वैशाखमासीयपौर्णमास्यामथैकदा ।
परिभ्रमितुमुद्यानं जगाम श्रीमहाप्रभुः ॥७३

उद्यान-प्रवरं नाम तज्जगन्नाथवल्लभम् ।
भक्तान् सर्वान् सहादाय प्रविवेश महाप्रभुः ॥७४
फुल्लद्वृक्षलतौघं तदासीद्वृन्दावनोपमम् ।
गुञ्जद्भृङ्गं कलालापि-शारिका-शुक-कोकिलम् ॥७५

तत्र कुसुमसौरभ्यं वहन्मालय-मारुतः ।
गुरुवच्छिक्षयामास नर्त्तनं लतिकातरून् ॥७६
उद्याने तत्र पूर्णेन्दु-चन्द्रिका-परमोज्ज्वले ।
वल्ली-महीरुहाः सर्वे ज्योत्स्नया सन्दिदीपिरे ॥७७

वसन्त-प्रमुखां स्तत्र षड़्तून् सुव्यवस्थितान् ।
पश्यन् श्रीभगवान् गौरहरि र्हर्षमवाप्तवान् ॥७८
प्रभुर्ललित-लवङ्ग-लतेत्यादिपदावलीम् ।
गापयन्नखिलैर्भक्तैः पर्य्यभ्राम्यत् सनर्त्तनम् ॥७९

प्रति-प्रतानिनी-वृक्ष-तलमेवं परिभ्रमन् ।
अकस्माद्दष्टवान् कृष्णमशोकस्य तलेस्थितम् ॥८०

कृष्णमालोक्य धावन् स गतवांस्तं प्रति प्रभुः ।
कृष्णोऽप्यग्रे तमालोक्य हसन्नन्तर्दधे तदा ॥८१
लब्ध्वापि प्रमुखे कृष्णं पुनस्तञ्च प्रणाशयन् ।
प्रभु र्मूर्च्छां गतस्तत्र निपपात महीतले ॥८२
तदा कृष्णाङ्ग-गन्धेन बभूवोद्यानमाभृतम् ।
लब्ध्वा तं गन्धमेवासौ चेतनां प्राप्तवान् प्रभुः ॥८३
प्रविशत् सर्वदा नासां श्रीकृष्णस्याङ्गसौरभम् ।
आस्वादयितुकामोऽसौ बभूव प्रभुरुन्मदः ॥८४
राधा कृष्णाङ्गगन्धेन लुब्धोवाच सखीं यथा ।
तथा श्लोकं पठंस्तस्य चकारार्थं महाप्रभुः ॥८५

"तथाहि गोविन्दलीलामृतेऽष्टमसर्गे षष्ठः श्लोकः—

कुरङ्ग-मदजिद्वपुः परिमलोर्मिकृष्टाङ्गनः
स्वकाङ्ग-नलिनाष्टके शशियुताब्जगन्धप्रथः ।
मदेन्दुवरचन्दनागुरुसुगन्धिचर्चार्चितः
स मे मदनमोहनः सखि तनोति नासास्पृहाम् ॥६॥

यथा रागः ।"

कस्तूरिकेन्दीवर-सौरभं जयन्
कृष्णाङ्गगन्धो भुवनानि चाश्नुते ।
शश्वत् समाकर्षति सर्वमानसा-
न्यन्धीकरोत्यद्वियुगञ्च योषिताम् ॥८६
सखि मदयति कृष्णस्याङ्ग-गन्धो हि विश्वं
विशति यदि कदाचिन्नासिकां सुन्दरीणाम् ।
वसति तदनु तस्यामेव शश्वत्ततोऽसौ
नयति च पुनरेताः कृष्णपार्श्वं प्रसह्य ॥८७
पादौ करौ च नयने वदनञ्च नाभि-
रित्यष्ट सन्ति कमलानि च कृष्णदेहे ।

तान्येव सौरभभरं प्रसभं हरन्ति
कर्पूर-पूर-रस-सिक्त-सरोरुहाणाम् ॥८८
नीहार-सम्मिलित-चन्दन-कर्दमेन
सत्-कुङ्कुमैरगुरुभिर्मृगनाभिचूर्णैः ।
कर्पूरकैश्च सहितः सहजोऽङ्गगन्धः
कृष्णस्य तस्कर इवाचरति प्रसह्य ॥८९
नारीणां स तनुं मनश्च हरति घ्राणञ्च सङ्घूर्णयन्
धम्मिल्लं श्लथयत्यसौ शिथिलयन्नीवीं सुबद्धामपि ।
सोन्मादाः कुरुते च ता गुरुजनस्याग्रेऽपि संनर्त्तयन्
गन्धः कृष्णतनोरसौ सखि बलात्कारेण दस्यूयते ॥९०
तद्गन्धेन वशीकृतानवरतं नासा जगद्योषितां
तं लब्धुं तृषितापि जातु लभते नाप्नोति तं जातु वा ।
प्राप्तं काममसौ पिबन्त्यपि मुहुः पातुं सदोत्कण्ठते
तं न प्राप्य पुनस्तृषा-परिगता मृत्युं समापद्यते ॥९१
कृष्णो मन्मथ-मोहनो विजयते चातुर्य्य-चूड़मणि-
र्गन्धं पण्यमसौ प्रसार्य्य विपणौ विश्वाङ्गना लोभयन् ।
ताभ्यो मूल्यमृते ददाति सततं गन्धेन तेनान्धिताः
पूर्वाभ्यस्तमपि स्वमन्दिर-पथं न प्राप्नुवन्त्येव ताः ॥९२
इत्थं गौरहरिश्च माधव-तनूगन्धेन कृष्टान्तरो
लुब्धोऽधावदितस्ततो भ्रमरवद् बम्भ्रम्यमाणस्तदा ।
गत्वापि प्रतिपादपं प्रतिलतं कृष्णस्य लाभाशया
तं न प्राप तदीय-सौरभ-भरं लेभे त्वसौ केवलम् ॥९३
स्वरूपदामोदर-रामराययो-
र्गीत्या प्रभौ नृत्यति हृष्टचेतसि ।
रात्रिः प्रभाताथ तयोः प्रचेष्टया
प्रभुः पुनः प्राप च बाह्यचेतनाम् ॥९४

भक्तिर्मातरि चोन्मद-प्रलपनं सङ्घर्षणं भित्तिषु
श्रीवक्त्रस्य च दिव्यनर्त्तनमहः कृष्णाङ्ग-गन्धादिति ।
लीलास्तस्य चतुर्विधा इह परिच्छेदे प्रभो र्गीतवान्
श्रीमद्रूप-पदाब्ज-सेवन-परः श्रीकृष्णदासोऽधुना ॥९५

इत्थमेव तदा वाह्यसंज्ञां लब्ध्वा महाप्रभुः ।
स्नात्वा च कृतवान् श्रीमज्जगन्नाथस्य दर्शनम् ॥९६

अलौकिक्यो हि कृष्णस्य लीलास्ता दिव्यशक्तयः ।
चरित्रं यस्य तर्काणां नैव गोचरतां व्रजेत् ॥९७

तस्मिन् प्रेमापि जागर्त्ति सर्वदा यस्य मानसे ।
पण्डिता अपि न ज्ञातुं क्षमन्ते तस्य चेष्टितम् ॥९८

"तथाहि भक्तिरसामृतसिन्धौ पूर्वविभागे प्रेमभक्तिलहर्य्यां द्वादशः श्लोकः—

धन्यस्यायं नवप्रेमा यस्योन्मीलति चेतसि ।
अन्तर्वाणीभिरप्यस्य मुद्रा सुष्ठु सुदुर्गमा ॥७॥"

शृण्वन्नलौकिकीं चेष्टां प्रलापांश्च महाप्रभोः ।
तर्कं कश्चन मा कुर्य्याच्छृणुयाच्छ्रद्धयान्वितः ॥९९

सत्यत्वेऽस्य प्रमाणं हि श्रीमद्भागवतं यथा ।
तत्र भ्रमर-गीतायां राधा प्रेम-प्रलापिनी ॥१००

तत्रैव दशमस्यान्ते महिषी-गीतिका यथा ।
सविशेषं न बुध्यन्ते तदर्थाः पण्डितैरपि ॥१०१

श्रीमन्महाप्रभु र्नित्यानन्दस्तद्दास-दासकाः ।
दयन्ते यं स एवैको विश्वसित्यत्र निश्चितम् ॥१०२

यूयं शृणुत सश्रद्धं शृण्वन्तः सुखमाप्स्यथ ।
कुतर्कजानि दुःखानि नङ्क्ष्यन्ति त्रिविधानि च ॥१०३

नित्यं नवायमानं श्रीचैतन्य-चरितामृतम् ।
शृण्वतो हृदय-श्रोत्र-मण्डलं परितृप्यति ॥१०४

य आशास्ते पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्य-चरितामृतम् ॥१०५

इति श्रीचैतन्यचरितामृतेऽन्त्यखण्डे विरहप्रलाप-मुख-सङ्घर्षणादि-वर्णनं नामोनविंशः परिच्छेदः ।

—०—

अन्त्यलीलायां विंशः परिच्छेदः

"प्रेमोद्भावित-हर्षेर्ष्योद्वेग-दैन्यार्त्तिमिश्रितम् ।
लपितं गौरचन्द्रस्य भाग्यवद्भि र्निषेव्यते ॥१॥"

गौरचन्द्रो मुहुर्जीयान्नित्यानन्दो जयत्यलम् ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥१
इत्थं सोऽधिवसन्नीलाचल-धाम महाप्रभुः ।
आसीद्रात्रिन्दिवं कृष्ण-विच्छेदेनातिविह्वलः ॥२
रामानन्द-स्वरूपाभ्यामुभाभ्यामेव सर्वदा ।
रसानास्वादयामास तदुक्त-श्लोक-गीतिभीः ॥३
हर्षः शोकश्च रोषश्च कातर्य्योद्वेग-दीनताः ।
सन्तोषश्च समुत्कण्ठा प्रभोरासन्ननेकधा ॥४
तत्तद्भावानुरूपान् स स्व-श्लोकान् वाचयन् प्रभुः ।
तदर्थान् स्वादयामास समं बन्धुद्वयेन च ॥५
जातु केनापि भावेन प्रभुः श्लोकानवाचयत् ।
सर्वां रात्रिं जजागार तदर्थान् स्वादयन् पुनः ॥६
स्वरूपं रामरायञ्च सहर्षं प्रभुरुक्तवान् ।
श्रूयतां परमोपायो नाम-सङ्कीर्त्तनं कलौ ॥७
सङ्कीर्त्तनेन यज्ञेन कृष्णमाराधयन्ति ये ।
एतैरेव सुमेधोभिर्लभ्यं कृष्णपदाम्बुजम् ॥८

"तथाहि श्रीमद्भागवत एकादशस्कन्धे पञ्चमाध्याय ऊनत्रिंशः श्लोकः—

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम् ।
यज्ञैः सङ्कीर्त्तनप्रायै र्यजन्ति हि सुमेधसः ॥२॥"

नामसङ्कीर्त्तनादेव सर्वानर्थलयो भवेत् ।
सर्वकल्याणकृत् कृष्णप्रेमोल्लासोऽथ सम्भवेत् ॥६

"तथाहि पद्यावल्यां सप्तमाङ्कधृत आनन्दाचार्य्यकृतः श्लोकः—

चेतो-दर्पण-मार्जनं भव-महादावाग्नि-निर्वापणं
श्रेयः-कैरव-चन्द्रिका-वितरणं विद्या-बधूजीवनम् ।
आनन्दाम्बुधि-वर्द्धनं प्रतिपदं पूर्णामृतास्वादनं
सर्वात्म-स्नपनं विजयते श्रीकृष्णसङ्कीर्त्तनम् ॥३॥"

सङ्कीर्त्तन-प्रभावेण पाप-संसार-नाशनम् ।
चित्तशुद्धिस्तथा सर्वभक्तिसाधन-सङ्गमः ॥१०
कृष्ण-प्रेमोद्गमः प्रेमामृतस्यास्वादनं ततः ।
कृष्ण-प्राप्तिरथो सेवामृताब्धौ मज्जनं सदा ॥११
उद्यद्दैन्य-विषादोऽथ श्लोकं स्वमपठत् प्रभुः ।
यस्यार्थं शृण्वतां दुःखशोका यान्त्यखिला लयम् ॥१२

"तथाहि पद्यावल्यामूनविंशाङ्कधृतः श्रीकृष्णचैतन्यदेवस्य श्लोकः—

नाम्नामकारि बहुधा निज-सर्व-शक्ति-
स्तत्रार्पिता नियमितः स्मरणे न कालः ।
एतादृशी तव कृपा भगवन्ममापि
दुर्दैवमीदृशमिहाजनि नानुरागः ॥४॥"

विचित्ररुचयो लोकास्तेषां वाञ्छाप्यनेकधा ।
इति कृष्णः स्वनामानि कृपया बहुधाकरोत् ॥१३
भुञ्जानोऽथ शयानोवा नाम गृह्णन् यथा तथा ।
सर्वसिद्धिमवाप्नोत्यनैयत्याद्देशकालयोः ॥१४

कृष्णः स्थापितवान् शक्तीरखिलास्तेषु नामसु ।
दुर्दैवं मम तत्रापि नाम्नि प्रीति र्न जायते ॥१५

गृह्यमाने यथा नाम्नि कृष्ण-प्रेमोदयो भवेत् ।
स्वरूप-रामरायौ भोः श्रूयतां तस्य लक्षणम् ॥१६

"तथाहि पद्यावल्यां विंशाङ्कधृतः श्रीकृष्णचैतन्यदेवस्य श्लोकः—

तृणादपि सुनीचेन तरोरपि सहिष्णुना ।
अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥५॥"

सन्नप्युत्तम आत्मानं मन्यते यस्तृणाधमम् ।
श्रयते च सहिष्णुत्वं यः पादप इव द्विधा ॥१७

पादपः कृत्यमानोऽपि यथा किञ्चिन्न भाषते ।
संशुष्यन् म्रियमाणोऽपि कञ्चिद्वारि न याचते ॥१८

यो यद् याचति तस्मै तत् स्वधनं स प्रयच्छति ।
सहमानः स्वयं घर्म-वर्षा अन्यांस्तु रक्षति ॥१९

अभिमानं त्यजेत् सर्वश्रेष्ठः सन्नपि वैष्णवः ।
श्रीकृष्णाधिष्ठितं जीवं ज्ञात्वा सम्मानयेच्च तम् ॥२०

इत्थम्भूतेन येनैतन्नाम कृष्णस्य गृह्यते ।
तस्य श्रीकृष्णपादाब्जे परमं प्रेम जायते ॥२१

इत्येवं भाषमाणस्य प्रभो र्दैन्यमवर्द्धत ।
कृष्णं याचितुमारेभे शुद्धां भक्तिं महाप्रभुः ॥२२

प्रेम्ण एष स्वभावो यद् यः कृष्ण-प्रेमिकोजनः ।
प्रेम्णो गन्धोऽपि कृष्णे मे नास्त्येवेति स मन्यते ॥२३

"तथाहि पद्यावल्यां पञ्चाशीतितमाङ्कधृतः श्रीकृष्णचैतन्यदेवस्य श्लोकः—

न धनं न जनं न सुन्दरीं
कवितां वा जगदीश कामये ।
मम जन्मनि जन्मनीश्वरे
भवताद्भक्तिरहैतुकी त्वयि ॥६॥"

धनं जनं न याचेऽहं कवितां सुन्दरीमुत ।
विशुद्धां देहि मे भक्तिं कृपया कृष्ण केवलम् ॥२४
दास्यभक्तिमथायाचत् सोऽतिदैन्यवशात् पुनः ।
संसारि-जीवमात्मानं मन्यमानो महाप्रभुः ॥२५

"तथाहि पद्यावल्यां त्रयोदशाङ्कधृतो दाक्षिणात्यकृतः श्लोकः—

अयि नन्द-तनूज किङ्करं
पतितं मां विषमे भवाम्बुधौ ।
कृपया तव पाद-पङ्कज-
स्थित-धूलि-सदृशं विचिन्तय ॥७॥"

नित्यदासोऽपि ते कृष्ण त्वामेव विस्मरन्नहम् ।
मायया बद्ध एवात्र पतितोऽस्मि भवार्णवे ॥२६
कृपया कुरु मां कृष्ण तव पाद-रजः-समम् ।
तवाहं सेवको नित्यं करिष्ये तव सेवनम् ॥२७
अत्यन्तोत्कलिका-दैन्यसमाक्रान्तः पुनः प्रभुः ।
कृष्णं ययाच सप्रेम-नाम-संकीर्त्तनं ततः ॥२८

"तथाहि पद्यावल्यां चतुरशीतितमांकधृतः श्रीकृष्णचैतन्यदेवस्य श्लोकः—

नयनं गलदश्रुधारया
वदनं गद्गदरुद्धया गिरा ।
पुलकै र्निचितं वपुः कदा
तव नामग्रहणे भविष्यति ॥८॥"

जीवनं मे दरिद्रस्य व्यर्थं प्रेमधनं विना ।
दासीकुर्वन्नतः प्रेमधनं मे देहि वेतनम् ॥२९
ततो रसान्तरावेशात् स्फुरद्विच्छेद-कातरः ।
दैन्योद्वेग-विषादैः स प्रललाप महाप्रभुः ॥३२

"तथाहि पद्यावल्यां सप्तविंशत्यधिकत्रिशततमाङ्कधृतः श्रीचैतन्यदेवस्य श्लोकः—

युगायितं निमेषेण चक्षुषा प्राबृषायितम् ।
शून्यायितं जगत् सर्वं गोविन्द-विरहेण मे ॥६॥"
नोद्वेगाद्दिवसो याति युगवद्भाति मे क्षणः ।
वर्षन्त्यश्रूणि चक्षुर्मे प्राबृषेण्याम्बुवाहवत् ॥३१
गोविन्दस्य वियोगेन त्रैलोक्यं शून्यमेव मे ।
प्राणा मे नापि यान्तीव दह्यमानास्तुषाग्निना ॥३२
औदासीन्यं भजत्येष श्रीकृष्णो मां परीक्षितुम् ।
इत्याकर्ण्यावदन् सख्य स्तया कृष्ण उपेक्ष्यताम् ॥३३
इत्युक्तिं चिन्तयन्त्यास्तु राधाया निर्मले हृदि ।
स्वाभाविकस्य तत्प्रेम्णः स्वभावोऽभूत् प्रकाशितः ॥३४
ईर्ष्योत्कण्ठा च दैन्यञ्च विनयः प्रौढ़िरेव च ।
युगपत्त इमे भावाः प्रादुर्भावं गतास्तदा ॥३५
एवं भावसमूहेन राधा चञ्चल-मानसा ।
यं हि प्रोढ़िमयं श्लोकं सखीनामग्रतोऽपठत् ॥३६
प्रभुस्तत्र तथाभावैस्तञ्च श्लोकमुदैरयत् ।
वाचयन्नेव तं श्लोकं स्वयमेव तथाभवत् ॥३७

"तथाहि पद्यावल्यां चतुस्त्रिंशदधिकशततमः कस्यचित् श्लोकः—

आश्लिष्य वा पादरतां पिनष्टु मा-
मदर्शनान्मर्महतां करोतु वा ।
यथा तथा वा विदधातु लम्पटो
मत्प्राणनाथस्तु स एव नापरः ॥१०॥"

श्लोकस्यैतस्य पूर्णोऽर्थो भवत्येवातिविस्तृतः ।
मया न प्राप्य तस्यान्तं संक्षेपेण करिष्यते ॥३८

"यथा रागः ।"

श्रीकृष्णस्य पदाब्ज-सेवन-परां दासीं पुनर्मां स चे-
दानन्दामृतविग्रहो रसमयः श्लिष्यन् करोत्यात्मसात् ।

किं वानर्पित-दर्शनश्चिरमसौ चित्तं शरीरञ्च मे
विच्छेदाद् यदि जारयत्यपि तदा स प्राणनाथो मम ॥३६
शृण्वन्तु सख्यो मम चित्तनिश्चयं
प्रीणात्वसौ मय्यथवा व्यथां ददत् ।
आहन्तु मां सन्ततमेव केवलं
कृष्णो मम प्राणपति र्न चापरः ॥४०
हित्वान्याः स वराङ्गना मम वशीकुर्वन् स्वचेतस्तनू
सौभाग्यं सुसमृद्धमत्र जगति प्रख्यापयिष्यंश्च मे ।
पश्यन्तीष्वपि तासु दीव्यति मया सार्द्धं यथाभीप्सित-
मीर्ष्याग्निं ज्वलयत्यकारणमहो चेतःसु तासां यदि ॥४१
किं वासौ शठ-धृष्ट-लम्पटवरः कापट्य-चूड़ामणि-
रन्याः काश्चन सुन्दरीः प्रियतमा नारी र्गृहीत्वा समम् ।
पश्यन्त्या अपि मे मनः परिभव-ग्लानिं नयन् स्वेच्छया
ताभिः क्रीड़ति चित्रचित्रमपि चेत् स प्राणनाथो मम ॥४२
दुःखं निजं न गणयामि सुखन्तु तस्य
वाञ्छामि केवलमिदं हि ममैक लक्ष्यम् ।
मां दुःखयन् स लभते विपुलं सुखं चेद्
दुःखं तदेव मम भाति सुखं वरेण्यम् ॥४३
यां सौन्दर्य्य-पिपासया वरवधूं कृष्णोऽभिलालष्यते
तामप्राप्य कथं स वहतां दुःखायमानं मनः ।
तत्तस्याः पदयोर्निपत्य करयोर्धृत्वोपनेष्यामि तां
तं कामं रमयन्त्यहं सह तया दास्यामि तस्मै सुखम् ॥४४
कान्ता ताड़यते च तर्ज्जति यदा कृष्णं प्रकोपान्विता
सन्तोषं विपुलं सुखञ्च स तदा प्राप्नोति तेनैव हि ।
योग्यं मानमसावपि प्रकुरुते कृष्णस्य सौख्यावधिं
स्वल्पैरेव तु साधनैः प्रियकृतैर्मानञ्च तं मुञ्चति ॥४५

किन्त्वन्या कथमेव जीवति यया कृष्णस्य मर्मव्यथां
जानत्यापि विधीयते स्थिरतरो मानो हि तस्योपरि ।
काङ्क्षन्त्या निजमेव शर्म निपतत्वस्याः पवि मूर्द्धनि
कृष्णस्यैव हि केवलं सुखमहं सम्प्रार्थये सर्वदा ॥४६

मह्यं द्वेष-परायणापि सततं कृष्णस्य या गोपिका
सन्तोषं विदधाति सोऽपि नितरां तां प्राप्तुमाकाङ्क्षति ।
तस्या गेहमहं स्वयं यदि गता तां सेवितुं प्राप्नुयां
दासीभूय तदैव मे हृदि सुखोल्लासः परं जायते ॥४७

कुष्ठि-ब्राह्मण-भार्य्यया सुचरिताशीर्षावतंस-श्रिया
पत्युः प्रीतिकृते स्वयं कृतमहो वाराङ्गना-सेवनम् ।
तत् पुण्येन दिवाकरस्य गमनं रुद्ध्वा मृतं तं पतिं
सा सञ्जीवयितुञ्च तोषितवती तन्मुख्यदेवत्रयम् ॥४८

कृष्णोऽसौ मम जीवनं स च मम प्राणाधिकं वैभवं
प्राणानामपि जीवनं भवति मे सर्वात्मनासौ पुनः ।
तं संस्थाप्य ममोरसीह सुखिनं कुर्य्यां कया सेवया
चिन्तैषा मम जाग्रती विहरति प्राणेषु सर्वक्षणम् ॥४९

तत्-सेवयैव सुखितापि सुखं तदीयं
मत्-सङ्गमादिति तनुं वितरामि तस्मै ।
प्राणेश्वरी त्वमिति तेन कृतापि कान्ता
मन्ये स्वमेव सततं हि तदीयदासीम् ॥५०

सङ्गादपि स्वादुतरा सुखर्द्धिः
कान्तस्य सेवात्र रमा प्रमाणम् ।
हृत्स्थापि विष्णोः पदसेवनेच्छु-
स्तं सेवते स्वं मनुते च दासीम् ॥५१

इत्थं राधिकयोक्त-निर्मलतम-प्रेमर्द्धि-संसूचकं
वाक्यं गौरहरि र्मुहुर्मुहुरसावास्वादयामास तत् ।

नानाभाव-समूह-चञ्चल-मनाः कम्पादिभिः सात्त्विकै-
र्व्याप्ताशेष-कलेवर स्तनु-मनो-धृत्यामभूदक्षमः ॥५२
प्रेम व्रजस्य बिमलं कनकं यतोऽस्मिन्
गन्धोऽपि नास्ति निजसौख्यमनोरथस्य ।
तज्ज्ञापनाय जगति प्रभुणोक्त एष-
श्लोकस्ततो विरचितश्च पुनस्तदर्थः ॥५३
एवमेव प्रभुस्तत्तद्भावाविष्टेन चेतसा ।
प्रलापानकरोत्तांस्तांस्तदा श्लोकांश्च वाचयन् ॥५४
प्रभुणा लोकशिक्षार्थं येऽष्टौ श्लोकाः पुरा कृताः ।
श्लोकाष्टकस्य तस्यार्थं स्वयमास्वादितोऽधुना ॥५५
प्रभोः शिक्षाष्टकं नाम श्लोकान् यः शृणुयात् पठेत् ।
श्रीकृष्णे प्रेमभक्तिश्च वर्द्धतास्य दिने दिने ॥५६
समुद्र-कोटि-गम्भीरो यद्यप्यासीन्महाप्रभुः ।
तथाप्यस्थिरतां प्राप नानाभाव-विधूदयात् ॥५७
जयदेवे तथा भागवते रायस्य नाटके
कर्णामृते च ये श्लोका वर्त्तन्ते भावसूचकाः ॥५८
तै स्तैर्भावै र्भृतान् श्लोकान् वाचयन् श्रीमहाप्रभुः ।
तत्तद्भावसमाविष्टो रसानास्वादयत्तदा ॥५९
तदवस्थो दिवारात्रं प्रभुर्द्वादश वत्सरान् ।
इत्थमास्वादयत् कृष्णरसान् बन्धुद्वयान्वितः ॥६०
तांस्ताँलीलारसान् वक्त्रसहस्रेणापि वर्णयन् ।
अनन्तः स्वयमप्यन्तं तेषां नाप्तुं क्षमोभवेत् ॥६१
शक्नोति क्षुद्रधीर्जीवः कस्तान् वर्णयितुं पुनः ।
तेषामेकः कणः स्पृष्ट आत्मनः शुद्धये मया ॥६२
प्रभोः प्रलापचेष्टानां तासामन्तो न विद्यते ।
वर्ण्यमानासु सर्वासु भवेद् ग्रन्थोऽति विस्तृतः ॥६३

श्रीवृन्दावनदासेन या लीला वर्णिताः पुरा ।
तासामेव हि लीलानां सूत्रमेव कृतं मया ॥६४
तेन त्यक्तावशिष्टासु संक्षेपात् कथितास्वपि ।
बाहुल्येनैव लीलानां ग्रन्थो वृद्धिं गतोऽभवत् ॥६५
अतस्ता निखिला लीला नाहं वर्णयितुं क्षमः ।
श्रीलीलाभ्यो नमस्कृत्य ग्रन्थमद्य समापिपम् ॥६६
इदं दिग्दर्शन-न्यायाद् यत् किञ्चित् कथितं मया ।
एवमेवाभवन्नन्ये रसास्वादा महाप्रभोः ॥६७
प्रभो र्लीलातिगम्भीरा न बोद्धं शक्यते मया ।
बुद्धे स्तत्राप्रवेशेन नास्मि वर्णयितुं क्षमः ॥६८
श्रोतॄणां वैष्णवानां वो वन्दमानः पदाम्बुजम् ।
चैतन्य-चरितस्याहं वर्णनां हि समापिपम् ॥६९
अनन्तमिदमाकाशमत्र सर्वे विहङ्गमाः ।
स्व-स्व-शक्त्यनुसारेण यथा रोहन्ति चेष्टया ॥७०
अनन्ताः पारहीनाश्च तथा लीला महाप्रभोः
जीवः सन् को नु शक्नोति सम्यग् वर्णयितुञ्च ताः ॥७१
यावद् गच्छति मे बुद्धिस्तावद् वर्णितवानहम् ।
निखिलेऽम्बुनिधावेकं कणं संस्पृष्टवानिव ॥७२
नित्यानन्द-कृपापात्रं दासो वृन्दावनाह्वयः ।
सोऽयं चैतन्यलीलानामादिव्यासो हि कथ्यते ॥७३
भाण्डारे सर्वलीलानां समक्षं तस्य सत्यपि ।
अत्यल्पा वर्णयित्वैव सोऽन्या बह्वीरवर्जयत् ॥७४
स्वग्रन्थे लिखितं तेन यत् किञ्चिद्वर्णितं मया ।
तत् संक्षिप्तमशक्तेन लेखितुं विस्तरादिति ॥७५
चैतन्यमङ्गले ग्रन्थेऽलिखद् यत् सोऽन्तरान्तरा ।
श्रूयतां तस्य तद्वाक्यं प्रमाणं परमं हि तत् ॥७६

संक्षेपेण मयोक्तं तद् वक्तुं शक्यं न विस्तरात् ।
तद् वर्णयिष्यते वेदव्यासेन विस्तरादिति ॥७७
इत्थं लिलेख चैतन्यमङ्गले सोऽन्तरान्तरा ।
पुरा वर्णयति व्यास इति तत् सत्यमब्रवीत् ॥७८
दुग्धाब्धेरिव चैतन्यलीलापीयूषवारिधेः ।
स्वकीयां कर्करीं पूर्त्वा यथातृष्णं स पीतवान् ॥७६
किञ्चित् तत् पीतशेषञ्च पीयूषं मे स दत्तवान् ।
तावतैवोदरं पूर्णं तृष्णा प्रशमिता च मे ॥८०
अतीव क्षुद्रजीवोऽस्मि विहगो रक्तटुण्टुकः ।
यथा सोऽयं समुद्रस्य जलं पिबति तृष्णया ॥८१
अहं लीलासमुद्रस्य तथैकं कणमस्पृशम् ।
अनयोपमया लीला विस्तारोऽप्यवगम्यताम् ॥८२
मया लिखितमित्येषोऽभिमानोऽनृत एव मे ।
तनुरेषा मदीया तु काष्ठपुत्तलिकासमा ॥८३
अहमन्धो बधिरश्च स्थविरो जरसातुरः ।
कम्पेते मे करौ बुद्धिमनसी चातिचञ्चले ॥८४
ग्रस्तोऽहं विविधै रोगै र्गमनाध्यासनाक्षमः ।
म्रिये पञ्चरुजा पीड़ा-व्याकुलात्मा दिवानिशम् ॥८५
अस्य ग्रन्थस्य पूर्वांशे मयैतच्च निवेदितम् ।
लिख्यते तच्च भूयोऽपि श्रूयतां तस्य कारणम् ॥८६
श्रीमद् गोविन्द-चैतन्यौ नित्यानन्दप्रभुस्तथा ।
श्रीमदद्वैत आचार्य्यः श्रीमान् श्रोतृगणः पुनः ॥८७
श्रीस्वरूपश्च रूपश्च श्रीमान् श्रीलः सनातनः ।
तथा श्रीरघुनाथः श्रीगुरुः श्रीजीव इत्यमी ॥८८
तेषां पादानुकम्पैव मया लेखयति स्म तत् ।
वर्त्तते चापरोऽप्येकः सोऽत्यन्तं दयते मम ॥८६

स श्रीमदनगोपालो मां सोऽलेखयदाज्ञया ।
अयुक्तमपि तद्वक्तुं तूष्णीं स्थातुं न शक्यते ॥६०
भवेत् कृतघ्नतादोषस्तच्चाकथयतो मम ।
सदम्भं ब्रूवते मह्यं श्रोतृभिर्नैव कुप्यताम् ॥६१
सर्वेषां भवतां पादधूलयो वन्दिता मया ।
लेखितुं तेन चैतन्यलीला स्वल्पाप्यशक्यत ॥६२
अनुद्यते मया तावदन्त्यलीलागणः क्रमात् ।
अनुवादे कृते लीलास्वादः सम्प्राप्यते पुनः ॥६३
प्रथमेऽत्र परिच्छेदे द्वितीयं मिलनं प्रभोः ।
रूपेण तत्र तस्यैव नाटकश्रवणं तथा ॥६४
तत्रैव च प्रभुः श्वानं शिवानन्दानुयायिनम् ।
वादयन् कृष्णनामैव मोचयामास संसृतेः ॥६५
द्वितीये च प्रभुः स्तोक-हरिदासमशिक्षयत् ।
तत्रैव च शिवानन्दश्चकाराश्चर्य्यदर्शनम् ॥६६
तृतीये हरिदासस्य महिमाभूत् प्रकाशितः ।
प्रभुं दण्डितवान् वाचा श्रीदामोदरपण्डितः ॥६७
नाम दत्त्वा प्रभुश्चक्रे ब्रह्माण्डानां विमोचनम् ।
महिमा स्थापितो नाम्नो हरिदासेन तत्र च ॥६८
सनातनेन तुर्येऽथ द्वितीयं मिलनं प्रभोः ।
शरीर-त्याग-निर्बन्धात्तस्यारक्षन्महाप्रभुः ॥६९
ज्यैष्ठे मास्यातप-प्लुष्टः प्रभुणासौ परीक्षितः ।
तस्मिन् सञ्चार्य्य शक्तिञ्च बृन्दारण्यं स यापितः ॥१००
प्रभुः प्रद्युम्नमिश्रे च पञ्चमे कृतवान् कृपाम् ।
श्रावयामास कृष्णस्य कथां रायमुखेन तम् ॥१०१
कुर्वता नाटकोपेक्षां वङ्गीयस्य कवे स्तदा ।
अस्थाप्यत स्वरूपेण महिमा विग्रहस्य च ॥१०२

षष्ठे च प्रभुणा दास-रघुनाथोऽमिलत्ततः ।
नित्यानन्दाज्ञया चक्रे चिपिटाख्यमहोत्सवम् ॥१०३

दामोदरस्वरूपस्य हस्ते तं न्यस्तवान् प्रभुः ।
गोवर्द्धनशिलां गुञ्जामालाञ्चास्मै ददौ पुनः ॥१०४

सप्तमे मिलितो भट्ट-वल्लभः प्रभुणा यदा ।
तद्गर्वं खण्डयामास बहुधा च प्रभुस्तदा ॥१०५

अष्टमेऽथ पुरी-रामचन्द्रः प्रभुमुपागमत् ।
प्रभुणा तद्भयेनैव भिक्षा-सङ्कोचनं कृतम् ॥१०६

नवमे मोचिते गोपीनाथे च पट्टनायके ।
दृष्टवन्तः प्रभुं लोका जगत्त्रयनिवासिनः ॥१०७

आस्वादं भक्तदत्तानां दशमे कृतवान् प्रभुः ।
मञ्जूषां सज्जयामास तत्र राघवपण्डितः ॥१०८

प्रभुणा च कृतं तत्र गोविन्दस्य परीक्षणम् ।
परिमुण्डाख्य-नृत्यस्य वर्णना तत्र वर्त्तते ॥१०९

एकादशे तिरोभूते हरिदासेऽथ ठाकुरे ।
भगवान् भक्तवात्सल्यं गौराङ्गोऽदर्शयद् यदा ॥११०

कृतवान् जगदानन्दो द्वादशे तैलभञ्जनम् ।
नित्यानन्दोऽकरोत्तत्र शिवानन्दस्य ताड़नम् ॥१११

मथुरां जगदानन्दो गत्वायातस्त्रयोदशे ।
तत्र शुश्राव सङ्गीतं देवदास्या महाप्रभुः ॥११२

मिलनं रघुनाथस्य भट्टाचार्य्यस्य तत्र च ।
प्रभुणा प्रेरितो वृन्दावनाय सोऽनुकम्पया ॥११३

दिव्योन्माद-समारम्भ-वर्णनासीच्चतुर्दशे ।
स्थितो देहः प्रभोरत्र मनो वृन्दावनं गतम् ॥११४

तत्रैव पतनं सिंहद्वारे श्रीमन्महाप्रभोः ।
देहास्थि-सन्धि-शैथिल्याद्यनुभावः समुद्गतः ॥११५

चटकं पर्वतं दृष्ट्वा तत्र धावितवान् प्रभुः ।
प्रलापवर्णनं किञ्चित्तत्रैवासीन्महाप्रभोः ॥११६
उद्याने विहरन्नासीत् प्रभुः पञ्चदशे पुनः ।
वृन्दावन-भ्रमेणैव तन्मध्यं प्रविवेश च ॥११७
आकृष्टानि प्रभोः पञ्चेन्द्रियाण्येव तदन्तरा ।
तत्रैव श्रीमहारासे कृष्णमन्विष्टवानसौ ॥११८
षोड़शे कालिदासस्य दयाञ्चक्रे महाप्रभुः ।
फलञ्चादर्शयत्तत्र वैष्णवोच्छिष्ट-भोजिनः ॥११९
श्लोकञ्च कारयामास शिवानन्दसुतं शिशुम् ।
सिंहद्वार-प्रतीहारी प्रभुं कृष्णमदर्शयत् ॥१२०
महाप्रसाद-माहात्म्यं प्रभुणा तत्र वर्णितम् ।
सर्वैरास्वादितं तत्र श्लोकैः कृष्णाधरामृतम् ॥१२१
धेनूनामन्तरे सप्तदशेऽथ पतनं प्रभोः ।
कूर्माकारानुभावस्य तत्रैवाभूत् समुद्भवः ॥१२२
कृष्ण-शब्दगुणाकृष्टमना आवेशतः प्रभुः ।
'का स्त्र्यङ्ग त' इति श्लोकस्यार्थं व्याख्यातवांस्तदा ॥१२३
शावल्येन च भावानां प्रललाप महाप्रभुः ।
कृष्णकर्णामृतश्लोकं तत्र व्याख्यातवान् स्फुटम् ॥१२४
अष्टादशपरिच्छेदे पतितः सागराम्भसि ।
कृष्ण-गोपी-पयः-केलि-दर्शनं कृतवान् प्रभुः ॥१२५
ईक्षाञ्चक्रे च तत्रैव कृष्णेन वन्यभोजनम् ।
जालिकेनोद्धृतोऽम्भोधे र्निजावासं समागतः ॥१२६
ऊनविंशे तथा भित्तौ मुख-सङ्घर्षणं प्रभोः ।
श्रीकृष्ण-विरह-स्फूर्त्या प्रलाप-वचनानि च ॥१२६
विहरन् कुसुमोद्याने वासन्त-रजनीष्वसौ ।
व्यवृणोत् कृष्णसौरभ्यश्लोकस्यार्थं महाप्रभुः ॥१२८

अथ विंशे परिच्छेदे निजं शिक्षाष्टकं पठन् ।
प्रेमावेशेन तस्यार्थं प्रभुरास्वादयत् स्फुटम् ॥१२६
भक्तान् शिक्षयितुं श्लोकाष्टकं कृत्वा क्रमेण सः ।
पुनरास्वादयामास तस्याप्यर्थं महाप्रभुः ॥१३०
लीलानां मुख्य-मुख्यानामुल्लेखोऽत्र मया कृतः ।
स्मर्य्यन्ते ह्यनुवादेन ग्रन्थस्था वृत्तयोऽखिलाः ॥१३१
एकैकस्मिन् परिच्छेदे बह्व्यः सन्ति कथास्त्विह ।
गृहीता मुख्य-मुख्या हि निःसीमा भान्ति शृण्वताम् ॥१३२
श्रीमत्या राधया सार्द्धं श्रीमान् मदन-मोहनः ।
श्रीमान् गोविन्दपादश्च श्रीमत्या राधया सह ॥१३३
सह श्रीराधया गोपीनाथः श्रीमानिति त्रिभिः ।
देवैर्निखिलगौड़ीया नाथवन्तश्चकासति ॥१३४
अथ श्रीकृष्णचैतन्यो नित्यानन्दप्रभुस्तथा ।
श्रीमानद्वैत आचार्य्यः श्रीगौर-भक्त-संहतिः ॥१३५
श्रीस्वरूपश्च रूपश्च श्रीलः श्रीमान् सनातनः ।
श्रीगुरू रघुनाथश्च श्रीजीवचरणा इति ॥१३६
एषां पदानि सर्वेषां दधामि स्वीयमूर्द्धनि ।
जायते येन सर्वेषां वाञ्छितानां प्रपूरणम् ॥१३७
एषां पादानुकम्पैव गुरुरध्यापिका तथा ।
मदीयां भारतीं शिष्यां बहु चित्रमनर्त्तयत् ॥१३८
श्रान्तां शिष्यां निरीक्ष्येमां नृत्याद्व्यरमयद् गुरुः ।
सा न नर्त्तयतीत्येषासीना तिष्ठति भारती ॥१३९
अदक्षा भारतीयं मे न स्वयं वेत्ति नर्त्तितुम् ।
नर्त्यमाना तया तावन्नृत्त्वा विश्राममग्रहीत् ॥१४०
श्रोतॄणामिह सर्वेषामहं वन्दे पदाम्बुजम् ।
तेषां पादानुकम्पैव सर्वमङ्गलकारणम् ॥१४१

येनैव श्रूयते श्रीमच्चैतन्य-चरितामृतम् ।
तस्य प्रक्षाल्य पादाब्जमुदकं तत् पिवाम्यहम् ॥१४२
भूषयामि स्वमूर्द्धानं श्रोतृणां पादरेणुभिः ।
पीतेऽमृतेऽत्र युष्माभिः श्रमो मे सफलो भवेत् ॥१४२
आशास्ते यः पदाम्भोजं श्रीरूप-रघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्य-चरितामृतम् ॥१४४

इति श्रीचैतन्य-चरितामृतेऽन्त्यखण्डे शिक्षाश्लोकार्थास्वादनं नाम विंशः परिच्छेदः ।

अन्त्यलीला समाप्ता ।

समाप्तमिदं श्रीचैतन्यचरितामृतम् ।

—०—

ग्रन्थ-परिशिष्टम्

"उपसंहार-श्लोकाः ।

चरितममृतमेतच्छ्रीलचैतन्यविष्णोः
शुभदमशुभ-नाशि श्रद्धयास्वादयेद् यः ।
तदमलपदपद्मे भृङ्गतामेत्य सोऽयं
रसयति रसमुच्चैः प्रेम-माध्वीक-पूरम् ॥१
श्रीमन्मदन-गोपाल-गोविन्ददेव-तुष्टये ।
चैतन्यार्पितमस्त्वेतच्चैतन्य-चरितामृतम् ॥२
परिमल-वासित-भुवनं स्वरसोन्मादित-रसज्ञ-रोलम्बम् ।
गिरिधर-चरणाम्भोजं कः खलु रसिकः समीहते हातुम् ॥३
शाके सिन्ध्वग्नि-वाणेन्दौ ज्यैष्ठे वृन्दावनान्तरे ।
सुर्य्येऽह्वयसितपञ्चम्यां ग्रन्थोऽयं पूर्णतां गतः ॥४॥"

—०—

अनुवादकर्त्तुरुपसंहारः ।

श्रीकृष्णस्याङ्ग-सङ्ग-स्मृति-सुरभि-सुधास्वाद-सम्मीलिताक्षी
तत्-प्रेमोच्छेद-शङ्का-द्रुत-चपल-हृदान्दोलनाकम्पिताङ्गी ।
मुञ्चन्त्यश्रुप्रवाहं विरह-हुतवहो दाह-निर्वापणार्थं
चैतन्यस्यान्त्यलीला जगति विजयतां भक्त-भव्योद्भवाय ॥

शाके मुनि-स्वर-पुराण-म इन्दुवारे
सूर्य्ये च वृश्चिकगते दिन ऊनविंशे ।
श्रीकृष्णदासरचितश्चरितामृताख्यो
ग्रन्थोऽद्य संस्कृतगिरानुकृतः समाप्तः ॥

गौरेन्दोश्चरितामृतं विरचितं श्रीकृष्णदासेन यत्
पद्यैर्वङ्गज–वाङ्मयैरतिपुरा तस्यान्त्यलीलामिमाम् ।
ज्ञानानन्द-सरस्वती-परमहंसाचार्य्य-चूड़ामणेः
शिष्यः संस्कृतभाषयानुकृतवान् पद्यात्मना भास्करः ॥

—०—

प्रथमसंस्करणे मुद्रणदोषविशेषाणां संशोधनपत्रम्।

(अन्त्यलीला)

पत्राङ्कः	श्लोकसंख्या	अशुद्धिः	शुद्धिः
६	६	कृतयामलवचनम्	धृतयामलवचनम्
१६	१३०	सकोचं	संकोचं
२३	१६२	श्रीसतातन	श्रीसनातन
	१६५	प्रभुणालिङ्घित	प्रभुणालिङ्गित
५५	२११	जगद्धृमुत्ताभ्यां सतम्	जगत्ताभ्यां समुद्धृतम्
७७	२१३	यावन्यो	यावन्तो
८३	४६	पठन्त	पठन्ति
६१	१४५	सोभाग्यं	सौभाग्यं
६८	६८	प्युभुञ्जत	प्यभुञ्जत
११४	१६५	द्विर्निमन्त्रणे	द्विर्निमन्त्रणे
१६७	२	स्वरूपस्तु	स्वरूपस्य
१८८	११	कृतवात्	कृतवान्
१६५	१०५	स्वगृहेऽण्णं	स्वगृहेऽन्नं
१६७	१३१	निणाय	निनाय
२०५	७३	मुह्यं	मह्यं
२२६	६१	तुस्यैकं	तस्यैकं
२५०	७०	षर्य्यधापयन्	पर्य्यधापयन्
२६६	१३	कुष्णः	कृष्णः

—o—

श्रीमत्स्वामिभास्करानन्दसरस्वती-विरचितम्

आनन्दाश्रमाधिष्ठातृ-

श्रीश्रीमदन्नपूर्णाज्ञानेश्वर-युगल-स्तोत्रम्

शाश्वत चिन्मय चिर-चितिशक्ते
लीलामय चिरमभिनयरक्ते ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥१

प्रेमघनामृत परमानन्दे
कातर-मातर-पितरौ वन्दे ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥२

गुणमय सृष्टि-स्थिति-लय-हारे
भव-नाविकवर कृत-भव-पारे ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥३

हरि-विधि-वन्दित नन्दितलोके
दुःखत्रयहर नाशितशोके ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥४

स्मरहर रतिपति-जीवनदात्रि
विश्वविधात भुवन-विधात्रि ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥५

वृषपतिवाहन मृगपति-याने
आर्त्तजनाश्रय करुणाधाने ।
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥६

पद्मासन मणिनूपुरचरणे
मृत्युञ्जय कृतयमभयहरणे ।
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥७

भिक्षुक परमान्नामृतपाणे
कृत्तिपटाम्वर वरपरिधाने
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥८

फणिमण्डन मणिगण-परिवारे
कर्पर-लम्वन लम्वित-हारे ।
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥६

भस्मधवल मदकुङ्कुमगन्धे
पिङ्गजटासित-कवरीवन्धे ।
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥१०

गङ्गाधर चिकुरोज्ज्वलमाले
शिशुशशिशेखर तनुशशिभाले ।
ज्ञानेश्वर जय जय जगदम्वे
शरणं चरण-तरणिमवलम्वे ॥११

रजतगिरिप्रभ काञ्चनकान्ते
चिन्तामणिवर कल्पलतान्ते ।
ज्ञानेश्वर जय जय जगदम्बे
शरणं चरण-तरणिमवलम्बे ॥१२

प्रणाममन्त्रः—अन्नपूर्णे जगन्मात र्ज्ञानेश्वर जगत्पितः ।
आनन्द-ज्ञानरूपाभ्यां तुभ्यं तुभ्यं नमो नमः ॥

—०—

श्रीमत्स्वामिभास्करानन्दसरस्वतीविरचिताः कतिपयश्लोकाः

(तदीय-परममित्र-श्रीकालीकिङ्करसेनगुप्तमहोदयस्य सौजन्येन प्राप्ताः)

श्रीभारतीस्तुतिः

कूजत्-पाण्डर-हंस-पृष्ठ-निहित-श्रीमत्पदाम्भोरुहा
वीणादण्डक-वेदमण्डित-करा श्रीपुण्डरीकासना ।
स्नुह्यत्-स्नेह-सुधावदात-नयना मन्दस्मित-श्रीमुखा
श्रीविद्या वरदा सदा विजयतां श्रीभारती भारते ॥

या रत्नाकर-तस्करेऽर्पितवती मौनञ्च वाक्पाटवम्
या श्रीभारतवर्षिणी कृतवती व्यासञ्चिरञ्जीविनम् ।
अख्याताभिजने जने धृतवती या कालिदासे श्रियम्
सेयं भारतभारतीह समये नष्टेति चित्रं न किम् ॥

कालेन प्रतिरुद्धविक्रमतया क्वाप्यस्ति या निश्चला
भूयात् सा सुरभारती प्रतिदिनं लब्धप्रसारा द्रुतम् ।
या वैदेशिककौशलेन चकिता दूरं विदेशं श्रिता
सा लक्ष्मीः पुनरेत्य भारतभुवं शश्वत् स्थिरा तिष्ठतात् ॥

श्रीहरिस्तुतिः

मात्रा दक्षिणपाणिना सरभसं वामप्रकोष्ठे धृत-
श्चञ्चन्मुष्टि-गृहीत-वेत्रपतनाशङ्कोन्नमत् पाणिकः।
गण्डोरःस्रवदश्रुमौक्तिकझरो व्यादीयमानाननो
मायावल्लववालको मनसि मे कश्चित् समुद्भासते ॥
भुञ्जानं दधिभक्तमञ्जलिभृतं कक्षार्पितप्राजनम्
नीविप्रोथितवेणुकं तत इतो दृष्टिं क्षिपन्तं मुहुः।
वत्सान्वेषणतत्परं स्मितमुखं वंभ्रम्यमाणं वने
कश्चिच्छ्यामलचिक्कणद्युतिभृतं गोपालवालं भजे ॥

युगलस्तुतिः

स्नातां तीरमुपेत्य मुष्टियुगलाक्रान्ताञ्चलेन द्रुतं
सिक्तं गुल्फविलम्बिकुन्तलचयं सन्ताड़यन्तीं मुहुः।
पश्चात् साचि नमत्तनुं स्मरधनुर्ज्यारोपशिक्षामिव
राधामिष्टतमां विलोक्य निभृतं हृष्टो हरिः पातु वः ॥
राधां तीर्थशीलाप्रसारितपदां मुक्तोत्तरीयाञ्चलं
पिण्डीकृत्य नितम्वविम्वयुगलं तत्रैव संस्थाप्य च।
तैलोद्वर्त्तनसाधनैः करयुगेनाभ्यञ्जयन्तीं तनुं
वल्लीलीनकलेवरः सकुतुकं पश्यन् हरिः पातु वः ॥
अभ्यङ्गाकुलमानसापि परितो दृष्टिं क्षिपन्ती मुहुः
दृष्ट्वैवोच्चकिता लतावृततनुं कृष्णं सतृष्णेक्षणम्।
न्युब्जीकृत्य वपुः प्रविश्य च जले दूरं तरन्ती गता
फुल्लत्कोकनदैर्वृता स्मितमुखी राधा सदा पातु वः ॥

—०—